II. Śatarudiya mantras as in the Śuklayajurveda Saṃhitā (Mādhyandina Śākhā) Chapter 16, with Ralph T.H. Griffith's translation.

and

III. Śivasahasranāmakoṣa (A dictionary of Śiva's names as in the Critical edition of the Mahābhārata).

47. As explained above, the Trisuparṇa mantras (Rigeda X.114.3-5) with H.H., Wilson's translation and the Śatarudirya mantras (Śuklayajurveda Chapter 16) with Ralaph T.H. Griffith's translation are placed at Appendices I and II, as supplements to the Sāntiparvan version of the SS of the Mahābhārata and the corresponding VP and BP versions.

48. The dictionary at Appendix III represents a modest attempt to give a faithful translation of each of the alphabetically arranged nāmans as in the Anuśāsanaparvan version of the SS in the Critical edition of the Mahābhārata. This is just the minimum that could be done at the moment. If circumstances permit, a more comprehensive dictionary incorporating all the versions of the SS would be presented later. I shall be grateful for the comments and suggestions from the learned scholars.

49. It is perhaps for the first time that all the eight versions of the Śivasahasranāmastotra are being presented in one volume (Sivasahasranāmāṣṭakam). It goes without saying that the tradition of stotras including Sahasranāmans represents a productive area of serious research. I hope, this volume may stand us in good stead in promoting such studies and research.

20.4.1996 **Ram Karan Sharma**

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

VERSION-1

I महाभारतेऽनुशासनपर्वणि (संशोधिते संस्करणे)

वासुदेव उवाच ।

ततः स प्रयतो भूत्वा मम तात युधिष्ठिर ।
प्राञ्जलिः प्राह विप्रर्षिर्नामसंहारमादितः ।। १ ।।

उपमन्युरुवाच ।

ब्रह्मप्रोक्तैर्ऋषिप्रोक्तैर्वेदवेदाङ्गसंभवैः ।
सर्वलोकेषु विख्यातैः स्थाणुं स्तोष्यामि नामभिः ।। २ ।।[१]

महद्भिर्विहितैः सत्यैः सिद्धैः सर्वार्थसाधकैः ।
ऋषिणा तण्डिना भक्त्या कृतैर्देवकृतात्मना ।। ३ ।।

यथोक्तैर्लोकविख्यातैर्मुनिभिस्तत्त्वदर्शिभिः ।
प्रवरं प्रथमं स्वर्ग्यं सर्वभूतहितं शुभम् ।
श्रुतैः सर्वत्र जगति ब्रह्मलोकावतारितैः ।।। ४ ।।

यत्तद्रहस्यं परमं ब्रह्मप्रोक्तं सनातनम् ।
वक्ष्ये यदुकुलश्रेष्ठ शृणुष्वावहितो मम ।।। ५ ।।

परत्वेन भवं देवं भक्तस्त्वं परमेश्वरम् ॥
तेन ते श्रावयिष्यामि यत्तद्ब्रह्म सनातनम् ।। ६ ।।

---

१. सत्यैरन्वर्थैः वेदे कृतात्मना दत्तचित्तेन कृतैः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

न शक्यं विस्तरात्कृत्स्नं वक्तुं शर्वस्य केनचित् ।
युक्तेनापि विभूतीनामपि वर्षशतैरपि ॥ ७ ॥

यस्यादिर्मध्यमन्तश्च सुरैरपि न गम्यते ।
कस्तस्य शक्नुयाद्वक्तुं गुणान्कार्त्स्न्येन माधव ॥ ८ ॥

किं तु देवस्य महतः संक्षिप्तार्थपदाक्षरम् ।
शक्तितश्चरितं वक्ष्ये प्रसादात्तस्य चैव हि ॥ ९ ॥

अप्राप्येह ततोऽनुज्ञां न शक्यः स्तोतुमीश्वरः ।
यदा तेनाभ्यनुज्ञातः स्तुवत्येव सदा भवम् ॥ १० ॥

अनादिनिधनस्याहं सर्वयोनेर्महात्मनः ।
नाम्नां कंचित्समुद्देशं वक्ष्ये ह्यव्यक्तयोनिनः ॥ ११ ॥

वरदस्य वरेण्यस्य विश्वरूपस्य धीमतः ।
शृणु नामसमुद्देशान् यदुक्तं पद्मयोनिना ॥ १२ ॥

दश नामसहस्राणि यान्याह प्रपितामहः ।
तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतम् ॥ १३ ॥

गिरेः सारं यथा हेम पुष्पात्सारं यथा मधु ।
घृतात्सारं यथा मण्डस्तथैतत्सारमुद्धृतम् ॥ १४ ॥

सर्वपाप्मापहमिदं चतुर्वेदसमन्वितम् ।
प्रयत्नेनाधिगन्तव्यं धार्यं च प्रयतात्मना ।
शान्तिकं पौष्टिकं चैव रक्षोघ्नं पावनं महत् ॥ १५ ॥

इदं भक्ताय दातव्यं श्रद्दधानास्तिकाय च ।
नाश्रद्दधानरूपाय नास्तिकायाजितात्मने ॥ १६ ॥

यश्चाभ्यसूयते देवं भूतात्मानं पिनाकिनम् ।
स कृष्ण नरकं याति सह पूर्वैः सहानुगैः ॥ १७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इदं ध्यानमिदं योगमिदं ध्येयमनुत्तमम् ।
इदं जप्यमिदं ज्ञानं रहस्यमिदमुत्तमम् ।
इदं ज्ञात्वान्तकालेऽपि गच्छेद्धि परमां गतिम् ।। १८ ।।

पवित्रं मङ्गलं पुण्यं कल्याणमिदमुत्तमम् ।
निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम् ।। १९ ।।

इदं ब्रह्म पुरा कृत्वा सर्वलोकपितामहः ।
सर्वस्तवानां दिव्यानां राजत्वे समकल्पयत् ।। २० ।।

तदाप्रभृति चैवायमीश्वरस्य महात्मनः ।
स्तवराजेति विख्यातो जगत्यमरपूजितः ।
ब्रह्मलोकादयं चैव स्तवराजोऽवतारितः ।। २१ ।।

यस्मात्तण्डिः पुरा प्राह तेन तण्डिकृतोऽभवत् ।
स्वर्गाच्चैवात्र भूलोकं तण्डिना ह्यवतारितः ।। २२ ।।

सर्वमङ्गलमङ्गल्यं सर्वपापप्रणाशनम् ।।
निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम् ।। २३ ।।

ब्रह्मणामपि यद्ब्रह्म पराणामपि यत्परम् ।
तेजसामपि यत्तेजस्तपसामपि यत्तपः ।। २४ ।।

शान्तीनामपि या शान्तिर्द्युतीनामपि या द्युतिः ।
दान्तानामपि यो दान्तो धीमतामपि या च धीः ।। २५ ।।

देवानामपि यो देवो मुनीनामपि यो मुनिः ।
यज्ञानामपि यो यज्ञः शिवानामपि यः शिवः ।। २६ ।।

रुद्राणामपि यो रुद्रः प्रभुः प्रभवतामपि ।
योगिनामपि यो योगी कारणानां च कारणम् ।। २७ ।।

यतो लोकाः संभवन्ति न भवन्ति यतः पुनः ।
सर्वभूतात्मभूतस्य हरस्यामिततेजसः ।। २८ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु ।
यच्छ्रुत्वा मनुजश्रेष्ठ सर्वान्कामानवाप्स्यसि ॥ २९ ॥

स्थिरः स्थाणुः प्रभुर्भानुः प्रवरो वरदो वरः ।
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः ॥ ३० ॥

जटी चर्मी शिखण्डी च सर्वाङ्गः सर्वभावनः ।
हरिश्च हरणाक्षश्च सर्वभूतहरः प्रभुः ॥ ३१ ॥

प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः ।
श्मशानचारी भगवान्खचरो गोचरोऽर्दनः ॥ ३२ ॥

अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।
उन्मत्तवेशप्रच्छन्नः सर्वलोकप्रजापतिः ॥ ३३ ॥

महारूपो महाकायः सर्वरूपो महायशाः ।
महात्मा सर्वभूतश्च विरूपो वामनो मनुः ॥ ३४ ॥

लोकपालोऽन्तर्हितात्मा प्रसादो हयगर्दभिः ।
पवित्रश्च महांश्चैव नियमो नियमाश्रयः ॥ ३५ ॥

सर्वकर्मा स्वयंभूश्च आदिरादिकरो निधिः ।
सहस्राक्षो विरूपाक्षः सोमो नक्षत्रसाधकः ॥ ३६ ॥

चन्द्रसूर्यगतिः केतुर्ग्रहो ग्रहपतिर्वरः ।
अद्रिरद्र्यालयः कर्ता मृगबाणार्पणोऽनघः ॥ ३७ ॥

महातपा घोरतपा अदीनो दीनसाधकः ।
संवत्सरकरो मन्त्रः प्रमाणं परमं तपः ॥ ३८ ॥

योगी योज्यो महाबीजो महारेता महातपाः ।
सुवर्णरेताः सर्वज्ञः सुबीजो वृषवाहनः ॥ ३९ ॥

दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ।
विश्वरूपः स्वयंश्रेष्ठो बलवीरो बलो गणः ॥ ४० ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

गणकर्ता गणपतिर्दिग्वासाः काम्य एव च ।
पवित्रं परमं मन्त्रं सर्वभावकरो हरः ॥ ४१ ॥

कमण्डलुधरो धन्वी वाणहस्तः कपालवान् ।
अशनी शतघ्नी खड्गी पट्टिशी चायुधी महान् ॥ ४२ ॥

स्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः ।
उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा ॥ ४३ ॥

दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ।
सृगालरूपः सर्वार्थो मुण्डः कुण्डी कमण्डलुः ॥ ४४ ॥

अजश्च मृगरूपश्च गन्धधारी कपर्द्यपि ।
ऊर्ध्वरेता ऊर्ध्वलिङ्ग उर्ध्वशायी नभस्तलः ॥ ४५ ॥

त्रिजटश्चीरवासाश्च रुद्रः सेनापतिर्विभुः ।
अहश्चरोऽथ नक्तं च तिग्ममन्युः सुवर्चसः ॥ ४६ ॥

गजहा दैत्यहा लोको लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च आर्द्रचर्माम्बरावृतः ॥ ४७ ॥

कालयोगी महानादः सर्ववासश्चतुष्पथः ।
निशाचरः प्रेतचारी भूतचारी महेश्वरः ॥ ४८ ॥

बहुभूतो बहुधनः सर्वाधारोऽमितो गतिः ।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलासकः ॥ ४९ ॥

घोरो महातपाः पाशो नित्यो गिरिचरो नभः ।
सहस्रहस्तो विजयो व्यवसायो ह्यनिन्दितः ॥ ५० ॥

अमर्षणो मर्षणात्मा यज्ञहा कामनाशनः ।
दक्षयज्ञापहारी च सुसहो मध्यमस्तथा ॥ ५१ ॥

तेजोपहारी बलहा मुदितोऽर्थो जितो वरः ।
गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः ॥ ५२ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ।
तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित् ॥ ५३ ॥

विष्णुप्रसादितो यज्ञः समुद्रो वडवामुखः ।
हुताशनसहायश्च प्रशान्तात्मा हुताशनः ॥ ५४ ॥

उग्रतेजा महातेजा जयो विजयकालवित् ।
ज्योतिषामयनं सिद्धिः संधिर्विग्रह एव च ॥ ५५ ॥

शिखी दण्डी जटी ज्वाली मूर्तिजो मूर्धगो बली ।
वैणवी पणवी ताली कालः कालकटंकटः ॥ ५६ ॥

नक्षत्रविग्रहविधिर्गुणवृद्धिर्लयोऽगमः ।
प्रजापतिर्दिशावाहुर्विभागः सर्वतोमुखः ॥ ५७ ॥

विमोचनः सुरगणो हिरण्यकवचोद्भवः ।
मेढ्रजो बलचारी च महाचारी स्तुतस्तथा ॥ ५८ ॥

सर्वतूर्यनिनादी च सर्ववाद्यपरिग्रहः ।
व्यालरूपो विलावासी हेममाली तरंगवित् ॥ ५९ ॥

त्रिदशस्त्रिकालधृक्कर्म सर्वबन्धविमोचनः ।
बन्धनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ॥६० ॥

सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागश्च अतुल्यो यज्ञभागवित् ॥ ६१ ॥

सर्वावासः सर्वचारी दुर्वासा वासवोऽमरः ।
हेमो हेमकरो यज्ञः सर्वधारी धरोत्तमः ॥ ६२ ॥

लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः ।
संग्रहो निग्रहः कर्ता सर्पचीरनिवासनः ॥ ६३ ॥

मुख्योऽमुख्यश्च देहश्च देहर्द्धिः सर्वकामदः ।
सर्वकालप्रसादश्च सुबलो बलरूपधृक् ॥ ६४ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आकाशनिधिरूपश्च निपाती उरगः खगः ।
रौद्ररूपोंऽशुरादित्यो वसुरश्मिः सुवर्चसी ॥ ६५ ॥

वसुवेगो महावेगो मनोवेगो निशाचरः ।
सर्वावासी श्रियावासी उपदेशकरो हरः ॥ ६६ ॥

मुनिरात्मपतिर्लोके संभोज्यश्च सहस्रदः ।
पक्षी च पक्षिरूपी च अतिदीप्तो विशां पतिः ॥ ६७ ॥

उन्मादो मदनाकारो अर्थार्थकररोमशः ।
वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ॥ ६८ ॥

सिद्धयोगापहारी च सिद्धः सर्वार्थसाधकः ।
भिक्षुश्च भिक्षुरूपश्च विषाणी मृदुरव्ययः ॥ ६९ ॥

महासेनो विशाखश्च षष्टिभागो गवां पतिः ।
वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च ॥ ७० ॥

ऋतुर्ऋतुकरः कालो मधुर्मधुकरोऽचलः ।
वानस्पत्यो वाजसेनो नित्यमाश्रमपूजितः ॥ ७१ ॥

ब्रह्मचारी लोकचारी सर्वचारी सुचारवित् ।
ईशान ईश्वरः कालो निशाचारी पिनाकधृक् ॥ ७२ ॥

नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्धनः ।
भगस्याक्षिनिहन्ता च कालो ब्रह्मविदां वरः ॥ ७३ ॥

चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ।
लिङ्गाध्यक्षः सुराध्यक्षो लोकाध्यक्षो युगावहः ॥ ७४ ॥

बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः ।
इताहासकरः कल्पो गौतमोऽथ जलेश्वरः ॥ ७५ ॥

दम्भो ह्यदम्भो वैदम्भो वश्यो वश्यकरः कविः ।
लोककर्ता पशुपतिर्महाकर्ता महौषधिः ॥ ७६ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अक्षरं परमं ब्रह्म बलवाञ्शक्र एव च ।
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो मनोगतिः ॥ ७७ ॥

बहुप्रसादः स्वपनो दर्पणोऽथ त्वमित्रजित् ।
वेदकारः सूत्रकारो विद्वान्समरदर्शनः ॥ ७८ ॥

महामेघनिवासी च महाघोरो वशीकरः ।
अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः ॥ ७९ ॥

वृषणः शंकरो नित्यो वर्चस्वी धूमकेतनः ।
नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः ॥८० ॥

स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः ।
उत्सङ्गश्च महाङ्गश्च महागर्भः परो युवा ॥ ८१ ॥

कृष्णवर्णः सुवर्णश्च इन्द्रियः सर्वदेहिनाम् ।
महापादो महाहस्तो महाकायो महायशाः ॥ ८२ ॥

महामूर्धा महामात्रो महानेत्रो दिगालयः ।
महादन्तो महाकर्णो महामेढ्रो महाहनुः ॥ ८३ ॥

महानासो महाकम्बुर्महाग्रीवः श्मशानधृक् ।
महावक्षा महोरस्को अन्तरात्मा मृगालयः ॥ ८४ ॥

लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः ।
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः ॥ ८५ ॥

महानखो महारोमा महाकेशो महाजटः ।
असपत्नः प्रसादश्च प्रत्ययो गिरिसाधनः ॥ ८६ ॥

स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ॥ ८७ ॥

मण्डली मेरुधामा च देवदानवदर्पहा ।
अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः ॥ ८८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यजुःपादभुजो गुह्यः प्रकाशो जङ्गमस्तथा ।
अमोघार्थः प्रसादश्च अभिगम्यः सुदर्शनः ॥ ८९ ॥

उपहारप्रियः शर्वः कनकः काञ्चनः स्थिरः ।
नाभिर्नन्दिकरो भाव्यः पुष्करस्थपतिः स्थिरः ॥ ९० ॥

द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः ।
नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥ ९१ ॥

सगणो गणकारश्च भूतभावनसारथिः ।
भस्मशायी भस्मगोप्ता भस्मभूतस्तरुर्गणः ॥ ९२ ॥

अगणश्चैव लोपश्च महात्मा सर्वपूजितः ।
शङ्कुस्त्रिशङ्कुः संपन्नः शुचिर्भूतनिषेवितः ॥ ९३ ॥

आश्रमस्थः कपोतस्थो विश्वकर्मा पतिर्वरः ।
शाखो विशाखस्ताम्रोष्ठो ह्यम्बुजालः सुनिश्चयः ॥ ९४ ॥

कपिलोऽकपिलः शूर आयुश्चैव परोऽपरः ।
गन्धर्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुसारथिः ॥ ९५ ॥

परश्वधायुधो देव अर्थकारी सुबान्धवः ।
तुम्बवीणी महाकोप ऊर्ध्वरेता जलेशयः ॥ ९६ ॥

उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दितः ।
सर्वाङ्गरूपो मायावी सुहृदो ह्यनिलोऽनलः ॥ ९७ ॥

बन्धनो बन्धकर्ता च सुबन्धनविमोचनः ।
स यज्ञारिः स कामारिर्महादंष्ट्रो महायुधः ॥ ९८ ॥

बाहुस्त्वनिन्दितः शर्वः शंकरः शंकरोऽधनः ।
अमरेशो महादेवो विश्वदेवः सुरारिहा ॥९९ ॥

अहिर्बुध्नो निर्ऋतिश्च चेकितानो हरिस्तथा ।
अजैकपाच्च कापाली त्रिशङ्कुरजितः शिवः ॥१०० ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥ १०१ ॥

प्रभावः सर्वगो वायुरर्यमा सविता रविः ।
उदग्रश्च विधाता च मान्धाता भूतभावनः ॥ १०२ ॥

रतितीर्थश्च वाग्मी च सर्वकामगुणावहः ।
पद्मगर्भो महागर्भश्चन्द्रवक्त्रो मनोरमः ॥ १०३ ॥

बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी ।
कुरुकर्ता कालरूपी कुरुभूतो महेश्वरः ॥ १०४ ॥

सर्वाशयो दर्भशायी सर्वेषां प्राणिनां पतिः ।
देवदेवमुखोऽसक्तः सदसत्सर्वरत्नवित् ॥ १०५ ॥

कैलासशिखरावासी हिमवद्गिरिसंश्रयः ।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः ॥ १०६ ॥

वणिजो वर्धनो वृक्षो नकुलश्चन्दनश्छदः ।
सारग्रीवो महाजत्रुरलोलश्च महौषधः ॥ १०७ ॥

सिद्धार्थकारी सिद्धार्थश्छन्दोव्याकरणोत्तरः ।
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ॥ १०८ ॥

प्रभावात्मा जगत्कालस्तालो लोकहितस्तरुः ।
सारङ्गो नवचक्राङ्गः केतुमाली सभावनः ॥ १०९ ॥

भूतालयो भूतपतिरहोरात्रमनिन्दितः ।
वाहिता सर्वभूतानां निलयश्च विभुर्भवः ॥ ११० ॥

अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः ।
धृतिमान्मतिमान्दक्षः सत्कृतश्च युगाधिपः ॥ १११ ॥

गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरः ।
हिरण्यबाहुश्च तथा गुहापालः प्रवेशिनाम् ॥ ११२ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रतिष्ठायी महाहर्षो जितकामो जितेन्द्रियः ।
गन्धारश्च सुरालश्च तपः कर्मरतिर्धनुः ॥ ११३ ॥

महागीतो महानृत्तो ह्यप्सरोगणसेवितः ।
महाकेतुर्धनुर्धातुर्नैकसानुचरश्चलः ॥ ११४ ॥

आवेदनीय आवेशः सर्वगन्धसुखावहः ।
तोरणस्तारणो वायुः परिधावति चैकतः ॥ ११५ ॥

संयोगो वर्धनो वृद्धो महावृद्धो गणाधिपः ।
नित्य आत्मसहायश्च देवासुरपतिः पतिः ॥ ११६ ॥

युक्तश्च युक्तबाहुश्च द्विविधश्च सुपर्वणः ।
आषाढश्च सुषाढश्च ध्रुवो हरिहणो हरः ॥ ११७ ॥

वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथः ।
शिरोहारी विमर्षश्च सर्वलक्षणभूषितः ॥ ११८ ॥

अक्षश्च रथयोगी च सर्वयोगी महाबलः ।
समाम्नायोऽसमाम्नायस्तीर्थदेवो महारथः ॥ ११९ ॥

निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः ।
रत्नप्रभूतो रक्ताङ्गो महार्णवनिपानवित् ॥ १२० ॥

मूलो विशालो ह्यमृतो व्यक्ताव्यक्तस्तपोनिधिः ।
आरोहणो निरोहश्च शैलहारी महातपाः ॥ १२१ ॥

सेनाकल्पो महाकल्पो युगायुगकरो हरिः ।
युगरूपो महारूपः पवनो गहनो नगः ॥ १२२ ॥

न्यायनिर्वापणः पादः पण्डितो ह्यचलोपमः ।
बहुमालो महामालः सुमालो बहुलोचनः ॥ १२३ ॥

विस्तारो लवणः कूपः कुसुमः सफलोदयः ।
वृषभो वृषभाङ्काङ्गो मणिबिल्वो जटाधरः ॥ १२४ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इन्दुर्विसर्गः सुमुखः सुरः सर्वायुधः सहः ।
निवेदनः सुधाजातः सुगन्धारो महाधनुः ॥ १२५ ॥

गन्धमाली च भगवानुत्थानः सर्वकर्मणाम् ।
मन्थानो बहुलो बाहुः सकलः सर्वलोचनः ॥ १२६ ॥

तरस्ताली करस्ताली ऊर्ध्वसंहननो वहः ।
छत्रं सुच्छत्रो विख्यातः सर्वलोकाश्रयो महान् ॥ १२७ ॥

मुण्डो विरूपो विकृतो दण्डिमुण्डो विकुर्वणः ।
हर्यक्षः ककुभो वज्री दीप्तजिह्वः सहस्रपात् ॥ १२८ ॥

सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः ।
सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ॥ १२९ ॥

पवित्रं त्रिमधुर्मन्त्रः कनिष्ठः कृष्णपिङ्गलः ।
ब्रह्मदण्डविनिर्माता शतघ्नी शतपाशधृक् ॥ १३० ॥

पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ।
गभस्तिर्वह्मकृद्ब्रह्मा ब्रह्मविद्ब्राह्मणो गतिः ॥ १३१ ॥

अनन्तरूपो नैकात्मा तिग्मतेजाः स्वयंभुवः ।
ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ॥ १३२ ॥

चन्दनी पद्ममालाग्र्यः सुरभ्युत्तरणो नरः ।
कर्णिकारमहास्रग्वी नीलमौलिः पिनाकधृक् ॥ १३३ ॥

उमापतिरुमाकान्तो जाह्नवीधृगुमाधवः ।
वरो वराहो वरदो वरेशः सुमहास्वनः ॥ १३४ ॥

महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ।
प्रीतात्मा प्रयतात्मा च संयतात्मा प्रधानधृक् ॥ १३५ ॥

सर्वपार्श्वसुतस्तार्क्ष्यो धर्मसाधारणो वरः ।
चराचरात्मा सूक्ष्मात्मा सुवृषो गोवृषेश्वरः ॥ १३६ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

साध्यर्षिर्वसुरादित्यो विवस्वान्सविता मृडः ।
व्यासः सर्वस्य संक्षेपो विस्तरः पर्ययो नयः ॥ १३७ ॥

ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः ।
कला काष्ठा लवो मात्रा मुहूर्तोऽहः क्षपाः क्षणाः ॥ १३८ ॥

विश्वक्षेत्रं प्रजाबीजं लिङ्गमाद्यस्त्वनिन्दितः ।
सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ॥ १३९ ॥

स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ।
निर्वाणं ह्लादनं चैव ब्रह्मलोकः परा गतिः ॥ १४० ॥

देवासुरविनिर्माता देवासुरपरायणः ।
देवासुरगुरुर्देवो देवासुरनमस्कृतः ॥ १४१ ॥

देवासुरमहामात्रो देवासुरगणाश्रयः ।
देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ॥ १४२ ॥

देवातिदेवो देवर्षिर्देवासुरवरप्रदः ।
देवासुरेश्वरो देवो देवासुरमहेश्वरः ॥ १४३ ॥

सर्वदेवमयोऽचिन्त्यो देवतात्मात्मसंभवः ।
उद्भिदस्त्रिक्रमो वैद्यो विरजो विरजोम्बरः ॥ १४४ ॥

ईड्यो हस्ती सुरव्याघ्रो देवसिंहो नरर्षभः ।
विबुधाग्रवरः श्रेष्ठः सर्वदेवोत्तमोत्तमः ॥ १४५ ॥

प्रयुक्तः शोभनो वज्र ईशानः प्रभुरव्ययः ।
गुरुः कान्तो निजः सर्गः पवित्रः सर्ववाहनः ॥ १४६ ॥

शृङ्गी शृङ्गप्रियो बभ्रू राजराजो निरामयः ।
अभिरामः सुरगणो विरामः सर्वसाधनः ॥ १४७ ॥

ललाटाक्षो विश्वदेहो हरिणो ब्रह्मवर्चसः ।
स्थावराणां पतिश्चैव नियमेन्द्रियवर्धनः ॥ १४८ ॥

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

सिद्धार्थः सर्वभूतार्थोऽचिन्त्यः सत्यव्रतः शुचिः ।
व्रताधिपः परं ब्रह्म मुक्तानां परमा गतिः ॥ १४९ ॥

विमुक्तो भुक्ततेजाश्च श्रीमाञ्श्रीवर्धनो जगत् ।
यथाप्रधानं भगवानिति भक्त्या स्तुतो मया ॥ १५० ॥

यं न ब्रह्मादयो देवा विदुर्यं न महर्षयः ।
तं स्तव्यमर्च्यं वन्द्यं च कः स्तोष्यति जगत्पतिम् ॥ १५१ ॥

भक्तिमेव पुरस्कृत्य मया यज्ञपतिर्वसुः ।
ततोऽभ्यनुज्ञां प्राप्यैव स्तुतो मतिमतां वरः ॥ १५२ ॥

शिवमेभिः स्तुवन्देवं नामभिः पुष्टिवर्धनैः ।
नित्ययुक्तः शुचिर्भूत्वा प्राप्नोत्यात्मानमात्मना ॥ १५३ ॥

एतद्धि परमं ब्रह्म स्वयं गीतं स्वयंभुवा ।
ऋषयश्चैव देवाश्च स्तुवन्त्येतेन तत्परम् ॥ १५४ ॥

स्तूयमानो महादेवः प्रीयते चात्मनामभिः ।
भक्तानुकम्पी भगवानात्मसंस्थान्करोति तान् ॥ १५५ ॥

तथैव च मनुष्येषु ये मनुष्याः प्रधानतः ।
आस्तिकाः श्रद्दधानाश्च बहुभिर्जन्मभिः स्तवैः ॥ १५६ ॥

जाग्रतश्च स्वपन्तश्च व्रजन्तः पथि संस्थिताः ।
स्तुवन्ति स्तूयमानाश्च तुष्यन्ति च रमन्ति च ।
जन्मकोटिसहस्रेषु नानासंसारयोनिषु ॥ १५७ ॥

जन्तोर्विशुद्धपापस्य भवे भक्तिः प्रजायते ।
उत्पन्ना च भवे भक्तिरनन्या सर्वभावतः ॥ १५८ ॥

कारणं भावितं तस्य सर्वमुक्तस्य सर्वतः ।
एतद्देवेषु दुष्प्रापं मनुष्येषु न लभ्यते ॥ १५९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निर्विघ्ना निश्चला रुद्रे भक्तिरव्यभिचारिणी ।
तस्यैव च प्रसादेन भक्तिरुत्पद्यते नृणाम् ।
यया यान्ति परां सिद्धिं तद्भावगतचेतसः ॥ १६० ॥

ये सर्वभावोपगताः परत्वेनाभवन्नराः ।
प्रपन्नवत्सलो देवः संसारात्तान्समुद्धरेत् ॥ १६१ ॥

एवमन्ये न कुर्वन्ति देवाः संसारमोचनम् ।
मनुष्याणां महादेवादन्यत्रापि तपोबलात् ॥ १६२ ॥

इति तेनेन्द्रकल्पेन भगवान्सदसत्पतिः ।
कृत्तिवासाः स्तुतः कृष्ण तण्डिना शुद्धबुद्धिना ॥ १६३ ॥

स्तवमेतं भगवतो ब्रह्मा स्वयमधारयत् ।
ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे ॥ १६४ ॥

यं न ब्रह्मादयो देवा विदुर्यं न महर्षयः ।
मृत्युः प्रोवाच रुद्राणां रुद्रेभ्यस्तण्डिमागमत् ।
महता तपसा प्राप्तं तण्डिना ब्रह्मसद्मनि ॥ १६५ ॥

तण्डिः प्रोवाच शुक्राय गौतमायाह भार्गवः ।
वैवस्वताय मनवे गौतमः प्राह माधव ॥ १६६ ॥

नारायणाय साध्याय मनुरिष्टाय धीमते ।
यमाय प्राह भगवान्साध्यो नारायणोऽच्युतः ॥ १६७ ॥

नाचिकेताय भगवानाह वैवस्वतो यमः ।
मार्कण्डेयाय वार्ष्णेय नाचिकेतोऽभ्यभाषत ॥ १६८ ॥

मार्कण्डेयान्मया प्राप्तं नियमेन जनार्दन ।
तवाप्यहममित्रघ्न स्तवं दद्म्यद्य विश्रुतम् ।
स्वर्ग्यमारोग्यमायुष्यं धन्यं बल्यं तथैव च ॥ १६९ ॥

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

न तस्य विघ्नं कुर्वन्ति दानवा यक्षराक्षसाः ।
पिशाचा यातुधानाश्च गुह्यका भुजगा अपि ॥ १७० ॥

यः पठेत शुचिर्भूत्वा ब्रह्मचारी जितेन्द्रियः ।
अभग्नयोगो वर्षं तु सोऽश्वमेधफलं लभेत् ॥ १७१ ॥

इति श्रीमहाभारते अनुशासनपर्वणि सप्रदशोऽध्यायः ॥ १७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

II महाभारत नीलकंठी

वासुदेव उवाच ॥

ततः स प्रयतो भूत्वा मम तात युधिष्ठिर ।
प्रांजलिः प्राह विप्रर्षिर्नामसंग्रहमादितः ॥ १ ॥[1]

उपमन्युरुवाच ॥

ब्रह्मप्रोक्तैर्ऋषिप्रोक्तैर्वेदवेदांगसंभवैः ।
सर्वलोकेषु विख्यातं स्तुत्यं स्तोष्यामि नामभिः ॥ २ ॥

महद्भिर्विहितैः सत्यैः सिद्धैः सवार्थसाधकैः ।
ऋषिणा तंडिना भक्त्या कृतैर्वेदकृतात्मना ॥ ३ ॥[2]

यथोक्तैः साधुभिःख्यातैर्मुनिभिस्तत्त्वदर्शिभिः ।
प्रवरं प्रथमं स्वर्ग्यं सर्वभूतहितं शुभम् ॥ ४ ॥[3]

श्रुतैः सर्वत्र जगति ब्रह्मलोकावतारितैः ।
सत्यैस्तत्परमं ब्रह्म ब्रह्मप्रोक्तं सनातनम् ॥ ५ ॥[4]

वक्ष्ये यदुकुलश्रेष्ठ शृणुष्वावहितो मम ।
वरयैनं भवं देवं भक्तस्त्वं परमेश्वरम् ॥ ६ ॥[5]

---

१. तत इति ।
२. सत्यैरन्वर्थैः वेदे कृतात्मना दत्तचित्तेन कृतैः वेदात्पृथक्कृतैः ।
३. यथोक्तैरिति । स्तुत्यं सिंहावलोकनन्यायेन विशिनष्टि प्रवरमित्यर्धेन ।
४. श्रुतैरिति । ब्रह्मप्रोक्तैः वेदोक्तैः ।
५. वरय प्रार्थय उपसन्नो भव एनं मंत्रात्मकमीश्वरं लब्धुं ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

तेन ते श्रावयिष्यामि यत्तद्ब्रह्मसनातनम् ।
न शक्यं विस्तरात्कृत्स्नं वक्तुं सर्वस्य केनचित् ॥ ७ ॥[१]

युक्तेनापि विभूतीनामपि वर्षशतैरपि ।
यस्यादिर्मध्यमंतं च सुरैरपि न गम्यते ॥ ८ ॥[२]

कस्तस्य शक्नुयाद्वक्तुं गुणान्कार्त्स्न्येन माधव ।
किंतु देवस्य महतः संक्षिप्तार्थपदाक्षरम् ॥ ९ ॥

शक्तितश्चरितं वक्ष्ये प्रसादात्तस्य धीमतः ।
अप्राप्य तु ततोऽनुज्ञां न शक्यःस्तोतुमीश्वरः ॥ १० ॥

यदा तेनाभ्यनुज्ञातः स्तुतो वै स तदा मया ।
अनादिनिधनस्याहं जगद्योनेर्महात्मनः ॥ ११ ॥

नाम्नां कंचित्समुद्देशं वक्ष्याम्यव्यक्तयोनिनः ।
वरदस्य वरेण्यस्य विश्वरूपस्य धीमतः ॥ १२ ॥[३]

शृणु नाम्नां चयं कृष्ण यदुक्तं पद्मयोनिना ।
दशनामसहस्राणि यान्याह प्रपितामहः ॥ १३ ॥

तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतम् ।
गिरेः सारं यथा हेम पुष्पसारं यथा मधु ॥ १४ ॥

घृतात्सारं यथा मंडस्तथैतत्सारमुद्धृतम् ।
सर्वपापापहमिदं चतुर्वेदसमन्वितम् ॥ १५ ॥

प्रयत्नेनाधिगंतव्यं धार्यं च प्रयतात्मना ।
मांगल्यं पौष्टिकं चैव रक्षोघ्नं पावनं महत् ॥ १६ ॥

---

१. तेन विधिना ।

२. युक्तेन सन्नद्धेन ।

३. योनिनः योनेः ब्रह्मण इतिशेषः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इदं भक्ताय दातव्यं श्रद्दधानास्तिकाय च।
नाश्रद्दधानरूपाय नास्तिकायाजितात्मने ॥ १७ ॥

यश्चाभ्यसूयते देवं कारणात्मानमीश्वरम्।
स कृष्ण नरकं याति सहपूर्वैः सहात्मजैः ॥ १८ ॥

इदं ध्यानमिदं योगमिदं ध्येयमनुत्तमम्।
इदं जप्यमिदं ज्ञानं रहस्यमिदमुत्तमम् ॥ १९ ॥[1]

यं ज्ञात्वा अंतकालेऽपि गच्छेत परमां गतिम्।
पवित्रं मंगलं मेध्यं कल्याणमिदमुत्तमम् ॥ २० ॥[2]

इदं ब्रह्मा पुरा कृत्वा सर्वलोकपितामहः।
सर्वस्तवानां राजत्वे दिव्यानां समकल्पयत् ॥ २१ ॥

तदाप्रभृति चैवायमीश्वरस्य महात्मनः।
स्तवराज इति ख्यातो जगत्यमरपूजितः ॥ २२ ॥

ब्रह्मलोकादयं स्वर्गे स्तवराजोऽवतारितः।
यतस्तंडिः पुरा प्राप तेन तंडिकृतोऽभवत् ॥ २३ ॥

स्वर्गाच्चैवात्र भूलोकं तंडिना ह्यवतारितः।
सर्वमंगलमांगल्यं सर्वपापप्रणाशनम् ॥ २४ ॥एॐ

निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम्।
ब्रह्मणामपि यद्ब्रह्म पराणामपि यत्परम् ॥ २५ ॥[3]

तेजसामपि यत्तेजस्तपसामपि यत्तपः।
शांतानामपि यः शांतो द्युतीनामपि या द्युतिः ॥ २६ ॥[4]

---

१. इदमिति। एतज्जप एव ध्यानादिफलप्रद इत्यर्थः।

२. यं स्तवं सकृदधिगमेनाप्यस्य परमां गतिं गच्छेतैवेत्यर्थः पवित्रं पापनाशकं मेध्यं यज्ञादिफलप्रदं मंगलमभ्युदयकरं उत्तमं कल्याणं परमानंदरूपं।

३. ब्रह्मणां वेदानां वाचामपि यो वागित्यर्थः। पराणामिंद्रियार्थमनाबुद्धिमहदव्यक्तानामपि यःपरः पुरुष इत्यर्थः।

४. तेजसां चक्षुरादीनामपि यच्चक्षुः। तपसां पुण्यानां गंगादीनामपि यत्पुण्यं

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

दान्तानामपि यो दान्तो धीमतामपि या च धीः ।
देवानामपि यो देव ऋषीणामपि यस्त्वृषिः ।। २७ ।।[1]

यज्ञानामपि यो यज्ञः शिवानामपि यः शिवः ।
रुद्राणामपि यो रुद्रः प्रभा प्रभवतामपि ।। २८ ।।[2]

योगिनामपि यो योगी कारणानां च कारणम् ।
यतो लोकाः संभवंति न भवंति यतः पुनः ।। २९ ।।[3]

सर्वभूतात्मभूतस्य हरस्यामिततेजसः ।
अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु ।
यच्छ्रुत्वा मनुजव्याघ्र सर्वान्कामानवाप्स्यसि ।। ३० ।।

स्थिरः स्थाणुः प्रभुर्भीमः प्रवरो वरदो वर ।
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः१२ ।। ३१ ।।[4]

शान्तानामुपरतचित्तानामपि आत्यंतिकी उपरतिर्मोक्षाख्या । द्युतीनां ज्ञानानां वृत्तिरूपाणामपि ज्ञानं साक्षिरूपमनुव्यवसायापरपर्यायं ।

१. दांतानां जितेन्द्रियाणां मध्येऽत्यंतजितेंद्रियः । धीमतां ज्ञानिनां धीः अनुभवरुपं ज्ञानं । देवानां पूज्यानामपि पूज्यः । ऋषीणां काव्यकर्तॄणामपि काव्यकर्ता वेदकर्तृत्वात् ।

२. यज्ञानां यज्ञभोक्तॄणां यज्ञः यज्ञस्य आराधनस्य भोक्ता । शिवानां कल्याणानामपि कल्याणं । रुणद्धि यैनमिति वा रोदित्यनेन वा रौत्यनेन वा रवणं वा रुत् अज्ञानं वा विपर्ययो वा शोको वा दुःखं वा रुतां द्रावयतीति रुद्रः ज्ञानमानंदो वा तेषामप्यानंदः । प्रभवतामीश्वराणामपि प्रभा ऐश्वर्ये ।

३. योगिनां ब्रह्मादीनामपि यो योगी ध्येयसंकल्पमात्रेण स्रष्टा । कारणानामव्यक्तादीनां कारणं निष्कलं ।

४. यद्यप्यत्र सहस्रनामस्तोत्रे नाम्नां शब्दतोऽर्थतश्च पौनरुक्त्यमस्ति तथाऽप्यर्थैक्येपि शब्दभेदात्क्वचित्शब्देऽप्यर्थभेदाच्चापौनरुक्त्यं द्रष्टव्यमपूर्वार्थत्वात् । नहि सर्वात्मपदोच्चारणजन्यमपूर्वं विश्वात्मपदोच्चारणादुत्पद्यते । अन्यथा अग्नये जुष्टं निर्वपामीत्यत्र वह्नयेजुष्टमितिउच्चारणेऽपि तदपूर्वोत्पत्त्यापत्तेर्विधिगत एव शब्दः प्रयोक्तव्य इति मीमांसकमुद्राभंगः स्यात् । अर्थभेदेऽपि शब्दैक्यं न पौनरुक्त्यावहं इंद्र-शब्दस्यान्यार्थस्याप्यैंद्र्या गार्हपत्यमुपतिष्ठते इति विधानाद्योगेनाग्निपरत्वप्रदर्शनात् । तथाच शब्दैक्येऽप्यर्थैक्यं नास्ति तथा वयमस्यां व्याख्यायां प्रदर्शयिष्यामः । तिष्ठतीति स्थिरः तिष्ठंत्यस्मिन्नितिस्थाणुश्च । अजिरशिशिरेत्यादिना स्थाणुरिति च तिष्ठतेः किरच् टिलोपौ नुप्रत्ययश्च विधीयते । स्थिरः अचंचलःकूटस्थःनित्यः १ स्थाणुः गृहस्तंभवत्सर्वाश्रयः यथोक्तं । 'संसारमंडपस्यास्य मूलस्तंभाय शंभवे'इति २ प्रभुः ईश्वरोऽन्तर्यामीत्यर्थः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जटी चर्मी शिखंडी च सर्वांगः सर्वभावनः ।
हरश्च हरिणाक्षश्च सर्वभूतहरःप्रभुः ९ ॥ ३२ ॥[१]

प्रवृत्तिश्च निवृत्तिश्च नियतःशाश्वतो ध्रुवः ।
श्मशानवासी भगवान्खचरो गोचरोऽर्दनः१० ॥ ३३ ॥[२]

प्रकृष्टं भवनं सत्ता यस्येति वा परमार्थसत्य इत्यर्थः प्रकर्षेण भावयति विश्वं रचयति जानाति वा विश्वकर्ता सर्वज्ञो वेत्यर्थः। विप्रसंभ्योड्वसंज्ञायामितिप्रपूर्वाद् भवतेर्डुः। पाचकपाठकादिवद्गुणशब्दोऽयं न तु संज्ञाशब्दः। एवमुत्तरत्रापि ज्ञेयं ३ भीमःसंहर्ता विभेत्यस्माज्जगदितिव्युत्पत्तेः। भीमादयोऽपादाने इति सूत्रात्सिद्धिः ४ प्रवरःश्रेष्ठः प्रकर्षेण भोगमोक्षकामैर्वरणीयः ५ अतएव वरदःइष्टप्रदः। आतोऽनुपसर्गे क इति वरपूर्वाद्ददातेःकः ६ वरःवृणोत्याच्छादयति सर्वमिति वरः पचाद्यच् ७ सर्वात्मा सृतमनेनेति सर्वःस चात्माचेति सर्वात्मा व्यापकःप्रत्यग्रूपःप्राणभृन्मात्रस्यांतरात्मेत्यर्थः। सर्व- निघृष्वेत्यादिना सर्तेर्वन्नंतत्वं निपात्यते। आप्नोति सर्वं भोग्यं स्वार्थत्वेन लभतेआदत्तेस्वीकरोत्यत्ति भुंक्ते अतति सततमेकरूपेण वर्तत इति च आत्मा तथा च स्मृतिः 'यच्चाप्नोति यदादत्ते यच्चात्ति विषया नयं ॥ यच्चास्य संततो भावस्तस्मादात्मेतिगीयते'इति ८ सर्वविख्यातः सर्वत्र देशे काले च सर्वेषां प्राणिनां वा विख्यातः प्रत्यक्त्वेन प्रसिद्धः ९ सर्वःव्यापकः 'सर्वं समाप्नोषि ततोऽसि सर्वः' इतिभगवद्वचनात् १० सर्वंकरोतीति सर्वकरः विश्वस्य कर्ता। एतेन नामद्वयेनोपादानत्वं निमित्तत्वं चोक्तं ११ अतएव भवत्यस्मादनन्यापेक्षाद्विश्वमिति भवत्यस्मिन्प्रलय इति वाभवः सर्वस्योत्पत्तिप्रलयस्थानं। ऋदोरबित्यप् भवत्यस्तीतिसत्तार्थाद्भवतेः पचाद्यच्। सत्तामात्रस्वरूप इत्यर्थः१२।

१. जटी जटझटसंघातेऽस्मात्पचाद्यचि केशानां संघातो जटा तद्वान् १३ चर्मी चर्म व्याघ्रस्य गजस्य वा कृत्तिस्तद्वान् १४ शिखंडी मयूरशिखावत्जटासंनिवेशोपरिकृतो जटाग्रगुच्छःशिखंडस्तद्वान् १५ सर्वं जगदंगमवयवभूतं यस्य स सर्वांगः विराडित्यर्थः १६ सर्वभावनो विश्वकर्ता १७ हरः हरति सर्वं संहरतीति हरः हरतेःपचाद्यच् १८ हरिणाक्षःमृगनेत्रः १९ सर्वाणि भूतानि हरतीतिसर्वभूतहरः। हरतेरनुद्यमनेऽजित्यच् २० प्रभुःप्रकर्षेण भवति प्राप्नोति विश्वं भोग्यत्वेनेति सर्वभोक्ता। पूर्ववड्डुः २१।

२. प्रवृत्तिः प्रकर्षेण कुर्वद्रूपतयावर्तनं प्रवृत्तिः २२ निकर्षेण निरुद्यमतया वर्तनं निवृत्तिः। निपूर्वाद्वृतुवर्तनेऽस्मात्स्त्रियां क्तिन् २३ यतन्ते विषयग्रहणाय स्वयंप्रवर्तंते तानि नियतानि इंद्रियाणि। यतीप्रयत्नेऽस्मात्पचाद्यच्। निगृहीतानि यतानि येन सः नियतस्तपस्वीत्यर्थः २४ शाश्वतःशश्वद्भवः नित्य इत्यर्थः २५ ध्रुवः अचलः २६ श्मशानवासी श्मशानः शवाःमृतजीवाःशेरतेऽस्मिन् पुनरुत्थानवर्जितं शयनं कुर्वन्त्यस्मिन्निति श्मशानं वाराणसी तत्र वस्तुं शीलमस्य स श्मशानवासी। शवदाहस्य तले तु श्मशानशब्दोगौणः। नहि तन्मृतानां देहानां देहिनां वा मृद्भस्मीभूतानां यातनावशानां वा सुषुप्तिवद्विश्रांतिस्थानं देहानां जडत्वेन विश्रांत्यनर्हत्वात् देहिनां शरीरांतधारिणां विश्रांत्यभावात्। वाराणस्यां मृतास्तुपुनःपुनः संसरन्तीति सहस्रशः प्रमाणान्यस्मत्कृतेऽविमुक्तनिरुक्तिसारे द्रष्टव्यानि २७ भगवान् 'ऐश्वर्यस्यसमग्रस्य ज्ञानस्य यशसः श्रियः। वैराग्यस्य च धर्मस्य षण्णां भगइतींगना'- इति

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।
उन्मत्तवेषप्रच्छन्नः सर्वलोकप्रजापतिः ६ ॥ ३४ ॥[१]

महारूपो महाकायो वृषरूपो महायशाः ।
महात्मा सर्वभूतात्मा विश्वरूपो महाहनुः ८ ॥ ३५ ॥[२]

लोकपालोऽन्तर्हितात्मा प्रसादो हयगर्दभिः ।
पवित्रं च महांश्चैव नियमो नियमाश्रितः८ ॥ ३६ ॥[३]

सर्वकर्मा स्वयंभूत आदिरादिकरो निधिः ।
सहस्राक्षो विशालाक्षः सोमो नक्षत्रसाधकः ९ ॥ ३७ ॥[४]

स्मृतानि भगानि विद्यंतेऽस्मिन्निति भगवान् २८ खचरः हार्दाकाशचारी। दहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं शंभुराकाशमध्य इति श्रुतिप्रसिद्धः चरेष्टः २९ गोचरः गोषु इंद्रियेषु विषयतया चरतीति वा गोभिःकरणैर्वा चरति विषयान्भुंक्त इति वा गोचरः। सर्वात्मत्वात्सर्वेंद्रियगम्यः इंद्रियद्वारा विषयभुगिति वार्थः ३० अर्दयति जनं पापिनं पीडयति कालांतकरुपेणेत्यर्दनः। नंद्यादित्वाल्ल्युः ३१ ।

१. अभिवाद्यः सर्वेषां नमस्कार्यः प्रच्छन्नो दुर्ज्ञेयः ३६ लोकाः स्थानानि प्रजास्तत्र निवसंतश्चेतनाः सर्वासां लोकप्रजानां पतिः स्वामी ३७ ।

२. महदपरिच्छेद्यं रूपमस्य स महारूपः ३८ महान्कायः स्थूलं रूपं वैराजं यस्य स महाकायः ३९ वृषोधर्मस्तद्रूपो वृषरूपः ४० महच्च तद्यशश्च महायशाः। 'तस्य नाम महद्यशः' इतिश्रुतेः परमेश्वरः४१ महात्मा महामनाः४२ सर्वाणि भूतान्यात्मनः संकल्पमात्रं यस्य स सर्वभूतात्मा तदीक्षणमात्रत्वात्सर्वस्य ४३ विश्वं रूपमस्य विश्वस्मिन्रूपयते प्रकटीभवतीति वा विश्वरूपः ४४ महाहनुःमहत्यौविश्वग्राससमर्थे हनू अधरोत्तरे मुखफलके यस्य स महाहनुः४५ ।

३. लोकपालः इंद्रादिरूपः ४६ अंतर्हितात्मा अविद्याकल्पितेनाहंकारादिनातिरोहिता-खंडैकरसस्वभावः सर्पेणेव रज्जुः ४७ प्रसादः अभिरतिरानंद इति यावत् ४८ हयगर्दभिः हयमश्वं गर्दभी च स्वयोनित्वेनआचक्षते ता अश्वगर्दभ्यः अश्वतर्यःताः रथस्थंवहंत्येनमिति हयगर्दभिः। क्विबंतात्कर्तरिक्विप् तत इञ्वृद्ध्यभावश्चार्षः। 'रुद्रो वा एष यदग्निः। अश्वतरी रथेनाग्निराजि मधावत्' इतिश्रुतिभ्यामग्निरूपी देवोऽश्वतरी रथवाहन इति गम्यते ४९ पवित्रं पवेरिव पवेः संसारवज्रपातात्त्रायत इति पवित्रं ५० अतएव महान्पूज्यः५१ नियमः शौचसंतोषतपः स्वाध्यायेश्वरप्रणिधानाख्यैर्नियमैःप्राप्यते इति नियमः ५२ नियमैस्तैरेव आश्रितः नारायणदक्षिणामूर्त्यादिरूपेण नियमानामाश्रयभूत इत्यर्थः५३ ।

४. सर्वकर्मा सकलशिल्पाचार्यो विश्वकर्मा ५४ स्वयंभूतः नित्यसिद्धः ५५ अतएव आदिःसर्वस्मात्प्रथमः५६ आदिकरः हिरण्यगर्भस्त्रष्टा। स वै शरीरी प्रथम इति श्रुतेस्तस्यादित्वं ५७ निधिःपद्मशंखादिरूपोऽक्षयैश्वर्य इत्यर्थः ५८ सहस्राक्षः अनंतकरचरणादिमान् 'सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखं' इत्यादिशास्त्रात्। देवेंद्रो वा सर्वस्य तदभिन्नत्वात्। ब्रह्मैवेदंसर्वमित्यादिश्रुतेः५९ विशालानि अतीतादिप्रकाशकत्वेन विपुलान्यक्षाणि इंद्रियाणि

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

चंद्रः सूर्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः ।
अत्रिरत्र्या नमस्कर्ता मृगबाणार्पणोऽनघः ११ ॥ ३८ ॥[1]

महातपा घोरतपा अदीनो दीनसाधकः ।
संवत्सरकरो मंत्रः प्रमाणं परमं तपः ८ ॥ ३९ ॥[2]

योगी योज्यो महाबीजो महारेता महाबलः ।
सुवर्णरेताः सर्वज्ञः सुबीजो बीजवाहनः९ ॥ ४० ॥[3]

यस्य स विशालाक्षः ६० सोमश्चंद्रः लतारूपं यज्ञियं हविर्वा। यत्पुरुषेण हविषेति तस्यैवहविष्ट्वदर्शनात् ६१ नक्षत्रसाधकः। 'सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणि' इति श्रुतेराकाशे दीप्यमानानि शरीराणि नक्षत्राणि तेषां साधकः इष्टादिकारिणां सोमलोके दिव्यशरीरलाभस्य दर्शनात् ६२ ।

१. चंद्रः ६३ सूर्यः ६४ शनिः ६५ केतुश्चप्रसिद्धः ६६ चंद्रार्कौ गृह्णातीति ग्रहो राहुः ६७ ग्रहाणां पतिर्क्रूरत्वान्मंगलः ६८ वरी वरणीयःपूज्यो बृहस्पतिः स एव शुक्रः। बृहस्पतिर्हि शुक्रोभूत्वेति मैत्रायणीश्रुतौ शुक्रस्य बृहस्पत्यवतारत्वश्रवणात् ६९ अत्रिः अत्रिगोत्रापत्यत्वाद्बुधः तेन सर्वग्रहस्वरूपीत्यर्थः ७० अत्र्याः अत्रिपत्न्याः अनसूयायाः नमस्कर्ता दत्तदुर्वासोरूपेण तत्पुत्रत्वात् ७१ मृगवाणार्पणः मृगरूपधारिणि यज्ञे वाणंअर्पयतीति तया ७२ अनघः यज्ञघ्नोऽपि निष्पापः तेजीयस्त्वात्स्वतंत्रत्वाच्च ७३ ।

२. महद्विश्वसृष्टिक्षमं तप आलोचनं यस्य स महातपाः 'स ऐक्षत लोकानुसृजा इति स इमांल्लोकानसृजत' इतिश्रुतेः७४ घोरं विश्वसंहारक्षमं तपो यस्येतिघोरतपाः। 'यो ह्येव प्रभवः स एवाप्यवः' इतिश्रुतेः ७५ अदीनः महामनाः सुग्रीवविभीषणादिभ्यः प्रणतिमात्रेण राज्यप्रदः ७६ दीनसाधकः दीनानां शरणागतानामिष्टसाधकः ७७ संवत्सरस्य करः कर्ता कालचक्रप्रवर्तको ध्रुवादिज्योतिर्गणरूपः७८ मंत्रःमननान्त्रायत इति प्रणवादिरूपः७९ प्रमाणं वेदशास्त्रादिरूपः८० परमं तपः 'अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्' इतियाज्ञवल्क्योक्तो धर्मः८१ ।

३. योगी योगनिष्ठः ८२ योज्यो योगे ब्रह्मणि प्रविलापनीयः८३ महाबीजः कारणस्यापि कारणं ८४ महारेताः महत् जडानृतस्यापि अव्यक्तस्य स्फूर्तिसत्ताप्रदं रेतः प्रतिबिंबो यस्य स महारेताः८५ अतएव महाबलः उत्कृष्टसामर्थ्यः ८६ सुवर्णरेताः 'अतएव ससर्जाग्रे तासु वीर्यमवासृजत्। तदंडमभवद्धैमं सहस्रांशुसमप्रभम्' इति स्कांदात्हिरण्यमयब्रह्मांडस्रष्टा अग्निरूपेण सुवर्णरेता एव वा ८७ सर्वज्ञः मायावृत्त्या सर्वं जानन्सर्वश्चासौज्ञश्चेति वा ८८ सुबीजः सुष्ठु अविकारी बीजभूतःसर्वकारणं भवतीत्यर्थः ८९ बीजवाहनः बीजं अविद्याकामकर्मात्मकं तदेव वाहनं इहलोकपरलोके संचारार्थे यस्येति तथा यथोक्तम् 'आत्मानं रथिनं विद्धि शरीरं रथमेव तु' इति शरीरपदमत्राव्यक्तपरमितिसिद्धांतः९० ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

दशबाहुस्त्वनिमिषो नीलकंठ उमापतिः ।
विश्वरूपः स्वयंश्रेष्ठो बलवीरोऽबलोगणः ८ ॥ ४१ ॥[१]

गणकर्ता गणपतिर्दिग्वासाःकाम एव च ।
मंत्रवित्परमो मंत्रः सर्वभावकरो हरः ९ ॥ ४२ ॥[२]

कमंडलुधरो धन्वी बाणहस्तः कपालवान् ।
अशनी शतघ्नी खड्गी पट्टिशी चायुधी महान् १० ॥ ४३ ॥[३]

---

१. दशवाहुःस्पष्टम् ९१ अनिमिषो 'नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्' इतिश्रुतेःक्षणमपि दृग्लोपहीनः ९२ नीलकंठःत्रैलोक्यसंहारक्षमस्य हालाहलस्य कण्ठे धारणान्नीलकण्ठः परमकारुणिकः ९३ अतएव उमापतिः उमा हैमवतीति केनोपनिपत्प्रसिद्धा ब्रह्मविद्या उमा तस्याःपतिःप्रदाता पक्षे पार्वतीशः ९४ विश्वानि रूपाणि यस्माज्जायंते स विश्वरूपः ९५ स्वयंश्रेष्ठः स्वयमनागंतुकं श्रेष्ठत्वं प्रशस्यतमत्वं यस्य स तथा९६ वलवीरः बलेन सामर्थ्येन वीरो विक्रांतः त्रिपुरपातनाद्यनन्यसाध्यकर्मकर्ता ९७ अवलःनिःसामर्थ्यः चेतनप्रयुक्तिं विना चलनाक्षमः गण्यते संख्यायत इति गणस्तत्त्वसमूहः पंचविंशतिजडतत्त्वात्मेत्यर्थः स्वयं तु षड्विंशः तत्त्वानि च सांख्यसप्तत्यां अव्यक्तं महानहंकारःपंचतन्मात्राणि एकादशेन्द्रियाणि पंचमहाभूतानि पंचविंशो भोक्तेति ९८ ।

२. एवंभूतस्यापि गणस्य कर्ता पतिर्नियंता चेति गणकर्ता ९९ गणपतिश्च उच्यते १०० इति प्रथमं शतकम् । दिग्वासाः दारुकावने मुनिपत्नीमोहनार्थे नग्नत्वं धृतमिति ज्ञेयं वस्तुतस्तु दिशां अनंतानामपि वास इव वासआच्छादकः तथा च श्रुतिः 'ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत्' इति । ईशा ईश्वरेणावास्यमाच्छादनीयमिति १०१ कामःस्मरोऽभिलापो वा तद्रूपः १०२ मंत्रान् इषेत्वादीन्पाठतोऽर्थतश्च वेत्तीति वा तैर्विद्वेदनमस्येति वा मंत्रवित् । 'यस्य ज्ञानमयं तपः । नावेदविन्मनुते तं बृहंतं' इतिश्रुतिभ्याम् १०३ परमो मंत्रः आत्मतत्त्वालोचनरूपो विचारः १०४ तस्य अध्यारोपापवादात्मकत्वात्तदनुगुणं नामद्वयं सर्वभावकरः जगत्कारणमित्यर्थः १०५ हरः तत्रविलापनस्थानं सर्वभावनः हर इति च पूर्वं कालरूपेण सर्वकर्तृत्वसंहर्तृत्वे उक्ते इदानीं तत्त्वदृष्ट्येतिभेदः। तथाहि चतुर्विधः प्रलयः प्राकृतो ब्रह्मावसाने महदंतानां कार्याणां नाशः। दैनंदिनो ब्रह्मदिनावसाने त्रैलोक्यनाशः। नित्योऽस्मदादिसुषुप्तौ सर्वनाशः। एते त्रयः सवीजा इति उत्पत्तिमंतः। आत्यंतिकस्तु तत्त्व- ज्ञानेन सकारणस्य कार्यस्यनाशः पुनरुत्पत्तिहीनो मोक्षाख्य इति शास्त्रप्रसिद्धिः १०६ ।

३. दशबाहुरित्युक्तानां बाहूनामायुधान्याह कमंडलुधरः १०७ धन्वी धनुष्मान् १०८ बाणहस्तः १०९ कपालवान् ब्रह्मणःशिरश्छित्त्वा तत्कपालं धारयतीत्यर्थ ११० अशनिर्वज्रं तद्वान् ११ शतघ्नी शक्तिस्तद्वान् १२ उभयत्र व्रीह्यादिभ्यश्चेतिमत्वर्थीय इनिः खड्गी १३ पट्टिशः खड्गविशेषस्तद्वान् १४ आयुधं स्वस्यासाधारणं शूलं तद्वान्शूलीत्यर्तः १५ महान्पूज्यः १६ ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

स्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः ।
उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा८ ॥ ४४ ॥[१]

दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ।
शृगालरूपः सिद्धार्थो मुंडः सर्वशुभंकरः ८ ॥ ४५ ॥[२]

अजश्च बहुरूपश्च गंधधारी कपर्द्यपि ।
ऊर्ध्वरेता ऊर्ध्वलिंग ऊर्ध्वशायी नभः स्थलः८ ॥ ४६ ॥[३]

---

१. स्रुवो यज्ञपात्रं तद्धस्तः१७ सुरूपः शोभनरूपः१८ तेजस्तेजस्वी १९ तेजस्करो निधिःभक्तानां कांतिप्रदो निधिरिव निधिरनुच्छेद्यः १२० उष्णीषी शिरोवेष्टनवान् २१ सुवक्त्रः २२ उदग्रः ऊर्जितरूपः २३ विनतः विनयवान् २४ ।

२. दीर्घः अत्युच्चः २५ हरिकेशः हरय इंद्रियाण्येव केशाइव केशा रश्मयो यस्य स हरिकेशः इंद्रियद्वारा तत्तदर्थप्रकाशकर्ता । यद्वा हरिश्च कश्च ईशश्च तेषां समाहारः त्रिमूर्तिरित्यर्थः २६ शोभनश्चासौ तीर्थं च सुतीर्थः महागुरुः। क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरस्तस्य वाचकः प्रणवः स पूर्वेषामपि गुरुरितिपतंजलिस्मरणात् २७ कृष्णः 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ॥ तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते'इतिश्रुते- रानंदसन्मात्र इत्यर्थः। ब्रह्मोत्तरखंडे वा गोपशिशुं प्रति महादेवेन तवान्वये सप्तमोऽहं भविष्यामीति वरदानान्महादेवस्यैवावतारः कृष्ण इत्यवगमात् २८ शृगालरूपः वणिजाऽवमानितं ब्राह्मणं प्रायोपविष्टं सांत्वितुमिंद्रेणैतद्रूपं धृतमिति मोक्षधर्मेपूपाख्यायतेऽनेन शृगालरूप इंद्रस्तदभिन्न इत्यर्थः २९ सिद्धार्थः सिद्धा एव ननु साध्या अर्था अर्थनीयाः पदार्था यस्य १३० मुंडःपरिव्राट् ३१ अतएव सर्वशुभंकरः सर्वभूताभयप्रदः ३२ ।

३. अजः अजातः ब्रह्मादिष्वजत्वमापेक्षिकं देवेष्वमरत्ववत् । 'हिरण्यगर्भःसमवर्तताग्रे भूतस्य-जातःपतिरेक आसीत्' ॥ 'विष्णुरित्थापरममस्य विद्वान्जातो बृहन्नभिपातितृतीयं' इति ब्रह्मविष्ण्वादिषुजात इति विशेषणात् । अजाता इत्येनं कश्चिद्भीरुःप्रपद्यते 'रुद्र यत्ते दक्षिणं मुखं तेन मांपाहि'इति रुद्रे एवाजातत्वदर्शनात् ३३ बहुरूपः स्पष्टं ३४ गंधधारी कुंकुमकस्तूर्यादिसुरभिद्रव्यधर्ता ३५ कपर्दी कं जलं पिवतीति कपः ऋतिःसौत्रो धातुःस्पर्धायामैश्वर्ये चास्ति ऋत्स्पर्धनैश्वर्ययोरिति वोपदेवः असमाद्भावे क्विप् ऋतमैश्वर्यं ददातीति ऋद्दः कपश्चासौ ऋद्दश्चेति समासः आद्गुणः कपर्दः महादेवस्य हि जटाजूटेन स्वर्गात्पतंती गंगा प्रथमं पीता पश्चात्भगीरथप्रार्थनया तस्या निर्गमनसामर्थ्यं च दत्तमतःसकपर्दस्तद्वान् महेश्वरः कपर्दी ३६ ऊर्ध्वरेताः अविप्लुतब्रह्मचर्यः ३७ तत्र हेतुः ऊर्ध्वलिंगः अधोलिंगो हि रेतः सिंचति न तूर्ध्वलिंगः ३८ अत्रापि हेतुः ऊर्ध्वशायी उत्तानशयः ३९ एतेन नामत्रयेण उमयाशिवो न ग्रस्तो न च स्पृष्टःयतः असंग इत्यर्थत्रयं दर्शितं एवं सत्यपि नभ एव आकाशशब्दिताशक्तिरेव स्थलं आवासो यस्य स नभः स्थलः यथोक्तमभियुक्तैः 'शक्तिः शरीरमधि दैवतमंतरात्मज्ञानं क्रियाकरणमासनजालमिच्छा ॥ ऐश्वर्यमायतनमावरणानि च त्वं किं किं न यद्भवसि देवि शशांकमौले:' इति १४० ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

त्रिजटी चीरवासाश्च रुद्रः सेनापतिर्विभुः ।
अहश्चरो नक्तंचरस्तिग्ममन्युः सुवर्चसः ९ ॥ ४७ ॥[1]

गजहा दैत्यहा कालो लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च आर्द्रचर्मांबरावृतः ७ ॥ ४८ ॥[2]

कालयोगी महानादः सर्वकामश्चतुष्पथः ।
निशाचरः प्रेतचारी भूतचारी महेश्वरः८ ॥ ४९ ॥[3]

बहुभूतो बहुधरः स्वर्भानुरमितोगतिः ।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलालसः ९ ॥ ५० ॥[4]

घोरो महातपाः पाशो नित्यो गिरिरुहो नभः ।
सहस्रहस्तो विजयो व्यवसायो ह्यतंद्रितः १० ॥ ५१ ॥[5]

---

१. त्रिजटी ४१ चीरवासाः स्पष्टेद्वे ४२ रुद्रः 'प्राणा वाव रुद्रा एते हीदं सर्वं रोदयंति' इतिश्रुतेः सर्वेषां प्राणरूपः ४३ सेनापतिः ४४ विभुर्व्यापी ४५ अहश्चरो देवादिः ४६ नक्तं चरो राक्षसादिस्तदुभयरूपः ४७ तिग्ममन्युः तीक्ष्णक्रोधः ४८ सुवर्चसः सुतरां वर्चोऽध्ययनतपआदिजं तेजो यस्मिन् समासांतोऽच् आर्षः ४९ ।

२. गजहा 'वाराणस्यां पुरा यातो गजरूपी महासुरः । जघ्ने तं कुंजरं भीममधृष्यमपि शंकरः' इति स्कांदे उपाख्यानाद्‌गजासुरहंता १५० दैत्यहा ५१ कालःमृत्युः संवत्सरादिर्वा ५२ लोकधाता लोकानामीश्वरः ५३ गुणानां दीनदयालुत्वज्ञानैश्वर्यादीनामाकरःखनिः ५४ सिंहशार्दूलरूपः सर्वहिंस्रपशुरूपः ५५ आर्द्रचर्म गजकृत्तिस्तदेवांवरं तेनावृतः ५६ ।

३. कालवंचको योगी कालयोगी ५७ महानादः अनाहतध्वनिरूपः स च हंसोपनिपत्प्रसिद्धः ५८ सर्वे कामा विषया अस्मिन्निति सर्वकामः 'अस्मिन्सर्वेकामाः समाहिताः' इतिश्रुतिः ५९ चतुष्पथः चत्वारः उपासनार्थं पंथानोऽस्य स तथा ते च विश्व तैजसप्राज्ञशिवध्यानरूपाः १६० निशाचरः वेतालादिः ६१ प्रेतैर्भूतैश्च सह चरतीति प्रेतचारी ६२ भूतचारी ६३ महेश्वरः इंद्रादिभ्य ईश्वरेभ्यो महान् ६४ ।

४. बहुभूतः 'सच्चत्यच्चाभवदिति सत्यं चानृतं च सत्यमभवत्' इत्यं तेन श्रुतमस्य बहुभवनं ६५ बहुधरः महतः प्रपंचस्य धर्ता ६६ स्वर्भानुःमूलाज्ञानरूपस्तमःशब्दितो राहुः ६७ अमितः अनंतः भूमेत्यर्थः ६८ गतिःमुक्तप्राप्यः ६९ नृत्यप्रियः तांडवेश्वरश्चिदंवरमूर्तिः १७० नित्यः संततः नर्तो नर्तनं यस्य नित्यनर्तः ७१ नर्तकः नर्तयिता ७२ सर्वेपु लालसाप्रीतिरस्य विश्वबंधुरित्यर्थः ७३ ।

५. घोरः शिवस्य द्वे तन्वौ घोराऽन्या क्षुत्तृपादिरघोराऽन्या संतोषादिस्तद्रूपत्वाद्धोरः ७४ महातपः महत्सृष्टिसंहारक्षमं तपआलोचनं यस्य ७५ पाशयति स्वमायया बध्नातीति पाशः ७६ नित्यः ध्वंसरहितः ७७ गिरिरुहः पर्वतारूढः कैलासवासीत्यर्थः ७८ नभः व्योमवदसंगः ७९ सहस्रहस्तः ८० विजयः ८१ व्यवसायो निश्चय उद्योगो वा जयहेतुः ८२ अतएवातंद्रितः तंद्रा तमोमयीवृत्तिः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

अधर्षणो धर्षणात्मा यज्ञहा कामनाशकः ।
दक्षयागापहारी च सुसहो मध्यमस्तथा ७ ॥ ५२ ॥[१]

तेजोपहारी बलहा मुदितोऽर्थो जितोऽवरः ।
गंभीरघोषो गंभीरो गंभीरबलवाहनः ९ ॥ ५३ ॥[२]

न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ।
सुतीक्ष्णदशनश्चैवमहाकायोमहाननः ७ ॥ ५४ ॥[३]

प्रवृत्तिनिरोधिनी तद्रहितः। अनिंदित इति पाठे व्यवसायस्य विशेषणम् १८३ ।

१. अधर्षणः अप्रकंप्यः ८४ धर्षणात्माभयरूपः ८५ यज्ञहा वलियज्ञघ्नः बौद्धावताररूपेण वा यज्ञघ्नः 'विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येव रुद्रस्तस्मै रुद्राय नमोअस्तु' इति मंत्रवर्णेन विष्णवाघनन्यत्वाच्छिवस्य तद्विवक्षयेदमुक्तं ८६ कामनाशकः स्मरस्य भक्तकामप्रदत्वेन इच्छाया वा नाशकः ८७ दक्षयागापहारी स्पष्टं ८८ सुसहः सौम्यः ८९ मध्यम ईषत्सौम्यः १९० ।

२. तेजोऽपहारी अतिक्रूरः ९१ बलहा इंद्ररूपेण बलनामानं दैत्यं हंतीति तथा ९२ मुदितः कारणरूपेण नित्यमानंदयुक्तः ९३ अर्थःधनरूपेणार्थनीयः ९४ अजितःसंग्रामादौ कृष्णेन तु बाणासुरयुद्धे शिवाज्ञयैव शिवो जितो न-स्वबलेन यथा भीष्मेण कृष्णः स्वप्रतिज्ञां समर्थ यताऽनृतः कृतः भक्तपारवश्यदर्शनाय तद्वत् एतच्च पुराणे प्रसिद्धं ९५ अवरः नास्तिवरो वरणीयो यस्मादन्य इत्यवरः ९६ गंभीरघोषो दुन्दुभिसमुद्रादिरूपेण ९७ गंभीरो दुरवगाहतात्पर्यो वेदरूपेण ९८ गंभीरमगाधं परैरनासादिततलं बलं सेना शारीरं सामर्थ्यं वा वाहनं वृषभश्च धर्मरूपी यस्य सः गंभीरबलवाहनः ९९ ।

३. न्यग्रोधरूपः न्यक्नीचैः रोहतीति 'ऊर्ध्वमूलो अवाक्शाखः एषोऽश्वत्थः सनातनः' इति श्रुतिप्रसिद्धः संसारवृक्षः २०० ॥ इति द्वितीयं शतकं ॥ न्यग्रोधः वटरूपः वटनिकटवासी दक्षिणामूर्तिरूप इत्यर्थः। मार्कण्डेयदृष्टो वा एकार्णवस्थो वटस्तच्छायी बालकृष्णरूपी महाविष्णुर्वा १ वृक्षस्य कर्ण इव कर्णः एकदेशः पर्णं तत्र स्थितिर्यस्य स वृक्षकर्णस्थितिः वृक्षकल्पस्थितिरिति पाठे यथैकस्माद्वीजादेको वटस्ततोऽनंतानि बीजानि तेभ्यस्तावंतो वटा इति उत्तरोत्तरवृद्धिमतःकार्यस्यानंत्यं तत्कल्पा तत ईषन्न्यूना स्थितिः संसारवृक्षपालनं यस्य सः न्यूनत्वं ज्ञानेन। भर्जिते बीजे पुनः प्ररोहासंभवादभर्जिते च तस्यानिवार्यत्वादिति सूचयितुं कल्पम्। मार्कण्डेयस्यापि एकार्णवे ब्रह्मण्येकदेशे संसारवटोऽल्पोऽप्यनं- तप्ररोहोस्तीति भगवता स्वमायारूपं वटव्याजेन प्रदर्शितम् अत्र 'शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः। संसारबंधुः सर्वज्ञः परमात्मेति मुख्यतः। नामाष्टकमिदं तस्य प्रतिपादकमीशितुः' इति शैवे। विष्णुपितामहयोरपि शिवादनन्यत्वात्तद्वाचिभिरपि शब्दैः शिव एवाभिधीयत इति दर्शनात्। हरिवंशे कैलासयात्रायाम् 'नामानि तव गोविंद यानि लोके महांति च। तान्येव मम नामानि नात्र कार्या विचारणा' इति शिववचनाच्च। सर्वस्मिन्पुराणे शिवपर्यायैर्विष्णुपर्यायैर्वा एक एव ईश्वरोऽभिधीयते। शिवविष्ण्वोर्भेदमुत्तमानुत्तमभावं च कल्पयतः पाषंडिनः शिरसि पततु वज्रपातः यथोक्तं सूतसंहितायाम् 'ब्रह्माणं केशवं विष्णुं भेदभावेन मोहिताः। पश्यंत्येकं न

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

विष्वक्सेनो हरिर्यज्ञः संयुगापीडवाहनः ।
तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित् ८ ॥ ५५ ॥[1]

विष्णुप्रसादितो यज्ञःसमुद्रो वडवामुखः ।
हुताशनसहायश्च प्रशांतात्मा हुताशनः ७ ॥ ५६ ॥[2]

उग्रतेजा महातेजा जन्यो विजयकालवित् ।
ज्योतिषामयनं सिद्धिः सर्वविग्रह एव च७ ॥ ५७ ॥[3]

जानंति पापंडोपहता जनाः' इति अतएव माता धाता पितामहः रुद्रो बहुशिरा बभ्रूरितिविष्णुनामसु ब्रह्मरुद्रनामानि पठ्यंते। तथा महादेवोऽव्ययो हरिःगणनाथः प्रजापतिरिति शिवनामसु विष्णुप्रजापतिनामानि। इतरेषामितरत्र गौणमुख्यवृत्तिरिति कल्पनाया उदाहृतशैवस्कांद- वाक्यबाधितत्वेनानुत्थानात् 'यो देवानां नामधा एकएव नामानि सर्वाणि यमाविशंति। एकं संतं बहुधा कल्पयंति। एकंसद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुः' इत्याद्यागमबहिर्भूतत्वाच्चैते उपेक्ष्या एवेति दिक् निपुणतरमुपपादितमेतदादिपर्वण्युपोद्धाते २ विभुः विविधरूपेण हरिहरदुर्गागणेशार्काग्निवाय्वादिरूपेण भक्तानामनुग्रहाय भवतीति विभुः ३ सुतीक्ष्णाः अनेकब्रह्मांडचणकचर्वणक्षमा दशना यस्य सुतीक्ष्णदशनः ४ महाकायः ५ महानन इति तदनुगुणे शरीरमुखे अनुवर्णिते ६ ।

१. विष्वक्विषु सर्वतःअंचंति पलायंते यस्य प्रयाणोद्योगे दैत्यानां सेना इति विष्वक्सेनः सर्वतः पूज्यते सेना यस्येति वा अंचु गतिपूजनयोरिति धातुः ७ हरिः गजेन्द्रमोक्षणे आपदं हरतीति हरिः सर्वसंहर्ता वा ८ यज्ञः सृष्टिबीजभूतः तथा च श्रुतिः 'अग्नौ प्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' इति ९ संयुगे संग्रामे आपीड इव आपीडो ध्वजभूतं वाहनं वृषरूपं यस्य वृषरूपो ध्वज एव वाहनमपीत्यर्थः २१० तीक्ष्णतापोऽग्निस्तदात्मा ११ हरयः अतिवेगवाहिनः अश्वा यस्य स हर्यश्वःसूर्यस्तदात्मा १२ सहायःजीवस्य सखा। 'द्वा सुपर्णा सयुजा सखाया' इतिमंत्रवर्णात् १३ कर्मणां दर्शादीनां कालं यथोक्तं वेत्तीतिकर्मकालवित् १४।

२. विष्णुना प्रसादितश्चक्रलाभार्थमिति विष्णुप्रसादितः १५ यज्ञः विष्णुरूपो यज्ञो वै विष्णुः इतिश्रुतेः १६ समुद्रः १७ वडवामुखःवह्विविशेषो यः सामुद्रं जलं नित्यं शोपयति १८ हुताशनसहायो वायुः १९ प्रशांतात्मा निस्तरंगसागरस्वरूपः २२० हुताशनोऽग्निः २१ ।

३. स एव उग्रतेजाःदुःसहस्पर्शः २२ महातेजाः विश्वतःप्रकाशः २३ जन्ये संग्रामे साधर्जन्यः २४ यतो विजयकालवित्तेन शूरोऽपिकालज्ञानाभावे पराजितो भवतीति गम्यते २५ ज्योतिषां ग्रहनक्षत्राणामयनं गमनं वर्ण्यते तच्छास्त्रं ज्योतिषामयनं कालवित्कालरूपश्चेति नामद्वयार्थः २६ सिद्धिर्जयरूपा २७ सर्वकालादिकं विग्रहो देहो यस्य स सर्वविग्रहः। संधीतिपाठे संधिविग्रहयानासनादिरूपः २८ ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

शिखी मुंडी जटी ज्वाली मूर्तिजो मूर्द्धगो बली ।
वेणवी पणवी ताली खली कालकटंकटः १२ ॥ ५८ ॥[१]

नक्षत्रविग्रहमतिर्गुणबुद्धिर्लयोऽगमः ।
प्रजापतिर्विश्वबाहुर्विभागः सर्वगोऽमुखः ९ ॥ ५९ ॥[२]

विमोचनः सुसरणो हिरण्यकवचोद्भवः ।
मेढ्रजो वलचारी च महीचारी स्रुतस्तथा ७ ॥ ६० ॥[३]

सर्वतूर्यनिनादी च सर्वातोद्यपरिग्रहः ।
व्यालरूपो गुहावासी गुहो माली तरंगवित् ७ ॥ ६१ ॥[४]

---

१. शिखी शिखावान् गृहस्थः २९ मुंडी तद्रहितः संन्यासी एतेन नैष्ठिकब्रह्मचारिणोऽपिग्रहणं दंडीति पाठेऽपि पालाशं वैणवं च दंडं धारयतस्तावेव २३० जटी जटावान्वानप्रस्थः ३१ ज्वाली ज्वालावान् अर्चिरादिमार्गःशिखिप्रभृतिभिःप्रार्थ्यः ३२ मूर्तौ शरीरे जायतेआविर्भवतीति मूर्तिजः ३३ मूर्धगःमूर्धनि सहस्रारे वा गच्छतीति मूर्धगः ३४ बली बलवान् वलीति पाठे वलिमान्वृद्धः ३५ वेणुपणवतालाख्या वाद्यविशेषास्तद्वान्वेणवी ३६ पणवी ३७ ताली ३८ खलं धान्यस्थानं तद्वान् ३९ कालकटंकटः कालस्य यमस्य कटो वेष्टकः आवरणमीश्वरीया माया तामपिकटत्यावृणोतीति कालकटंकटः कटे वर्षावरणयोरिति धातुः शालेति पाठे वृक्षाणामावरको वायुस्तस्याप्यावरको व्योमरूपी २४० ।

२. नक्षत्रविग्रहं तारादिशरीरं कालचक्रं तदनुसारिणी मतिर्यस्य स दैवज्ञो वा । पाठांतरे गमयति चालयति वा नक्षत्रविग्रहगमःमतिर्वा ४१ गुणेषु गुणकार्येषु विषयेषु बुद्धिर्यस्य जीवरूपीत्यर्थः ४२ लीयतेऽस्मिन्सर्वमिति लय ईश्वरः ४३ अगमः अचंचलःकूटस्थश्चिन्मात्रः यम इति पाठेऽपि तयोर्यमयिताऽयस्कांततुल्यः स एव ४४ प्रजापतिः विराट् ४५ अतएव विश्वबाहुःविश्वेषां बाहव एव बाहवो यस्य स तथा ४६ विभागःविभज्यते पृथक्क्रियते इति व्यष्टिकार्यरूपः ४७ सर्वगः समष्टिकार्यरूपः ४८ अतएव अमुखःभोगसाधनहीनः अभोक्तेति यावत् । सर्वतोमुख इति पाठे त्वेकं नाम ४९ ।

३. विमोचनःसंसारमोचकः २५० सुसरणः सुप्रापः । सुशरण इति पाठे शोभनं शरणं रक्षितत्वं यस्य अपुनरावृत्तिग्रहमित्यर्थः ५१ हिरण्यकवचः हरतीतिहिरण्यं माया तद्विकारभूतं क- वचमिव कवचमावरकं शरीरं 'हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं'इतिश्रुतेस्तत्रउद्भव आविर्भावो यस्य स हिरण्यकवचोद्भवः ५२ मेढ्रजःमेढ्रे लिंगे आविर्भवतीति मेढ्रजः ५३ बलचारी वनेचरःशवरः 'देवा वै वलेगाःपर्यपश्यन्निति ब्राह्मणाद्वलशब्दस्य वनवाचित्वं ५४ महीं कृत्स्नां चरतीति महीचारी ५५ स्रुतःसर्वत्रगतःप्राप्तः कर्मणि क्तः ५६ ।

४. तूर्यनिनादी स्पष्टं ५७ सर्वातोद्यपरिग्रहः आतोद्याःप्रतोदनार्हा जीवपशवस्ते एव सर्वे परिग्रहः-कुटुंबं यस्य पशुपतिरित्यर्थः ५८ व्यालरूपःशेषात्मा ५९ गुहावासी योगी जैगीषव्यादिः २६० गुहःकार्तिकेयः ६१ माली वनमालाधारी ६२ तरंगवित्तरंगतुल्यानि विषयसुखानि विंदति लभते इति तथा तरंगवित् ६३ ।

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

त्रिदशस्त्रिकालधृत्कर्मसर्वबंधविमोचनः ।
बंधनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ५ ॥ ६२ ॥[1]

सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागज्ञो अतुल्यो यज्ञभागवित् ७ ॥ ६३ ॥[2]

सर्ववासःसर्वचारी दुर्वासा वासवोऽमरः ।
हैमो हेमकरो यज्ञः सर्वधारी धरोत्तमः ९ ॥ ६४ ॥[3]

लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः ।
संग्रहो निग्रहःकर्ता सर्पचीरनिवासनः ८ ॥ ६५ ॥[4]

---

१. त्रिदशः तिस्रो दशाः जन्मस्थितिनाशाः प्राणिनां यस्मादिति ६४ त्रिकालजातं वस्तु धारयतीति त्रिकालधृत् यथोक्तं 'अनागतमतीतं च भविष्यत्स्थूलमण्वपि । तथा दूरमदूरं च निमेषः कल्प इत्यपि । चिदात्मनि स्थितान्येव पश्य मायाविजृंभितं' इति ६५ कर्माणि संचितक्रियमाणानि बंधाश्चाविद्याकामात्मकास्तेभ्यो मोचयंतीति कर्मसर्वबंधविमोचनः ६६ बंधनस्त्वसुरेंद्राणां वामनरूपेण बलेर्बन्धकर्ता बहुवचनं कल्पभेदाभिप्रायं ६७ युधि शत्रुविनाशनः स्पष्टार्थम् ।६८

२. सांख्यप्रसादःआत्मानात्मविवेकः सांख्यं तेनैव प्रसीदति ज्ञानैकलभ्य इत्यर्थः। अथवा सांख्यज्ञानप्रदो दत्तात्रेय इत्यर्थः ६९ दुर्वासास्तस्यैव सोदर्यो रुद्रांशः २७० सर्वसाधुनिषेवित इतिब्राह्मणानां राजा सोम उक्तः ७१ प्रस्कंदनःब्रह्मादीनामपि च्यावयिता। मन्ये त्वा च्यवनमच्युतानामिति मंत्रवर्णः ७२ विभागज्ञःप्राणिनां यथोचितं तत्तत्कर्म- फलानां विभाजकः ७३ अतएवातुल्यः'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः'इतिगीतावचनात् ७४ यज्ञविभागविद् यज्ञियानां हविषां विभागाभिज्ञः ७५ ।

३. सर्वत्र वासो वसतिःस्थानमस्य सर्ववासः ७६ सर्वचारी ७७ दुर्वासाः दुःस्थं आर्द्रगजकृत्तिरूपं वासो यस्य दुर्लभं वा वासो यस्य अनंतपारत्वादिति दुर्वासाः ७८ वासवः ७९ अमरः २८० हैमो हिमस्यायं समूहो हैमो हिमालयरूपी ८१ हेमकरो जांबूनदस्य सुवर्णस्य कर्ता जंबूद्वीपचिह्नभूतो जंबुवृक्षस्तस्य हि फलं प्रस्कन्नं सुवर्णत्वं भजतीत्युपाख्यायते पुराणेषु ८२ अयज्ञो निष्कर्मा ८३ अथ च सर्वधारी सकलकर्मफलधर्ता ८४ धराणां दिग्गजशेषकूर्मादीनामप्युत्तमः अनन्याधारः सन् तैः सर्वैःसहितस्य ब्रह्मांडस्य धर्ता ॥ ८५ ।

४. लोहिताक्षः रक्तनेत्रः ८६ महांति विश्वव्यापकान्यक्षाणींद्रियाणि यस्य स महाक्षः ८७ विजयावहःअश्वोपलक्षितो रथो यस्य स विजयाक्षः ८८ विशारदः पंडितः ८९ संग्रहः गृह्णाति वार्णादीन्दासान्स्वीकरोतीति संग्रहः २९० निग्रहःनिगृह्णाति इंद्रादीनुत्सिक्तान्दंडयतीति निग्रहः ९१ सर्पा एव चीरस्य वस्त्रस्य निवासनं विष्टंभकं यस्य स सर्पचीरनिवासनः वसुस्तंभेऽस्य रूपं ९३ ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

त्रिदशस्त्रिकालधृत्कर्मसर्वबंधविमोचनः ।
बंधनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ५ ॥ ६२ ॥[१]

सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागज्ञो अतुल्यो यज्ञभागवित् ७ ॥ ६३ ॥[२]

सर्ववासःसर्वचारी दुर्वासा वासवोऽमरः ।
हैमो हेमकरो यज्ञः सर्वधारी धरोत्तमः ९ ॥ ६४ ॥[३]

लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः ।
संग्रहो निग्रहःकर्ता सर्पचीरनिवासनः ८ ॥ ६५ ॥[४]

---

१. त्रिदशः तिस्रो दशाः जन्मस्थितिनाशाः प्राणिनां यस्मादिति ६४ त्रिकालजातं वस्तु धारयतीति त्रिकालधृत् यथोक्तं 'अनागतमतीतं च भविष्यत्स्थूलमण्वपि । तथा दूरमदूरं च निमेषः कल्प इत्यपि । चिदात्मनि स्थितान्येव पश्य मायाविजृंभितं' इति ६५ कर्माणि संचितक्रियमाणानि बंधाश्चाविद्याकामात्मकास्तेभ्यो मोचयंतीति कर्मसर्वबंधविमोचनः ६६ बंधनस्त्वसुरेंद्राणां वामनरूपेण वलेर्वन्धकर्ता बहुवचनं कल्पभेदाभिप्रायं ६७ युधि शत्रुविनाशनःस्पष्टार्थम् ।६८

२. सांख्यप्रसादःआत्मानात्मविवेकः सांख्यं तेनैव प्रसीदति ज्ञानैकलभ्य इत्यर्थः। अथवा सांख्यज्ञानप्रदो दत्तात्रेय इत्यर्थः ६९ दुर्वासास्तस्यैव सोदर्यो रुद्रांशः २७० सर्वसाधुनिषेवित इतिब्राह्मणानां राजा सोम उक्तः ७१ प्रस्कंदनःब्रह्मादीनामपि च्यावयिता। मन्ये त्वा च्यवनमच्युतानामिति मंत्रवर्णः ७२ विभागज्ञःप्राणिनां यथोचितं तत्तत्कर्म- फलानां विभाजकः ७३ अतएवातुल्यः 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः'इतिगीतावचनात् ७४ यज्ञविभागविद् यज्ञियानां हविषां विभागाभिज्ञः ७५ ।

३. सर्वत्र वासो वसतिःस्थानमस्य सर्ववासः ७६ सर्वचारी ७७ दुर्वासाः दुःस्थं आर्द्रगजकृत्तिरूपं वासो यस्य दुर्लभं वा वासो यस्य अनंतपारत्वादिति दुर्वासाः ७८ वासवः ७९ अमरः २८० हैमो हिमस्यायं समूहो हैमो हिमालयरूपी ८१ हेमकरो जांबूनदस्य सुवर्णस्य कर्ता जंबूद्वीपचिह्नभूतो जंबुवृक्षस्तस्य हि फलं प्रस्कन्नं सुवर्णत्वं भजतीत्युपाख्यायते पुराणेषु ८२ अयज्ञो निष्कर्मा ८३ अथ च सर्वधारी सकलकर्मफलधर्ता ८४ धराणां दिग्गजशेषकूर्मादीनामप्युत्तमः अनन्याधारः सन् तैः सर्वैःसहितस्य ब्रह्मांडस्य धर्ता ॥ ८५ ।

४. लोहिताक्षः रक्तनेत्रः ८६ महांति विश्वव्यापकान्यक्षाणींद्रियाणि यस्य स महाक्षः ८७ विजयावहःअक्षोपलक्षितो रथो यस्य स विजयाक्षः ८८ विशारदः पंडितः ८९ संग्रहः गृह्णाति वर्णादीन्दासान्स्वीकरोतीति संग्रहः २९० निग्रहःनिगृह्णाति इंद्रादीनुत्सिक्तान्दंडयतीति निग्रहः ९१ सर्पा एव चीरस्य वस्त्रस्य निवासनं विष्टंभकं यस्य स सर्पचीरनिवासनः वसुस्तंभेऽस्य रूपं ९३ ।

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

सर्ववासी श्रियावासी उपदेशकरोऽकरः ।
मुनिरात्मनिरालोकः संभग्नश्च सहस्रदः ८ ॥ ६९ ॥[1]

पक्षी च पक्षरूपश्च अतिदीप्तो विशांपतिः ।
उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः १० ॥ ७० ॥[2]

वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ।
सिद्धयोगी महर्षिश्च सिद्धार्थः सिद्धसाधकः ९ ॥ ७१ ॥[3]

भिक्षुश्च भिक्षुरूपश्च विपणो मृदुरव्ययः ।
महासेनो विशाखश्च षष्टिभागो गवांपतिः ९ ॥ ७२ ॥[4]

---

१. सर्वेषु शरीरेषु वसतीति सर्ववासी १८ श्रिया सह वसतीति श्रियावासी अलुक्समासः श्रीरत्र 'ऋचः सामानि यजूंषि सा हि श्रीरमृता सताम्' इतिश्रुत्युक्तविद्या ग्राह्या १९ अतएव उपदेशकरः ३२० अकरः उपदेशमपि तूष्णींभावेनास्थानं यथोक्तं 'चित्रं वटतरोर्मूले वृद्धाःशिष्या गुरुर्युवा । गुरोस्तु मौनं व्याख्यानं शिष्यास्तुच्छिन्नसंशयाः' इति वाष्कलिना चावाध्वःपृष्टः पुनः पुनस्तूष्णींभूत एव स्थित्वा तृतीये प्रश्ने प्राह ब्रूमः खलु त्वं तु न विजानास्युपशांतोऽयमात्मेति २१ अकरत्वादेव मुनिर्मौनवान् २२ आत्मनि जीवे निश्चित्य देहादुपाधेर्वानिर्गत्य आलोचयतीत्यात्मनिरालोकः २३ संभग्नःसम्यक्सेवितः भजसेवायामित्यस्य रूपं न तु भंजेः २४ अतएव सहस्रदः अनंतस्य धनादेर्दाता २५ ।

२. पक्षी गरुत्मान् २६ पक्षरूपः मित्ररूपेण सहायः २७ अतिदीप्तःकोटिसूर्यप्रतीकाशः शत्रु-तेजोभिभावकः २८ अतएव सर्वासां विशां प्रजानां पतिः सार्वभौमः २९ उन्मादयतीत्युन्मा- दो मोहकः ३३० यत; मदनः अनंगः ३१ कामःकाम्यमानः स्त्र्यादिविषयरूपः ३२ अश्वत्थः-संसारवृक्षःकामप्रदो वा वृक्ष एव ३३ अर्थकरःधनादिप्रदः ३४ यशःकीर्तिप्रदश्च ३५ ।

३. वामदेवः वामानां कर्मफलानां देव इव देवो राजा विभाजकः ३६ वामः कर्मफलरूपः विषयसंपर्कआनंदमात्रस्वरूप इत्यर्थः ३७ प्राक्सर्वेषामाद्यः ३८ दक्षिणश्च त्रैलोक्याक्रमणसमर्थः ३९ वामनःबलिबंधनकर्ता ३४० सिद्धयोगी सनत्कुमारादिः ४१ महर्षिर्वसिष्ठादिः ४२ सिद्धार्थः ऋषभदत्तात्रेयादिः ४३ सिद्धश्चासौ साधकश्च ज्ञानोत्तरं संन्यासमभीप्सन्याज्ञवल्क्यादिर्विद्वत्संन्यासी ४४ ।

४. भिक्षुर्लिंगधारीहंसः ४५ भिक्षुरूपः अलिंगः परमहंसः ४६ अतएव विपणो निर्व्यवहारः दंडादिरहितः ४७ मृदुःसर्वभूताभयदाता ४८ अव्ययः निर्विकारः मानापमानादिप्राप्तावपि हर्षविषादशून्यः ४९ महासेनः कार्त्तिकेयो देवसेनापतिः ३५० विशाखस्तत एव इन्द्रेण वज्रप्रहारे कृते जातस्तत् सहायः ३५१ षष्टिभागः षष्टिस्तत्त्वानि यस्य भागो भोज्यमतिथिभाग इतिवत् स षष्टिभागः । तानि च जागरितस्थान इत्यादिना मांडूक्यादौ प्रसिद्धानि यथा जाग्रदवस्था बहिर्मुखं प्रज्ञानं सप्तशब्दादयः पंच मंतव्यबोद्धव्याभ्यां सहिताः स्वसंकल्पोत्था विषयाः एकोनविंशतिर्भोगद्वाराणि दशेंद्रियाणि पंच प्राणमनोबुद्ध्यहंकारचित्तानि चेति स्थूलं भोग्यं शब्दाद्याश्रयभूतमिति एकोनत्रिंशत् तथा स्वप्नावस्थाअंतर्मुखं प्रज्ञानं वासनामयाश्च इतरेसर्वे

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

वज्रहस्तश्च विष्कंभी चमूस्तंभन एव च ।
वृत्तावृत्तकरस्तालो मधुर्मधुकलोचनः ७ ॥ ७३ ॥[१]

वाचस्पत्यो वाजसनो नित्यमाश्रमपूजितः ।
ब्रह्मचारी लोकचारी सर्वचारी विचारवित् ७ ॥ ७४ ॥[२]

ईशान ईश्वरः कालो निशाचारी पिनाकवान् ।
निमित्तस्थो निमित्तं च नंदिर्नन्दिकरो हरिः१० ॥ ७५ ॥[३]

नंदीश्वरश्च नंदी च नंदनो नंदिवर्द्धनः ।
भगहारी निहंता च कालो ब्रह्मा पितामहः ९ ॥ ७६ ॥[४]

सूक्ष्मभोग्यांता एकोनत्रिंशदेव । तथा सुषुप्तं स्थानं चेतश्च सूक्ष्मतरं मुखमिति षष्टिः भोग्यवर्गः यस्तु भोक्ता स साक्षीआनन्दरूपोऽस्यामवस्थायां प्रत्यगानंदसूक्ष्मा- भिश्चेतोवृत्तिभिर्भुक्ते इतिषष्टिभागः ५२ गवामिंद्रियाणां पतिश्चालकः ५३ ।

१. वज्रहस्तःपर्वतभेत्ता शक्रः ५४ विष्कंभो विस्तारस्तद्वान्विष्कंभी ५५ चमूस्तंभनो दैत्यसेनास्तंभनकृत् ५६ वृत्तं युद्धे रथेन मंडलानां करणमावृत्तं परसेनां भित्त्वा पुनरक्षतेन आगमनं तयोःकरः कर्ता वृत्तावृत्तकरः । ऋतावृत्तेति पाठे निष्कपटमावृत्तकर्ता ५७ तालः संसार सिंधोस्तलमाधारं स्थानं वेत्तीति तालःशुद्धब्रह्मवित् ५८ मधुर्वसंतः५९ मधुकःकोयष्टिकाख्यः पक्षी तद्वल्लोचने यस्य स मधुकलोचनः । मध्वेव मधुकं क्षौद्रं तद्वत्पिंगनेत्र इति वा ३६० ।

२. वाचस्पतिं देवपुरोहितमनुजातःवाचस्पत्यःपुरोहितकर्मकर्ता 'बृहस्पतिर्ह वै देवानां पुरोहितस्तमन्वन्ये मनुष्यराज्ञां पुरोहिताः' इति ब्राह्मणे बृहस्पतिं यः सुभृतं बिभर्तीति मंत्रस्थबृहस्पतिपदस्य व्याख्यानात् ६१ वाजसनः शाखाविशेष- प्रवर्तकोऽध्वर्युकर्मकर्ता ६२ नित्यमाश्रमपूजितः स्पष्टं ६३ ब्रह्मचारी ब्रह्मणि चरतीति ब्रह्मनिष्ठः६४ लोकेषु ब्राह्मणादिगृहेषु चरति भक्षयतीति लोकचारी भिक्षुः६५ सर्वचारी सर्वगः 'य एवं वेदाहं ब्रह्मास्मीति सर्वं इदं स भवति' इति श्रुतेरात्मज्ञानात्सार्वात्म्यं प्राप्त इत्यर्थः ६६ विचारविद्विपरीतं चरणमंतर्मुखतया गमनं तद्वेत्ता ६७ ।

३. ईष्टे इतीशानो नियंताऽन्तर्यामीत्यर्थः लटःशानच् ६८ ईश्वरःअश्नोति व्याप्नोतीति अश्नोतेराशुकर्मणि वरट् चेत्युणादिसूत्रेणअशूङ्व्याप्तावित्यस्माद्वरट् चात्क्लिशेरीच्चोपधाया इति पूर्वसूत्रादनुवृत्त्या उपधाया ईत्वं च ६९ कालःकलयति सर्वेषां पुण्यपापादिकं तत्तत्फलप्रदानार्थं संख्यातीति कालः चित्रगुप्तात्मा ३७० निशाचारी ब्राह्म्यां निशायां महाप्रलयरूपायामपि चरति प्रत्यगानंदमनुभवतीति निशाचारी ७१ पाति रक्षतीति पिनाको धनुर्विशेषस्तद्वान्पिनाकी । पिनाकादयश्चेति पातेरित्वमाकप्रत्ययो नुडागमश्च निपात्यते ७२ निमित्तं लक्ष्यं दैत्यादिस्तत्रस्थस्तदंतर्यामी ७३ निमित्तं तद्रूपश्च विश्वरूपत्वात् ७४ नंदिस्समृद्धिः 'एषास्य परमा संपत्'इतिश्रुतेर्ज्ञानसंपद्रूपः ७५ नंदिकरःसंपत्करः ७६ हरिर्हनुमान्रामरूपस्य विष्णोःसहायः७७ ।

४. नंदी शिवस्य गणो वाहनं वा तस्येश्वरः ७८ नंदीगणरूपश्च ७९ नंदन आनंदयिता ३८०

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

चतुर्मुखो महालिंगश्चारुलिंगस्तथैव च।
लिंगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः ७ ॥ ७७ ॥[1]

वीजाध्यक्षो बीजकर्ताअध्यात्मानुगतो बलः।
इतिहासः सकल्पश्च गौतमोऽथ निशाकरः ८ ॥ ७८ ॥[2]

दंभो ह्यदंभो वैदंभो वश्यो वशकरः कलिः।
लोककर्ता पशुपतिर्महाकर्ता ह्यनौषधः १० ॥ ७९ ॥[3]

अक्षरं परमं ब्रह्म बलावच्छक्र एव च।
नीतिर्ह्यनीतिःशुद्धात्मा शुद्धो मान्यो गतागतः १० ॥ ८० ॥[4]

नंदिवर्धनः दत्तायाअपि संपदश्छेदकः ८१ भगानि इंद्रादीनामैश्वर्याणि तान्यपि हरतीति भगहारी ८२ निहंता मृत्युरूपेण ८३ कालः कलानां चतुःषष्टिसंमितानां निवासः कालः ८४ अतएव ब्रह्माअतिशयेन महान् ८५ पितामहस्य पितुर्विष्णोरपि पिता। इंदिरा लोकमाता मेतिलक्ष्म्या लोकमातृत्वस्य प्रसिद्धत्वेन तद्भर्तुर्विष्णोर्लोकपितृत्वात् ८६।

१. चतुर्मुखो विधाता ८७ महत्सर्वदेवासुरादिपूज्यं लिंगमस्य स महालिंगः ८८ चारुलिंगः रमणीयवेषः ८९ लिंगाध्यक्षः लीनमावृतमर्थंगमयंतीति लिंगानि प्रत्यक्षादीनि प्रमाणानि तेषामध्यक्षः प्रवृत्तिनिवृत्तिनियामकः ३९० सुराध्यक्षः चक्षुरादिप्रमाणानामधिष्ठातारः सुरास्तेषामप्यध्यक्षः ९१ योगाध्यक्षः तेषामेवेंद्रियदेवतानां हार्दाकाशे एकीकरणं योगः। अत्र ह्येते सर्वे एकं भवंतीति श्रुतेः तस्याप्यध्यक्षः एतत्कृपयैव योगःप्राप्य इत्यर्थः ९२ युगावहःयुगानि पुण्यपापतारतम्यवंति कृतत्रेताद्वापरकलिसंज्ञान्यावहति निर्वर्तयतीति तथा ९३।

२. वीजं धर्माधर्मौ तयोरध्यक्षः फलदाता वीजाध्यक्षः ९४ बीजकर्ता स्पष्टं ९५ अध्यात्मानुगतः आत्मानमधिकृत्य प्रवृत्तं शास्त्रमनुसरन्साधक इत्यर्थः ९६ बलःबलानि धृत्यादीनि वर्ततेऽस्मिन्नितिबलः मत्वर्थीयार्शआद्यजंतं ९७ इतिहासो भारतादिः ९८ सकल्पःयज्ञकल्पकेन प्रयोगविधिविचारेण सहितो मीमांसान्यायसंघः ९९ गौतमस्तर्कशास्त्रप्रणेता ४०० ॥ इतिचतुर्थ शतकं ॥ निशाकरश्चंद्रश्चांद्रव्याकरणप्रणेता १।

३. दंभःदभ्नाति शत्रूनूदमयतीति तथा २ अदंभः नास्ति दंभो दमको यस्य ३ वैदंभः दंभो धर्मे ध्वजित्वं तद्विरहिता विदंभास्तेषामयं सर्वस्वभूतो वैदंभः ४ वश्यो भक्तपराधीनः ५ वशकरः अन्यान्वशे कर्तु समर्थः वंश्यो वंशकर इति पाठे स्पष्टोऽर्थः ६ कलिः अन्योन्यं देवासुरादीनां वैरकर्ता ७ लोककर्ता भौतिकचतुर्दशभुवननिर्माता ८ पशुपतिःब्रह्मादिस्तंबपर्यंतानां जीवपशूनां पतिः पालकः ९ महाकर्ता पंचभूतानामपि स्रष्टा ४१० अनौषधःव्रीह्याद्यन्नजातीयरहितः अभोक्तेति यावत् ११।

४. अक्षरमव्ययं १२ परमं ब्रह्म अन्नाद्यवरब्रह्मापेक्षया परममुत्कृष्टमानंदमात्रस्वरूपं १३ बलवद्बलाभिमानिदेवतारूपं १४ अतएव शक्नोतीति शक्रः शतक्रतुशब्दावयवयोरंत्यवर्णयोर्लोपेन वा शक्रः १५ नीतिर्दंड्येषु दंडप्रणयनादिः १६ अनीतिस्तद्विपर्ययः १७ शुद्धात्मविमलचित्तः १८ शुद्धःदोषास्पर्शी १९ मान्यः मानार्हः २० गतागतः यातायातवान्संसारः २१।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

बहुप्रसादः सुस्वप्नो दर्पणोऽथ त्वमित्रजित् ।
वेदकारो मंत्रकारो विद्वान्समरमर्दनः ८ ॥ ८१ ॥[1]

महामेघनिवासी च महाघोरो वशीकरः ।
अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः ९ ॥ ८२ ॥[2]

वृषणः शंकरो नित्यं वर्चस्वी धूमकेतनः ।
नीलस्तथांगलुब्धश्च शोभनो निरवग्रहः ८ ॥ ८३ ॥[3]

स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः ।
उत्संगश्च महांगश्च महागर्भपरायणः ८ ॥ ८४ ॥[4]

कृष्णवर्णः सुवर्णश्च इंद्रियं सर्वदेहिनाम् ।
महापादो महाहस्तो महाकायो महायशाः ७ ॥ ८५ ॥[5]

---

१. बहुप्रसादः २२ सुस्वप्नःस्वप्नावस्थाभिमानी तैजसोऽप्ययमेव २३ दर्पणःदर्पण इव विश्वप्रतिबिंबदर्शनास्पदं २४ अमित्रजित्बाह्याभ्यंतरशत्रुजित् २५ वेदकारो निःश्वसितमेतद्यदृग्वेदइत्यादिश्रुतेर्वेदानां कर्ता २६ मंत्रा वेदादन्ये तांत्रिकपौराणिका देशभाषामयास्तेषां कर्ता मंत्रकर्ता २७ विद्वान् २८ समरमर्दनः समरे शत्रूणां मर्दनः २९ ।

२. महांतो मेघाः प्रलयकालिकास्तेषु तदधिष्ठातृदेवतात्वेन वसतीति महामेघनिवासी ४३० महाघोरः प्रलयकर्तृत्वात् ३१ वशे सर्वमस्तीति वशी ३२ कृणोति हिनस्ति जगदितिकरः संहारकर्त्ता ३३ अग्नेरिव ज्वाला तेजो यस्य सोऽग्निज्वालः ३४ ततोऽप्रि महाज्वालः ३५ अतिधूम्रःकालाग्निरूपेण सर्वदाहकालेऽत्यंतं धूम्रमयः ३६ । हुतः आदिकर्मणि क्तः होमेन प्रीतः३७ । हविः पय आदिरूपः३८ ।

३. वृषणःवर्षति कर्मफलानीति वृषणो धर्मः गुणाभाव आर्षः। यद्वा वृषो धर्मोऽस्त्यस्मिन्निति वृषणः पामादित्वान्नप्रत्ययः ३९ शंकरःसुखप्रदः ४४० नित्यं वर्चस्वी ४१ धूमकेतनः वन्हिरूपः ४२ नीलः मरकतवर्णः ४३ तथेति तत एव हेतोःअंगलुब्धः अंगं स्वीयोऽवयवःलिंगमिति यावत् तत्र लुब्धःनीलेऽनीले वा लिंगे नित्यं सन्निहित इत्यर्थः ४४ शोभनःकल्याणहेतुः ४५ निरवग्रहः प्रतिबंधशून्यो मनोरथवृष्टिकर्ता ४६ ।

४. स्वस्तिदः ४७ स्वस्तिभावःसुतरांअस्तिभावः सत्तास्येति स्वस्तिभावः ४८ भागी यज्ञे भागवान् ४९ भागकरःयज्ञियहविषां विभाजकः ४५० लघुःशीघ्रः ५१ उत्संगः असंगः ५२ महांगःमहालिंगः ५३ महान्गर्भ उत्पादनीयत्वे परायणमवश्यं गम्यं यस्य स महागर्भपरायणः प्रजननात्मकः कंदर्प इत्यर्थः ५४ ।

५. कृष्णवर्णो विष्णुरूपेण ५५ सुवर्णःश्वेतवर्णःसांवरूपेण ५६ सर्वदेहिनामिंद्रियं सर्वेन्द्रियरूपः ५७ महापादः ५८ महाहस्तः ५९ महाकायः ४६० महायशाः ६१ ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

महामूर्धा महामात्रो महानेत्रो निशालयः ।
महांतको महाकर्णो महोष्ठश्च महाहनुः ८ ॥ ८६ ॥[1]

महानासो महाकंबुर्महाग्रीवःश्मशानभाक् ।
महावक्षा महोरस्को ह्यंतरात्मा मृगालयः ८ ॥ ८७ ॥[2]

लंबनो लंबितोष्ठश्च महामायःपयोनिधिः ।
महादंतो महादंष्ट्रो महाजिह्वो महामुखः ८ ॥ ८८ ॥[3]

महानखो महारोमा महाकेशो महाजटः ।
प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः ८ ॥ ८९ ॥[4]

स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ८ ॥ ९० ॥[5]

---

१. महामूर्धा ६२ महामात्रः महाप्रमाणः ६३ महानेत्रः ६४ निशालयः निशेव निशा अविद्या तस्यालयो यत्र ६५ महांतकःमृत्युमृत्युः ६६ महाकर्णः ६७ महोष्ठः ६८ महाहनुः ६९ ।

२. महानासः ४७० महाकंबुर्महाकंठः ७१ महाग्रीवः ७२ श्मशानभाक् श्मनां शरीराणां शानं तनूकरणं भजतीति श्मशानभाक्देहबंधच्छेत्तेति यावत् ७३ महावक्षाः रक्ष इति पाठे महती रक्षा रक्षणं यस्य स तथा ७४ महोरस्कः ७५ अंतरात्मा ७६ मृगालयः अंकाधिरोपितमृग इत्यर्थः ७७ ।

३. ल़ंबंतेऽस्मिन्ननेकानि तरौ फलानीव ब्रह्मांडानीति लंबनः ७८ लंबितोष्ठः प्रलयकाले विश्वं-ग्रसितुं लंबितौ दीर्घीकृतौ ओष्ठौ येन सः ७९ महती ब्रह्मादिभिरप्यजय्या माया यस्य स महामायः ४८० पयोनिधिःक्षीरसमुद्रः ८१ महादंतः ८२ महादंष्ट्रः ८३ महाजिह्वः ८४ महामुखः ८५ ।

४. महानखःनरसिंहः ८६ महारोमा वराहः ८७ महाकोशःमहोदरः ८८ महाजटः ८९ प्रसन्नः ४९० प्रसादः प्रसन्नता ९१ प्रत्ययोऽनुभवः ९२ गिरिसाधनःपर्वत एव साधनं रणे जयहेतुर्यस्य गिरिधन्वेत्यर्थः ९३ ।

५. स्निह्यतीति स्नेहनःपितृवत्प्रजास्नेहवान् ९४ अस्नेहनस्तद्विपरीतः ९५ अजितः ९६ महामुनिरत्यंतं मौनवान् मननशीलो वा ९७ वृक्षाकारः संसारवृक्ष एवाकारो यस्य ९८ वृक्षकेतुः संसारवृक्ष एव केतुर्ज्ञापको यस्य नहि देहेंद्रियाण्यनुपादाय ब्रह्म जिज्ञासितुं शक्यं ९९ अनलो नास्ति अलंपूर्तिर्यस्य भुंजानस्य सोऽनलोऽग्निः ५०० इति पंचमं शतकं । वायुरेव वाहनं देशाद्देशांतरं प्रति गतेः साधनं स वायुवाहनः १ ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

CENTRE FOR SHAIVA STUDIES Pudicherry

गंडली मेरुधामा च देवाधिपतिरेव च ।
अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः ८ ॥ ९१ ॥[1]

यजुःपादभुजो गुह्यः प्रकाशो जंगमस्तथा ।
अमोघार्थः प्रसादश्चअभिगम्यः सुदर्शनः ८ ॥ ९२ ॥[2]

उपकारः प्रियः सर्वः कनकः कांचनच्छविः ।
नाभिर्नंदिकरो भावःपुष्करस्थपतिः स्थिरः १० ॥ ९३ ॥[3]

द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः ।
नक्तं कलिश्च कालश्च मकरः कालपूजितः १० ॥ ९४ ॥[4]

सगणो गणकारश्च भूतवाहनसारथिः ।
भस्मशयो भस्मगोप्ता भस्मभृतस्तरुर्गणः ८ ॥ ९५ ॥[5]

---

१. गंड इव गंडो भूमेरुच्छूनप्रदेशःक्षुद्रशैलास्तेषु लीयते गच्छतीति गंडलीः गंडशब्दपूर्वात्ली गतावस्मात्क्विप् विभक्तिलोपःसुपांसुलुगिति पूर्वसवर्णो वा आर्षः २ मेरुधामा ३ देवाधिपतिः ४ अथर्वशीर्षः ५ सामास्यः ६ ऋक्सहस्रामितेक्षणः ७ ।

२. यजुःपादभुजः ८ गुह्यःउपनिषद्देशः ९ प्रकाशः कर्मकांडः १० जंगमः नृपश्वादिरूपः ११ अर्थोऽर्थनं याच्ञा अमोघोऽर्थो यत्र सःअमोघार्थः १२ प्रसादः प्रसीदतीति दयालुः १३ अभिगम्यःसुखप्राप्यः १४ सुदर्शनः मंगलावहं दर्शनं यस्य १५ ॥ ९२ ॥

३. उपकारःप्रीणनरूपः १६ प्रियःसुखदायी १७ सर्वःसरत्यभिमुख आयातीति सर्वः १८ कनकः स्वर्णादिप्रियवस्तुरूपः १९ कांचनच्छविः ५२० नाभिःभुवनस्य मध्यदेशः अयं यज्ञो भुवनस्य नाभिर्यज्ञरूपः अत्यूर्ध्वगतिहेतुत्वाभावाद्यज्ञस्य नाभित्वं २१ नंदिकरः यज्ञफलसमृद्धिकर्ता २२ भावः क्रतुश्रद्धारूपः २३ पुष्करस्य ब्रह्मांडस्य स्थपतिःस्वामी २४ स्थिरःस्थावरःपर्वतादिरूपः २५ ।

४. द्वादशःनृणां दशगर्भवासादयो दशास्तासां मृत्युर्दशमी स्वर्ग एकादशी मोक्षो द्वादशीति द्वादश इति संसारापेक्षमोक्ष उच्यते २६ त्रासनः आंतरालिकदशारूपेण भयजननः २७ आद्यःसंसारात्प्राचीनःशुद्धःआद्यंतमध्यरूप इत्यर्थः २८ यज्ञःजीवेशयोःसंगतिकरणरूपो योगः २९ अतएव यज्ञसमाहितः तत्रस्थस्तदेकलभ्य इत्यर्थः ५३० नक्तमिव नक्तप्रकाशात्मा महामोहः ३१ कलिस्तत्कार्यभूतःकामक्रोधलोभादिरूपः ३२ कालस्तस्यापि कार्यं जन्ममरणप्रवाहःकालयति संबलयतीति योगात् ३३ मकरःमकराकारं शिशुमारचक्रं कालस्य ज्ञापकं तत्स्वरूपः ३४ कालेन मृत्युना पूजितःकालपूजितः ५३५ ।

५. सगणः प्रमथादियुक्तः ५३६ गणकारःबाणादीन्भक्तान्स्वगणान्करोतीति गणकारः ३७ मृतानां वाहनो योगक्षेमनिर्वाहको ब्रह्मा सारथिर्यस्य भूतवाहनसारथिः ३८ भस्मशयः। भसभर्त्सनदीप्त्योरिति जुहोत्यादिकाद्धातोरन्येभ्योऽपि दृश्यत इति मनिन् बभस्ति भर्त्सयति दोषान्भासयति वा आत्मानमिति भस्म तथा चोक्तं वासिष्ठलैङ्गे 'भर्त्सनात्सर्वपापानां पाशानां

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

लोकपालस्तथालोको महात्मा सर्वपूजितः ।
शुक्लस्त्रिशुक्लः संपन्नः शुचिर्भूतनिषेवितः ॥९६ ॥[1]

आश्रमस्थः क्रियावस्थो विश्वकर्ममतिर्वरः ।
विशालशाखस्ताम्रोष्ठो ह्यंबुजालः सुनिश्चलः ८ ॥ ९७ ॥[2]

कपिलःकपिशःशुक्ल आयुश्चैव परोऽपरः ।
गंधर्वो ह्यदितिस्ताक्ष्यः सुविज्ञेयः सुशारदः ११ ॥ ९८ ॥[3]

च महामुने । भस्मेति कीर्त्यते रक्षा रोगाणां चाभिभर्त्सनात्' इति । तत्रैव 'बाह्यमोक्षेण किं भस्मधारणं मोक्षलक्षणं । भस्मना नित्ययुक्तस्य ज्ञानमुत्पद्यतेऽचिरात् 'इतिश्रुतावप्यथर्वशिरसि । अग्निरित्यादिना भस्म गृहीत्वाऽभिमृज्यांगानि संस्पृशेद्व्रतमेतत्पाशुपतं पशुपाशविमोक्षायेति । भस्मनि शेते भस्मशयः तेन उद्धूलनादिकमपि कर्तव्यं । यथाह वृद्धशातातपः । 'स्तेयं कृत्वा गुरुदारांश्च गत्वा मद्यं पीत्वा ब्रह्महत्यां च कृत्वा । भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैः' इति ३९ भस्मगोप्ता भस्मना गोपायति जगदिति भस्मगोप्ता वक्ष्यति चात्रैव । 'रक्षार्थे मङ्गलार्थे च पवित्रार्थे च भामिनि ।लांछनार्थे च भक्तानां भस्म दत्तं मया पुरा' इति ५४० भस्मभूतः एतच्च मंकणकनाम्नि मुनौ कराच्च्युतं शाकरसं दृष्ट्वा नृत्यति सति तन्नृत्योपशमार्थं महादेवेन स्वमंगुलिं भित्त्वा तज्जं भस्म दर्शितं तेन स्वस्य वपुः केवलं भस्ममयमिति ज्ञाप्यते ४१ तरुः कल्पवृक्षादिः ४२ गणः भृंगिरिटिनंदिकेश्वरादिस्तद्रूपः ४३ ।

१. लोकाश्चतुर्दशभुवनानि तेषां पालो लोकपालः ४४ अलोकः लोकातीतः ४५ महात्मा पूर्णः ४६ सर्वपूजितः ४७ शुक्लः शुद्धः ४८ त्रिशुक्लः त्रीणि कायवाङ्मनांसि शुक्लानियस्य ४९ अतएव संपन्नः कैवल्यं प्राप्तः ५५० शुचिः आगंतुकमपि मलं न स्पृशति असंग इत्यर्थः ५१ भूतैः पूर्वाचार्यैर्निषेवितः भूतनिषेवितः ५२ ।

२. आश्रमेषु चतुर्षु धर्मरूपेणतिष्ठतीत्याश्रमस्थः ५३ क्रियावस्थः धर्मस्यैव पूर्वं रूपं क्रियायागादिस्तदवस्थापकः ५४ विश्वकर्ममतिःदेवशिल्पिनो यत्कौशलं तद्रूप इत्यर्थः ५५ वरःव्रियत इति वरो लक्ष्म्यादिरूपः ५६ विशालशाखःदीर्घबाहुः । शाखा पक्षांतरे बाहू इति मेदिनी ५७ ताम्रोष्ठः ५८ अंबुजालः जलसमूहः सागर इत्यर्थः । 'जालं गवाक्ष आनायेक्षारके दंभवृंदयोः 'इति मेदिनी ५९ सुनिश्चलःपर्वतादिरूपः ५६० ।

३. कपिलः ६१ कपिशः ६२ शुक्ल इति त्रयोऽपि वर्णवाचिनस्तद्वान् ६३ आयुर्जीवनकालः ६४ परःप्राचीनः ६५ अपरोऽर्वाचीनः ६६ गंधर्वश्चित्ररथादिः ६७ अदितिर्देवमाता इयं वा अदितिरितिश्रुतेः पृथ्वी वा ६८ ताक्ष्यःवैनतेयः ६९ सुविज्ञेयःसुखेन ज्ञातुं योग्यः ५७० सु शारदः शोभनवाक् ७१ ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

परश्वधायुधो देव अनुकारी सुबांधवः ।
तुंबवीणो महाक्रोध ऊर्ध्वरेता जलेशयः ८ ॥ ९९ ॥[1]

उग्रो वंशकरो वंशो वंशनादो ह्यनिंदितः ।
सर्वांगरूपो मायावी सुहृदो ह्यनिलोऽनलः १० ॥ १०० ॥[2]

बंधनो बंधकर्ता च सुबंधनविमोचनः ।
सयज्ञारिः सकामारिर्महादंष्ट्रो महायुधः ७ ॥ १०१ ॥[3]

बहुधानिंदितःशर्वःशंकरःशंकरोऽधनः ।
अमरेशो महादेवो विश्वदेवःसुरारिहा ९ ॥ १०२ ॥[4]

---

१. परश्वधायुधः ७२ देवः विजिगीषुः ७३ अनुकारी भीष्मं हंतुमायुधं प्रक्षेप्तुमनुकरोति वा सोऽनुकारी ५४ शोभनश्चासौ बान्धवश्च सुबांधवोऽर्जुनसखा ७५ तुंबवीणः तुंबीफलद्वययुक्ता वीणा यस्य सैव रुद्रवीणेति लोके प्रसिद्धा ७६ महाक्रोधःप्रलयकाले ७७ ऊर्ध्वरेताः उर्ध्वदेवमनुष्येभ्य उपर्यपि रेतः प्रजा ब्रह्मविष्ण्वादिरूपा यस्य सः ७८ जलेशयः विष्णुरूपी शेषपर्यंके जलशायी ७९ ।

२. उग्र उत्कर्षेण ग्रसतीत्युग्रः५८० वंशकरः८१ वंशश्च प्रसिद्धः८२ वंशनादः८३ अनिंदितः८४ सर्वांगरूपः सर्वेष्वंगेषु रूपं सौंदर्यमस्यास्तीति 'रूपं स्वभावे सौंदर्ये इति मेदिनी ८५ मायावी मायाविशिष्टः मायिनं तु महेश्वरमिति प्रसिद्धः ८६ सुहृदः अदंतत्वमार्षं प्रत्युपकारमनपेक्ष्य उपकर्ता ८७ अनिलःवायुः८८ अनलोग्निः५८९ ।

३. बध्नात्यनेनेति बंधनः संसारपाशः५९० बंधकर्ता संसारनिर्माता २१ सुबंधनविमोचनः सुतरां बंधनस्य मायापाशस्य मोचनकर्ता ९२ यज्ञारयो दैत्यास्तैःसहापि वसतीति सयज्ञारिः ९३ कामारयो जितकामाः योगिनः तैश्च सहास्तीति स कामारिः९४ महादंष्ट्रः९५ महायुधः९६ ।

४. बहुधा निंदितः दारुकावनेऽतिकमनीयं रूपं धृत्वा नग्नःसन्नयं पापिष्ठोऽस्मत्पत्नीनां चित्तं मोहयितुमागतोऽस्तीति सर्वैर्ऋषिभिर्निंदितः ९७ शृणाति हिनस्ति दारुकावनस्थान्मुनीन्मोहयतीति शर्वः९८ शंकरस्तेषामपि कुशलं करे यस्य स्वाधीनं यस्येत्यर्थः९९ शंकानां समूहः शंकं तस्य र इव रः शंकरः सर्वसंशयदाहकः। 'रोऽर्ककामानिले वह्नौ' इति विश्वलोचनः। यैर्मुनिभिर्दारुकावनस्थैर्निंदितो यांश्च मोहितवान्तेषामेव कारुण्यात्कल्याणं सर्वसंशयोच्छेदं च तत्त्वज्ञानदानेन कृतवानिति नामचतुष्कतात्पर्यं ६०० इति षष्ठंशतकं ॥ अधनःदिगंबरत्वात् । एवमप्यमराणांईशः अमरेशः २ महादेवो देवेंद्रादीनामपि पूज्यः यथोक्तं सांबपुराणे । 'पूज्यते यः सुरैःसर्वैर्महांश्चैव प्रमाणतः॥ महेतिधातुःपूजायां महादेवस्ततःस्मृतः'इति । विश्वदेवः विश्वं विष्णुर्वषट्कारइतिवक्ष्यमाणत्वाद्विश्वंविष्णुस्तस्यापिदेवआराध्यः ४ सुरारिहरः ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

अहिर्बुध्न्योऽनिलाभश्च चेकितानो हविस्तथा ।
अजैकपाच्च कापाली त्रिशंकुरजितः शिवः ९ ॥ १०३ ॥[१]

धन्वंतरिर्धूमकेतुः स्कंदो वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ११ ॥ १०४ ॥[२]

प्रभावः सर्वगो वायुरर्यमा सविता रविः ।
उषंगुश्च विधाता च मांधाता भूतभावनः ९ ॥ १०५ ॥[३]

---

१. अहिर्बुध्न्यः अहिः सर्पः तस्य विशेषणं बुध्न्यःबुध्ने मूले साधुरितिब्रह्मांडमूलं पातालं तत्रवर्ततइति यावत् शेषस्वरूपइत्यर्थः यथोक्तं विष्णुपुराणे । संकर्षणात्मको रुद्रोनिष्क्राम्यति जगत्रयं इतिपदद्वयात्मकमेकं नाम ६ अनिलाभःवायुर्यथाअप्रत्यक्षोऽपिस्पर्शेन ज्ञायते एवमयं-विषयसंस्पर्शजन्यानुभवरूपः यथोक्तं । 'परागर्थप्रमेयेषुया फलत्वेन संमता ॥ संवित्सैवेह मेयोर्थो वेदांतोक्तिप्रमाणतः' ७ चेकितानः कितज्ञानेअदादिः अस्मात्यङ्लुकि शानच् अतिशयेन चिकेत्ति जानातीति चेकितानः युगपदशेषविशेषविज्ञानवानित्यर्थः ८ हविरिव हविस्तस्यैव भोक्तुर्भोग्यजातं । हरिरितिपाठेऽपि तस्यैव हर्तव्यंवस्त्विति स एवार्थः हृञ् औणादिकः सर्वधातुभ्य इति कर्मणिवाहुलकादिन् ९ अजैकपात् एकादशसु रुद्रेषु कश्चित् ६१० कापाली कपालाभ्यां द्युपृथिवीरूपाभ्यां निर्वृत्तं कापालं ब्रह्मांडं तदस्यातीतिकापालीब्रह्मांडाधीशः ११ त्रिशंकुः त्रयोगुणाः शंकवःकीला इव यस्य विष्टंभकाःसत्रिशंकुःसंसारी । 'नतदस्ति पृथिव्यां वा दिवि देवेषुवा पुनः ॥ सत्वं प्रकृतिजैर्मुक्तं यदेभिःस्यात्रिभिर्गुणैः' इति गीतावचनात्सर्वजीवरूप इत्यर्थः १२ अजितःतैरेव शंकुभिरवशीकृतः १३ अतएव शिवः शुद्धःनिरुपाधिरित्यर्थः यथोक्तं वायुसंहितायां विशुद्धिः शिवता स्वतः इति १४ ।

२. धन्वंतरिःमहावैद्यःभिषक्तमं त्वांभिषजां शृणोमि' इति मंत्रसिद्धः १५ धूमकेतुरुत्पातविशेषः १६ स्कंदः १७ वैश्रवणः १८ धाता १९ शक्रः ६२० विष्णुः २१ मित्रः २२ त्वष्टा २३ ध्रुवः २४ धरः २५ ।

३. प्रभावःप्रभावाख्योवसुः २६ सर्वगोवायुःसूत्रात्मा । 'वायुनावैगौतमसूत्रेणायंचलोकः-परश्चलोकःसर्वाणिचभूतानिसंदृब्धानि' इतिश्रुतेः पदद्वयात्मकमेकंनाम २७ अर्यमा २८ सविता २९ रविः ६३० उषंगुर्नृपविशेषःमांधातृसाहचर्यात् । यद्वा उषदाहेऽस्मादिगुपधज्ञाप्रीकिरःकइतिकप्रत्ययेउषंदाहकंगावःकिरणायस्येत्युषंगुः विभक्त्य-लोपआर्षः वेदाःप्रमाणमितिवल्लिंगवचनभेदेऽपिपदयोःसमानाधिकरण्यं धन्वंतर्यादयः-शब्दादेवताविशेषवाचिनःशिवेसार्वात्म्योपपादनार्थाएवेतिसर्वत्रज्ञेयं पुनरुक्तानामपि-तत्तद्यौगिकार्थभेदादपौनरुक्त्यंज्ञेयं । सत्यपिपौनरुक्त्येस्तुत्यर्थत्वान्नदोषः ३१ विधाताविविधप्रकारेणपोषकः ३२ मांधाताअस्मच्छब्दार्थजीवंधयतिपाययतीतिमांधाता-जीवस्यतृप्तिकरः ३३ भूतानांभावनंरज्ज्वामुरगस्येवास्मिन्निति भूतभावनः ६३४ ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

विभुर्वर्णविभावी च सर्वकामगुणावहः ।
पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ८ ॥ १०६ ॥[1]

बलवांश्चोपशांतश्च पुराणः पुण्यचंचुरी ।
कुरुकर्ता कुरुवासी कुरुभूतो गुणौषधः ॥ १०७ ॥[2]

सर्वाशयो दर्भचारी सर्वेषां प्राणिनां पतिः ।
देवदेवः सुखासक्तः सदसत्सर्वरत्नवित् ७ ॥ १०८ ॥[3]

कैलासगिरिवासी च हिमवद्गिरिसंश्रयः ।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः ६ ॥ १०९ ॥[4]

---

१. विभुः विविधरूपेण भवत्यस्तीति विभुः भवतेःसत्तार्थकत्वात्पूर्ववड्डुप्रत्ययः ३५ वर्णाञ्श्वेतपीतादीन्विविधरूपेण भावयतीति वर्णविभावी 'तस्मिञ्शुक्लमुत नीलमाहुः' इत्यादि श्रुतेः एतदंतर्मुखानां नाडीमार्गगतं प्रत्यक्षम् । श्रुत्यंतरं च 'नीहारधूमार्कानिलानलानां खद्योतविद्युत्स्फटिकशशीनां ॥ एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तिकराणि योगे' इति ३५ सर्वकामगुणावहः तत्रैवांतर्मुखत्वं काले सर्वान्कामान्काम्य- मानान्विषयान्गुणांश्च शांतघोरमूढान्योगविघ्नकरान्मुखास्वादविक्षेपलयापस्नामधेयान्ध्या- यिध्य आवहति साकल्येन प्रापयतीति तथा ३७ पद्मनाभः पद्मं विश्वस्यायतनं नाभौ तत्रस्थे- मणिपूरचक्रेऽस्यास्तीति पद्मनाभः 'नाभ्यामुपरि तिष्ठति विश्वस्यायतनं महत्' इतिश्रुतेः ३८ महागर्भःमहांतो ब्रह्मादयो गर्भाउदरांतर्गता यस्य स तथा ३९ चंद्रवक्त्रःरम्यरूपः६४० अनिलः ४१ अंनलश्च ४२ पूर्वभूतरूपेणोक्तावत्र तदभिमानिदेवतारूपाविति विशेषाः ।

२. बलवान् ४३ उपशांतः ४४ पुराणः ४५ स्पष्टार्थं नामत्रयं। पुण्यचंचुः पुण्येन ज्ञातःतेनवित्तश्चंचुप्चणपाविति चंचुप् ४६ ई लक्ष्मीरित्येकाक्षरं नाम। 'ई विषदेऽनुकंपायां लक्ष्म्यां पुनरनव्ययं' इति मेदिनी ४७ कुरुकर्ताअत्रनामैकदेशग्रहणेन नाम्ग्रहणं भामा सत्यभामेतिवत्कुरुपदेन कुरुक्षेत्रमुच्यते। तेनाविमुक्तं वै कुरुक्षेत्रमिति श्रुतेः सर्वलोक- प्रसिद्धेश्च तद्विविधं तयोः कर्मोपास्तिस्थानयोर्निर्माता ४८ कुरुवासीकुरुक्षेत्रद्वयवासी ४९ कुरुभूतः कुरुक्षेत्रद्वयात्मा ६५० गुणौषधः ऐश्वर्यज्ञानवैराग्यधर्मादीनामौषधवदुद्दीपकः ५१ ।

३. सर्वाशयः सर्वेआशेरतेऽस्मिन्निति। अत्र ह्येते सर्वे एकं भवंतीति श्रुतेः सर्वस्य सुषुप्तिस्थानं प्राज्ञ इत्यर्थः ५२ दर्भेषु अंतर्वेदिस्थवर्हिरूपेष्वासादितानि हवींषि चरति भक्षयतीति दर्भचारी ५३ सर्वेषां प्राणिनां पतिः ५४ देवदेवः ५५ सुखात्मकः ५६ सत्कार्यम् ५७ असत्कारणम् ५८ सर्वरत्नवित्सर्वाणि रत्नानि तत्तज्जातिषूत्कृष्टवस्तूनि विंदते लभते इति तथा ५९।

४. कैलासगिरिवासी ६६० हिमवद्गिरिसंश्रयः ६१ कूलहारी महाप्रवाहरूपेण तीरस्थद्रुमहारी ६२ कूलकर्ता पुष्करादीनां महातटाकानां कर्ता। 'कूलं प्रतीरे सैन्यस्य पृष्ठे कूपतटाकयोः' इति विश्वलोचनः ६३ बहुविधः ६४ बहुप्रदः ६५ ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

वणिजो वर्धकीवृक्षो वकुलश्चन्दनश्छदः ।
सारग्रीवो महाजत्रुरलोलश्च महौषधः १० ॥ ११० ॥[1]

सिद्धार्थकारी सिद्धार्थश्छन्दोव्याकरणोत्तरः ।
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ६ ॥ १११ ॥[2]

प्रभावात्मा जगत्कालस्थालोलोकहितस्तरुः ।
सारङ्गो नवचक्रांगः केतुमाली सभावनः ॥ ८ ॥ ११२ ॥[3]

भूतालयो भूतपतिरहोरात्रमनिंदितः ४ ॥ ११३ ॥[4]

वाहिता सर्वभूतानां निलयश्च विभुर्भवः ।
अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः ९ ॥ ११४ ॥[5]

धृतिमान्मतिमान्दक्षः सत्कृतश्च युगाधिपः ।
गोपालिर्गोपति ग्रामो गोचर्मवसनो हरिः १० ॥ ११५ ॥[6]

---

१. वणिजो वणिक् अकारांतत्वमार्षं ६६ वर्धकी तक्षा ६७ वृक्षस्तक्षणीयःसंसारवृक्षः ६८ वकुलः वृक्षविशेषः ६९ चंदनः ६७० छदः सप्तपर्णः ७१ सारग्रीवः दृढकंधरः ७२ महाजत्रुःजत्रुरत्र कंठस्कंधयोरधोऽस्थि ७३ अलोलः ७४ महौषधः ब्रीहियवरूपः ७५ ।

२. सिद्धार्थकारी ७६ सिद्धार्थःपूर्वपक्षं निरस्य यो निष्पन्नोऽर्थः स सिद्धार्थ उच्यते स एवसिद्धांत इति प्रसिद्धस्तस्यैव विशेषणं छंदोव्याकरणोत्तर इति वेदव्याख्यानोपबृंहित इत्यर्थः ७७ सिंहनादः ७८ सिंहदंष्ट्रः ७९ सिंहगः सिंहारुढः ६८० सिंहवाहनः सिंहयुक्तं वाहनं रथोऽस्य ८१ ।

३. प्रभावात्मा प्रकृष्टो भावः सत्ता तद्रूप इत्यर्थः । 'प्राणाः सत्यं तेषामेष सत्यम्' इतिश्रुतेः सत्यस्य सत्य इत्यर्थः ८२ जगतः कालः ग्रासकर्ता जगत्कालः स एवस्थालो भोजनपात्रं यस्य ८३ लोकहितः ८४ तरुस्तारकः ८५ सारंगः पक्षिविशेषः ८६ नवश्चासौ चक्रांगो हंसश्चनवचक्रांगः ८७ केतुरिव केतुः शिखा तया मालते शोभते इति केतुमाली मयूरकुक्कुटादिपक्षिरूपः ८८ सभां धर्मपरीक्षास्थानं अवतीतिसभावनः ८९ ।

४. भूतालयः ६९० भूतपतिः ९१ अहोरात्रं ९३ अनिंदितः ६९३ ।

५. वाहिता वोढा सर्वभूतानामित्युभयत्र संबध्यते सर्वभूतानां वाहितेत्येकं नाम ९४ सर्वभूतानां निलयःसदनमित्यपरम् ९५ विभुःविगतं भूर्भुवनं यस्मादित्यजन्मा भावार्थे पूर्ववद्भवतेर्डुः ९६ भवः अस्तीति भवः अस्तेश्पचाद्यचि भूभावः ९७ अमोघः नैष्फल्यरहितः ९८ संयतः धारणाध्यानसमाधिमान् ९९ अश्वःउच्चैःश्रवादिरूपः ७०० इति सप्तमं शतकं ॥ भोजयतीति भोजनोऽन्नदाता १ अतएव प्राणधारणः २ ।

६. धृतिमान् ३ मतिमान् ४ दक्षःउत्साही ५ सत्कृतः आदृतः ६ युगाधिपः युगशब्देन धर्माधर्मौ लक्ष्येते तयोःफलदः ७ गोपालिः इंद्रियाणां पालयिता ८ गोपतिःरश्मीनां पतिःसूर्यादिः ९ ग्रामः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

हिरण्यबाहुश्च तथा गुहापालःप्रवेशिनाम् ।
प्रकृष्टारिर्महाहर्षो जितकामो जितेंद्रियः ६ ॥ ११६ ॥[१]

गांधारश्च सुवासश्च तपः सक्तो रतिर्नरः ।
महागीतो महानृत्यो ह्यप्सरोगणसेवितः ८ ॥ ११७ ॥[२]

महाकेतुर्महाधातुर्नैकसानुचरश्चलः ।
आवेदनीय आदेशः सर्वगंधसुखावहः ७ ॥ ११८ ॥[३]

तोरणस्तारणो वातः परिधीपतिखेचरः ।
संयोगो वर्धनो वृद्धो अतिवृद्धो गुणाधिकः ९ ॥ ११९ ॥[४]

नित्यआत्मसहायश्च देवासुरपतिःपतिः ।
युक्तश्च युक्तबाहुश्च देवो दिविसुपर्वणः ६ ॥ १२० ॥[५]

समूहः ७१० गोचर्मवसनः ११ हरिःहरति भक्तानां दुःखमिति हरिः १२ ।

१. हिरण्यबाहुःरमणीयबाहुः १३ प्रवेशिनामंतः प्रवेशशीलानां योगिनां चिरकालं काष्ठवत्स्थायिनां गुहा शरीरं तस्य रक्षकः १४ प्रकृष्टाः प्रकर्षेण तनूकृताः अरयः कामादयो येन स प्रकृष्टारिःसाधकोत्तमः १५ महाहर्षः १६ जितकामः १७ जितेंद्रिय १८ ।

२. गांधारः स्वरविशेषः १९ सुवासः शोभनं वसतिस्थानं कैलासाख्यं यस्य ७२० तपःसक्तः २१ रतिःप्रीतिरूपः २२ नरःजयति प्रापयति ब्रह्मांडमिति नरो विराट् २३ महागीतः २४ महानृत्यः २५ अप्सरोगणसेवितः २६ ।

३. महान्केतुर्वृषरूपी यस्य स महाकेतुः २७ महाधातुः मेरुपर्वतः २८ तस्यैव नैकसानुचरः अनेक शिखरसंचारी २९ चलःदुर्ग्रहः ७३० आवेदनीयः वाचामगोचरोऽपि गुरुभिरुपदेष्टुं शक्यः ३१ आदेशः साक्षादुपदेशरूपः ३२ सर्वगंधसुखावहः युगपत्सर्वेषां गंधानां विषयस्पर्शानां सुखमावहतीति तथा ३३ ।

४. तोरणः पुरद्वारादिरूपः ३४ तारणःपरिखादींस्तारयति जिगीषून् ३५ वातः ३६ परिधी परिधिरस्यास्तीति परिधीदुर्गरूपः ३७ पतिश्चासौ खेचरश्च खेचरेश्वरो गरुडः ३८ संयोगः वर्धनः वृद्धिहेतुभूतः संयोगः स्त्रीपुंसयोः संबंधः प्रजनश्चास्मिकंदर्प इत्युक्तः ३९ वृद्धो गुणाधिकः गुणैर्ज्ञानैश्वर्यादिभिरधिकत्वेन वृद्ध इत्यर्थः न तु बलीपलितादिना यथोक्तं । 'विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु शौर्यतः । वैश्यानां धनबाहुल्याच्छूद्राणां वयसाऽधिकः' इति ७४० अतिवृद्धः ४१ गुणाधिकः ४२ ।

५. नित्यआत्मसहायश्चेत्येकं नाम नित्यश्चासावात्मसहायश्चेति समासे विभक्त्यलोप आर्षः ४३ देवासुरपतिः ४४ पतिरर्थात्सर्वस्य ४५ युक्तसन्नद्धः संग्रामादौ ४६ युक्तबाहुः शत्रुमर्दनयोग्यौ बाहू यस्य ४७ देवो दिवि सुपर्वणःदिवि स्वर्गे यःसुपर्वा इंद्रसंज्ञो महान्तस्य देव आराधनीयः४८ ।

Center for Shaiva Studies, Pondicherry Collection

C-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

आषाढश्च सुषाढश्च ध्रुवोऽथ हरिणो हरः ।
वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथः ८ ॥ १२१ ॥[1]

शिरोहारी विमर्शश्च सर्वलक्षणलक्षितः ।
अक्षश्च रथयोगी च सर्वयोगी महाबलः ५ ॥ १२२ ॥[2]

समाम्नायोऽसमाम्नायस्तीर्थदेवो महारथः ।
निर्जीवो जीवनो मंत्रः शुभाक्षो बहुकर्कशः ९ ॥ १२३ ॥[3]

रत्नप्रभूतो रत्नांगो महार्णवनिपानवित् ।
मूलंविशालो ह्यमृतो व्यक्ताव्यक्तस्तपोनिधिः ८ ॥ १२४ ॥[4]

आरोहणोऽधिरोहश्च शीलधारी महायशाः ।
सेनाकल्पो महाकल्पो योगो युगकरो हरिः ९ ॥ १२५ ॥[5]

---

१. आषाढः साह्यतेः कर्तरि निष्ठा आ समंतात्स वै साहयति सहनं कारयतीत्याषाढः सर्वसहनसामर्थ्यप्रद इत्यर्थः ४९ सुषाढःईषत्करं पूर्वोक्तं यस्य सः सुषाढः ७५० ध्रुवःअचंचलः ५१ हरिणःश्वेतः शुद्धत्यर्थः ५२ हरःहंतीति हा शूलस्तं राति आदत्ते स हरः। हंतेःकर्तरिक्विप् तत्पूर्वात् त्रातेः आतोनुपसर्गे क इति कः हरःशूलीत्यर्थः ५३ वपुः वपुःप्रदाता आवर्तमानेभ्यः स्वर्गच्युतेभ्यः। वसुरितिपाठे सेवकेभ्यो धनप्रद इत्यर्थः ५४ वसुश्रेष्ठःधनादप्यधिकः। प्रेयोवित्तादिति श्रुतेः ५५ महापथःशिष्टाचाररूपः ७५६ ।

२. शिरोहारी ब्रह्मणः शिरश्छेत्ता विमर्शः विशेषेण विचारवान् विवेकेनैव ब्रह्मशिरश्छिन्नं नतु क्रोधमात्रेणेतिभावः पदद्वयात्मकमेकं नाम ५७ सर्वलक्षणलक्षितः सामुद्रिकोक्तशुभलक्षणयुक्तः सर्वाणि लक्ष्यंते ज्ञायंतेऽर्थजातानि एतैरिति प्रमाणानि लक्षणान्युच्यंते तैर्लक्ष्यते न तु साक्षात्क्रियत इत्यर्थः ५८ अक्षःरथसंधानदारुथ अतएव रथयोगीरथेन संबद्धः ५९ सर्वयोगी सर्वसंस्पर्शी विभुत्वात् ७६० महाबलः महांश्चासौ बलश्च महाबलः। बलशब्दान्मत्वर्थीयोऽर्शआद्यच्प्रत्ययः बलवान्वीर इत्यर्थः ६१ ।

३. समाम्नायो वेदः ६२ असमाम्नायस्तदन्यः स्मृतीतिहासपुराणागमादिः ६३ तीर्थदेवः ६४ महारथः पृथिवीस्यंदनः ६५ निर्जीवः अचेतनप्रपंचात्मा ६६ जीवनश्चचेतनस्यापि देहादेश्चैतन्यप्रदाता ६७ मंत्रः प्रणवादिर्मृतसंजीवनो वा ६८ शुभाक्षः शान्तदृष्टिः ६९ बहुकर्कशःसंहर्तृत्वात् ७७० ।

४. रत्नप्रभूतः प्रभूतानि बहूनि रत्नान्युत्तमवस्तून्यस्मिन् रत्नप्रभूतः। आहिताग्न्यादिवत्पूर्वनिपातः ७१ रक्तांगः ७२ महार्णवनिपानवित् निपानं कूपाद्बहिः पशूनां पानार्थं कृतं कुंडं महार्णवा एव सर्वे यस्य निपानभूतास्तान्शोषणीयान्विंदति लभते इति ७३ मूलं संसारतरोरधिष्ठानं ७४ विशालः अत्यंतं शोभमानः ७५ अमृतः सुधारूपः ७६ व्यक्ताव्यक्तःकार्यकारणात्मा ७७ तपोनिधिर्महामुनिः ७८ ।

५. आरोहणःपरमपदमारुरुक्षुः ७९ अधिरोहस्तदेव अधिरूढः ७८० शीलधारी सदाचारः ८१

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

युगरूपो महारूपो महानागहनो वधः ।
न्यायनिर्वपणः पादः पंडितो ह्यचलोपमः ८ ॥ १२६ ॥[१]

बहुमालो महामालः शशी हरसुलोचनः ।
विस्तारो लवणः कूपस्त्रियुगः सफलोदयः ६ ॥ १२७ ॥[२]

त्रिलोचनो विषण्णांगो मणिविद्धो जटाधरः ।
बिंदुर्विसर्गः सुमुखः शरः सर्वायुधः सहः १० ॥ १२८ ॥[३]

निवेदनः सुखाजातः सुगंधारो महाधनुः ।
गंधपाली च भगवानुत्थानः सर्वकर्मणाम् ४ ॥ १२९ ॥[४]

महायशाः पुण्यकीर्तिः ८२ सेनाकल्पःसेनाया आकल्पः अलंकारः पराक्रम इत्यर्थः ८३ महाकल्पदिव्यभूषणः ८४ योगश्चित्तवृत्तिनिरोधः ८५ युगानि कल्पादीनि करे यस्य कल्पादिप्रदः८६ हरति शरीरं देशाद्देशांतरं प्रति नयतीति हरिः पादाभिमानिनी देवता त्रिविक्रम इत्यर्थः ८७ ।

१. युगरुपो धर्माधर्मतत्संकररूपः ८८ महारूपः महांश्चासावरूपश्चेति तथा ८९ महानागहनः गजासुरघ्नः ७९० वधः मृत्युः ९१ न्यायनिर्वपणः न्याययुक्तं निर्वपणं दानं यस्य यथाधर्मं मनोरथप्रदः ९२ पादः पद्यत इति गम्यः ९३ पंडितःपरोक्षज्ञानी ९४ अचलोपमो निश्चलस्तत्त्वज्ञानी इत्यर्थः ९५ ।

२. बहु निरवधि मालते शोभते इत्यनंतलीलः ९६ माहामालःमहती आपादलंबिनी अम्लानत्वादिगुणयुक्ता वा माला यस्य ९७ शशी चंद्रः स एव हरसुलोचनः महादेवस्य शांतदृष्टिरूपः९८ विस्तारो लवणः कूपः विशिष्टस्तारआच्छादनं यस्य सोऽतिविस्तीर्णो लवणः क्षाररसस्तादृशःकूप इव कूपः महाकूपतुल्यः क्षारसमुद्ररूपीत्यर्थः त्रिपदमेकं नाम ९९ त्रियुगः कलिबहिर्भूतः८०० इत्यष्टमं शतकं ॥ अतएव सफलोदयः १ ॥ १२७ ॥

३. त्रिलोचनः त्रीणि शाखाचार्यध्यानानि लोचनानि दर्शनानि दर्शनसाधनानि यस्य स त्रिलोचनः २ विषण्णांगःविशेषेण सन्नाः निरन्वयमुच्छिन्नाः अंगाख्या भूम्यादयोऽष्टौ मूर्तयो यस्य । अमूर्ते हि सूक्ष्मरूपेण मूर्तीनामन्वयोऽस्ति ततोऽप्ययमंतरंगःशुद्धोभूमेत्यर्थः ३ मणिविद्धःमणिनिधानार्थं कर्णदेशे विद्धःकृतच्छिद्रःकुंडलीत्यर्थः ४ जटाधरः५ बिंदुरनुस्वारः६ विसर्गो विसर्जनीयः ७ सुमुखो व्यक्तवर्णः८ शरो वाणः९ सर्वायुधः८१० सहः सर्वं सहते मर्षयतीति सहः ११ ।

४. निवेदनः निहीनं सर्ववृत्त्युपरमेण वेदनं ज्ञानं यस्य १२ सुखाजातः सुखरूपेणाऽऽजातो वृत्तिविलये सत्याविर्भूतः १३ सुगंधारः शोभनो गंधारदेशोद्भवः १४ महाधनुःपिनाकधन्वा १५ गंधपाली गंधाः लेशाः सूक्ष्माः प्रपंचवासनास्ताः पालयतीति गंधपाली सर्वप्राणिधीवासनामय इत्यर्थः स एव भगवान् ईश्वरः एकं नाम १६ उत्थानःसर्वकर्माणि उत्तिष्ठंत्यस्मादित्युत्थानः १७ ।

Center for Shaiva Studies, Pondicherry Collection

0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-M

मंथानो बहुलो वायुःसकलः सर्वलोचनः ।
तलस्तालः करस्थाली ऊर्ध्वसंहननो महान् ७ ॥ १३० ॥[1]

छत्रं सुच्छत्रो विख्यातो लोकः सर्वाश्रयः क्रमः ।
मुंडो विरूपो विकृतो दंडी कुंडी विकुर्वणः १० ॥ १३१ ॥[2]

हर्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात् ।
सहस्रमूर्धा देवेंद्रः सर्वदेवमयो गुरुः ० ॥ १३२ ॥[3]

सहस्रबाहुः सर्वांगः शरण्यः सर्वलोककृत् ।
पवित्रं त्रिककुन्मंत्रः कनिष्ठःकृष्णपिंगलः ८ ॥ १३३ ॥[4]

---

१. मंथानो विश्वविलोडनसमर्थो बहुलो निरवधिर्वायुर्महान्प्रलयानिल इत्येकं नाम त्रिपदं १८ सकलःपूर्णः १९ सर्वलोचनः सर्वद्रष्टा ८२० तलस्तालःकरतलोत्थ एव तालवाद्यविशेषः २१ करावेव स्थालो भोजनभाजनं तदस्यास्तीति करस्थाली २२ ऊर्ध्वसंहननः श्रेष्ठो दृढशरीरश्चेत्यर्थः २३ महान् अत्युच्चः २४ ।

२. छत्रं २५ सुच्छत्रः २६ विख्यातो लोकः प्राणिभृन्मात्रप्रसिद्धप्रकाशः २७ सर्वाश्रयः क्रमः सर्वस्य आश्रयःआधारभूतक्रमः पादविक्षेपः त्रैविक्रमेण रुपेण पादाक्रांतजगत्त्रय इत्यर्थः २८ मुंडः मुंडितशिराः २९ अतएव विरूपः विकटरूपः ८३० विकृतः सर्वां विक्रियां प्राप्तः ३१ दंडी ३२ कुंडी ३३ विकुर्वणः करोतीति कुर्वा विगतः कुर्वा यस्माद्विकुर्वणः कर्माप्राप्य इत्यर्थः समासांत आर्षः १४ ।

३. हर्यक्षःसिंहः ३५ ककुभःसर्वदिग्रूपः ३६ वज्री ३७ शतजिह्वः ३८ सहस्रपात् सहस्रमूर्धा ३९ देवेंद्रः ८४० सर्वदेवमयः ४१ गुरुः ४२ ।

४. सहस्रबाहुः ४३ सर्वांगः सर्वमंगति प्राप्नोतीति सर्वांगः ४४ शरण्यःशरणाय साधुः ४५ सर्वलोककृत् ४६ पवित्रं पावनस्तीर्थादिरूपः ४७ त्रिककुन्मंत्रः त्रीणि ककुंदीव ककुंदि उच्चस्थानानि वीजशक्तिकीलकानि यस्य तादृशो मंत्रः ४८ कनिष्ठः अदितिपुत्राणां मध्ये यः कनिष्ठो वामनरूपी विष्णुःतद्रूपः ४९ कृष्णपिंगलः हरिहरमूर्तिः विष्णुर्नारायणःकृष्ण इति कृष्णशब्दस्य हरौ 'निधिभेदे कपौ रुद्रे पिंगलःकपिलेन्यवत्' इति नानार्थकोशात्पिगलशब्दस्य हरे च प्रसिद्धिदर्शनात् पुरुषं कृष्णपिंगलं दरिद्रं नीललोहितेत्यादिश्रुतेरप्ययमेवार्थः नीलग्रीवो विलोहितपदेन रुद्रस्यापि ग्रहणात् यदि तु नीललोहितत्वं रुद्रस्य पूर्वं लोहितःपश्चान्नील इति कालभेदेन वा कंठेनीलःसर्वांगे लोहित इति वा वामांगे नीलो दक्षिणांगे लोहित इति देशभेदेन वा आवरकप्रकृत्यंशेन नीलस्तत्प्रवर्तकपुरुषांशेन लोहित इति गुणभेदेन वा गृह्यते तदा गुणवाचिनोःशब्दयोःद्रव्यवाचित्वं तद्वत्त्वाच्चतदेकदेशवाचित्वमिति विप्रकृष्टार्थकल्पना। अस्माकं तु विलोहितकृष्णपदयोर्मुख्यवृत्यैव शिवकेशववाचित्वं दृष्टं तेन तत्पर्याययोर्नीलिंपिंगलपदयोरपि हरिहरवाचित्वं वक्तुं युज्यते। तथा च कृष्णपिंगलपदेन नीललोहितपदेन वा हरिहरावेव ग्राह्यौ निर्णीतार्थकपदांतरसमभिव्याहारसामर्थ्याद-निर्णीतार्थकस्यापि पदस्यार्थो व्यवस्थापयितुं शक्य एवेति युक्तमुत्पश्याम। यद्यपि

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MO

ब्रह्मदंडविनिर्माता शतघ्नीपाशशक्तिमान् ।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ६ ॥ १३४ ॥[1]

गभस्तिर्ब्रह्मकृद्ब्रह्मी ब्रह्मविद्ब्राह्मणोगतिः ।
अनन्तरूपो नैकात्मा तिग्मतेजाः स्वयंभुवः ९ ॥ १३५ ॥[2]

ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ।
चंदनी पद्मनालाग्रः सुरभ्युत्तरणो नरः ८ ॥ १३६ ॥[3]

कर्णिकारमहास्त्रग्वी नीलमौलिःपिनाकधृत् ।
उमापतिरुमाकांतो जाह्नवीधृदुमाधवः ७ ॥ १३७ ॥[4]

पूर्ववाद्युक्तेष्वप्यर्थेषु कुशकाशावलंवनेन किंचित्प्रमाण- मुन्नोतुं शक्यं तथाऽपि ऋजुमार्गेण सिध्यत्यर्थे वक्रेण साधनायोगात् शिवविष्णुनाम्नामन्योन्यस्मिन्प्रयोगदर्शनाच्च तयोरेकस्यैव व्यूहद्वयात्मत्वादत्र इदमेव व्याख्यानमिष्टं न चैवमिंद्राग्निपदवद्विवचनेन भाव्यं तत्पुरुषादिपदेष्विव कृष्णश्चासौ पिंगलश्चेत्यभेदेनैव पदयोरन्वयोपपत्तौ भेदसूचकद्विवचनायोगात् हरिहरयोरभेदस्य च प्रागेव प्रतिपादितत्वादिति दिक् तदयं संग्रहः ८५० ।

१. ब्रह्मदंडविनिर्माता ५१ शतघ्नीपाशक्तिमान् ५२ पद्मगर्भो ब्रह्मा ५३ महागर्भो महान्गर्भोऽन्तरवकाशो यस्य ५४ ब्रह्मगर्भो वेदगर्भितः ५५ जलोद्भवः जले सलिल एको द्रष्टेति श्रुतेरेकार्णवे उद्भवः आविर्भावो यस्य मायावीत्यर्थः ५६ ।

२. गभस्तिः रश्मिमान् ५७ ब्रह्मकृद्वेदकर्ता ५८ ब्रह्मी वेदाध्यायी ५९ ब्रह्मविद्वेदार्थविद् ८६० ब्राह्मणो ब्रह्मिष्ठः ६१ गतिर्ब्रह्मिष्ठानामेव परायणं ६२ अनंतं रूपमस्येत्यनंतरूपः ६३ अतएव नैकात्मा अनेकशरीरधारी ६४ तिग्मतेजाः स्वयंभुवः ब्रह्मणो दृष्ट्या तिग्मतेजाः दुःसहपराक्रमः स्वशिरश्छेदकत्वात् ६५ ।

३. ऊर्ध्वगात्मा उपाधित्रयादुपरिगत आत्मा स्वरूपं यस्य। स भूमिं सर्वतो वृत्वाऽत्यतिष्ठद्दशांगुलं इतिश्रुतेः ६६ पशुपतिर्जीवानामीश्वरः ६७ वातरंहाः ६८ मनोजवः ६९ चंदनी चंदनलिप्तगात्रः ८७० पद्मनालाग्रःपद्मनालमस्याग्रेऽस्तीति तथा कदाचिद्ब्रह्मा स्वाश्रयभूतपद्मनालस्यांतं द्रक्ष्ये इति बुद्ध्या नालमार्गेण गच्छंस्तदादिं न प्राप्तवानतोऽर्वाचीनस्यापि नालस्यान्तो न दृष्टः किमुत नालक्षेत्रस्य भूस्थानीयस्येति भावः ७१ सुरभ्युत्तरणः कदाचिद्विष्णुस्पर्धया ब्रह्मा शिवस्य शिरोदेशो मया दृष्टस्तत्र त्वया साक्ष्यं देयमिति कामधेनुमुक्तवान्सा च ब्रह्मभयादनृतं साक्ष्यं च दत्तवती ततो महादेवेन शप्ताऽमेध्याशिनी ते संततिर्भविष्यतीति तदिदमुक्तं सुरभिंकामधेनुमूर्ध्वपदादध उत्तारयतीति सुरभ्युत्तरणः ७२ एवं मूर्तिद्वयस्याप्यऽन्तो येन न दृष्टःसोऽप्ययमेवेत्याह नर इति न रातिआदत्ते प्राप्नोत्यंतमिति नरः आतोऽनुपसर्गे कः ७३ ।

४. कर्णिकारपुष्पमयी महती स्रङ् माला तद्वान् कर्णिकारमहास्रग्वी ७४ नीलमौलिः नीलमणि- मयं किरीटं मौलौ यस्य ७५ पिनाकधृत् पितः प्राप्तो नाको द्यौर्येन स पिनाकः । पि गतावित्यतो

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वरो वराहो वरदो वरेण्यः सुमहास्वनः ।
महाप्रसादो दमनः शत्रुहा श्वेतपिंगलः ८ ॥ ३८ ॥[१]

पीतात्मा परमात्मा च प्रयतात्मा प्रधानधृत् ।
सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणो वरः ७ ॥ १३९ ॥[२]

चराचरात्मा सूक्ष्मात्मा अमृतो गोवृषेश्वरः ।
साध्यर्षिर्वसुरादित्यो विवस्वान् सवितामृतः ६ ॥ १४० ॥[३]

निष्ठातस्य लोपः। त्रिपुरासुरेण हृतः स्वर्गे देवैर्यद्बलात्प्राप्तरत्नमहादेवस्य शैलेंद्र रूपधनुःपिनाकस्तस्य धर्ता पिनाकधृत् यथा नमुचि फेनेन निघ्नत इंद्रस्य फेने यथा वज्रप्रवेश एवं शैलेऽपि पिनाकप्रवेशात्सोऽपि पिनाक इत्यर्थः ७६ उमा ब्रह्मविद्या तस्याः पतिर्यथेष्टविनियोगात्स्वामी ७७ उमया तयैव ब्रह्मविद्यया कांतः कामितोवशीकृतः जाह्नवी धृत् ७९ उमायाः शैलपुत्र्याःधवो भर्ता उमाधवः ८८० ।

१. वरोवराहःआद्यो भूमेरुद्धर्ता यज्ञरूपीवराहः८१ वरैःश्रेष्ठै रूपैर्दयते नानावतारैर्जगत्पालयतीति वरदः८२ अतएव वरेण्यो वरणीयः८३ सुमहास्वनो वेदगर्जितो हयग्रीवः८४ महाप्रसादः८५ दमनश्च सुरभित्वाद्दमनस्तत्पूज्यत्वाद्वा ८६ शत्रून्कामादीन्हंतीति शत्रुहा ८७ श्वेतपिंगलः अर्द्धनारीनटेश्वरो दक्षिणार्द्धे कर्पूरगौरः वामार्द्धे कनकपिंगलः। ये तु श्वेतपिंगलपदस्यार्थं कृष्णपिंगलपदेन ब्रुवते ते श्वेतमपि कृष्णीकर्तु समर्था महांतो भवंतीति ८८ ।

२. पीतात्मा सुवर्णवर्णशरीरः'य एषोंतरादित्यो हिरण्मयःपुरुषो दृश्यते हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः' इति श्रुत्युक्तः ८९ परमात्मा अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयेभ्यः पंचभ्योऽपरमेभ्यआत्मभ्योऽन्यःषष्ठ आनन्दमात्रस्वरूपः ८९० प्रयतात्मा शुद्धचित्तः ९१ प्रधानघृत्रिगुणात्मकं जगत्तत्कारणं प्रधानाख्यमज्ञानं तदधिष्ठानभूतः ९२ सर्वपार्श्वमुखः चतसृषु दिक्षु ऊर्ध्वं च मुखं यस्येति पंचवक्त्र उक्तः९३ त्र्यक्षःत्रीणि सोमसूर्याग्निरूपाण्यक्षीणि नेत्राणियस्य ९४ धर्मसाधारणो वरःपुण्यानुरूपप्रसादात्मा ९५ ।

३. चराचरात्मा रलयोरैक्यात् चलाचलात्मा 'दिवि पंथाश्चलाचलः' इति श्रुत्युक्तौ यावावृत्त्यनावृत्तिमूलौ तद्रूपश्चराचरात्मा कर्मानुरूपः प्रसादानुरूपो मार्गोऽप्ययमेवेति नामद्वयार्थः ९६ सूक्ष्मात्मा मार्गद्वयागोचरस्वरूपः ९७ अमृतो मरणवर्जितो निष्कामो गोवृषः पृथिवीपतिर्धर्मः तस्य ईश्वरःनिष्कामधर्मस्यामृतं मोक्षरूपं फलं दातुं समर्थः९८ साध्याःदेवानामपि देवास्तेषा मपि ऋषिराचार्यो साध्यर्षिः ८९९ वसुर्देवताविशेषः उपरिचरस्य राज्ञो व्यावृत्त्यैतस्यैव विशेषणमादित्य इतिअदितेः पुत्रो वसुर्नामेत्यर्थः ९०० ॥ इति नवमं शतकं ॥ विवस्वान् विशेषेण वस्ते आच्छादयत्यनेन भुवनमिति बिम्बः अंशुजालं तद्वान् सूयते इति सविता कृतो बहुलमिति वार्तिकात्कर्मणि तृच्बाहुलकात् यज्ञेऽभिषूयमाणः अमृतः सोमः अंशुरंशुष्टे देव सोमेति मंत्रलिंगात् अपाम सोमममृता अभूम इति अमृतत्वसाधनत्वश्रुतेश्च सोमस्य विवस्वत्त्वममृतत्वं च ज्ञेयं तेन त्रिपदमेकं नाम १ ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

व्यासः सर्गः सुसंक्षेपो विस्तरः पर्ययो नरः ।
ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः ८ ॥ १४१ ॥[1]

कलाः काष्ठाः लवाः मात्राः मुहूर्ताहः क्षपाः क्षणाः ।
विश्वक्षेत्रं प्रजाबीजं लिंगमाद्यस्तु निर्गमः ५ ॥ १४२ ॥[2]

सदसद् व्यक्तमव्यक्तं पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ११ ॥१४३ ॥

निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परागतिः ।
देवासुरविनिर्माता देवासुरपरायणः ६ ॥ १४४ ॥[3]

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुरगाणाश्रयः ५ ॥ १४५ ॥[4]

---

१. व्यासः पुराणेतिहासादेःस्रष्टा २ सर्गस्तस्यैव सृज्यपुराणादि अस्य विशेषणे सुसंक्षेपो विस्तर इति च सूत्रादिरूपो भाष्यादिरूप इत्यर्थः इदमपि त्रिपदं नाम एवं सति होमे एकैकनामजपे वा एवं मंत्र ऊह्यः ओं सर्गाय सुसंक्षेपाय विस्तराय स्वाहेति ओ नमःसर्गाय सुसंक्षेपाय विस्तरायेति च भूरग्नये च पृथिव्यै च महते च स्वाहेतिवदनेकपदतोऽप्येकनामत्वं ज्ञेयं ३ पर्ययो नरःपरितःअयते व्याप्नोतीति पर्ययः स च नरो जीवः समष्टिजीवो वैश्वानर इत्यर्थः ४ ऋतुः ५ संवत्सरः ६ मासः ७ पक्षः ८ संख्यासमापनः ऋत्वादिसंख्यासमाप्तिरूपःसंक्रांतिदर्शपूर्णमासादिरूपः ९ ।

२. कलाः ८९० काष्ठाः ११ लवाः १२ मात्रा १३ मुहूर्ताहःक्षपा इति समस्तं नाम १४ क्षणाःऋत्वाद्याःकालावयवाः स्पष्टार्थाः १५ विश्वक्षेत्रं ब्रह्मांडवृक्षस्यालवालं चिन्मात्रं १६ प्रजाबीजं प्रजानां बीजं मायाविशिष्टचैतन्यरूपमव्यक्तं १७ लिंगं महत्तत्वं १८ आद्यो निर्गमः अंकुररुपी अहमिति प्रथमोऽध्यासः १९ ॥ ४५ ॥ सत्कार्यं ९५० असत्कारणं २१ व्यक्तमिंद्रियग्राह्यं २२ अव्यक्तमहं प्रजानामीत्यनुभवैकवेद्यमज्ञानं २३ पिता २४ माता २५ पितामहः २६ स्वर्गद्वारं तपः २७ प्रजाद्वारं रागः २८ मोक्षद्वारं वैराग्यं २९ त्रिविष्टपं स्वर्गसाधनंधर्मः९३० ।

३. निर्वाणं मोक्षः ३१ ह्लादनःआनंदयिता एष ह्येवानंदयतीति श्रुतेः ३२ ब्रह्मलोकः सत्यलोकः ३३ परागतिस्ततोऽप्यधिका गतिर्गंतव्यः ३४ देवासुरविनिर्माता ३५ देवासुरपरायणः पुंस्त्वमार्षं ३६ ।

४. देवासुरगुरुःबृहस्पतिशुक्ररूपः ३७ देवो विजिगीषुः ३८ देवासुरनमस्कृतः ३९ [illegible]महामात्रः महामात्रःश्रेष्ठः९४० देवासुरगणाश्रयः आश्रयणीयः ४१ ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।
देवातिदेवो देवर्षिर्देवासुरवरप्रदः ५ ॥ १४६ ॥[१]

देवासुरेश्वरो विश्वो देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिंत्यो देवतात्माऽऽत्मसंभवः ७ ॥ १४७ ॥[२]

उद्भित्त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः ।
ईड्यो हस्तीश्वरो व्याघ्रो देवसिंहो नरर्षभः ८ ॥ १४८ ॥[३]

विबुधोऽग्रवरः सूक्ष्मः सर्वदेवस्तपोमयः ।
सुयुक्तः शोभनो वज्री प्रासानां प्रभवोऽव्ययः १० ॥ १४९ ॥[४]

गुहः कांतो निजः सर्गः पवित्रं सर्वपावनः ।
शृंगी शृंगप्रियो वभ्रू राजराजो निरामयः ११ ॥ १५० ॥[५]

---

१. देवासुरगणाध्यक्ष इंद्रविरोचनादिरूपः ४२ देवासुरगणाग्रणीः स्वामिकार्तिकेयकेशिदैत्यरूपः ४३ देवातिदेवः इंद्रियाण्यतिक्रम्य स्वयमेव प्रकाशमानः ४४ देवर्षिर्नारदादिरूपः ४५ देवासुरवरप्रदो ब्रह्मरुद्रादिरूपेण ।

२. देवासुरेश्वरस्तेषामंतर्यामी ४७ विश्वः विशत्यस्मिन्निति विश्वःजगद्गर्भेशयः ४८ देवासुरमहेश्वरः अंतर्यामिण ईश्वरस्याप्यधिष्ठानमतोमहेश्वरः ४९ सर्वदेवमयः अग्निर्मूर्धाचक्षुषीचंद्रसूर्यावित्यादिश्रुतेः९५० अचिंत्यःनास्ति चिंत्योऽन्यो यस्य यस्माद्वा ५१ देवतात्मा देवतानामंतरात्मा प्रत्यग्रूपः ५१ आत्मसंभवः स्वतः सिद्धः ५३ ।

३. उद्भित् उद्भिद्याविर्भवतीति वा फलं उद्भिनत्तीति वा स्थावररूपो यज्ञादिरूपो वा ५४ त्रिविक्रमःत्रीणि भुवनानि क्रमत इति वामनः ५५ वैद्यो विद्यावान् ५६ विरजःनिर्मलः ५७ नीरजःरजोगुणहीनः ५८ अमरःविनाशहीनः ५९ ईड्यः स्तुत्यः ९६० हस्तीश्वरःकालहस्तीश्वराख्यवायव्यलिंगरूपः ६१ व्याघ्रो व्याघ्रेश्वरनामकलिंगरूपः ६२ देवसिंहः देवेषु पराक्रमी ६३ नरर्षभः नरेष्वपिश्रेष्ठः ६४ ।

४. विबुधःविशेषेण प्राज्ञः ३५ अग्रवरःअग्रे वृणोति यज्ञभागादिकमित्यग्रवरः ६६ सूक्ष्मःदुर्लक्ष्यः ६७ सर्वदेवः तच्च देवतासु कार्त्स्न्येन परिसमाप्तः ६८ तपोमयः तपःप्रधानः ६९ सुयुक्तःसुतरां युक्तः सन्नद्धः९७० शोभनःकल्याणः७१ वज्री वज्रायुधः७२ प्रासानामायुधविशेषाणां प्रभव उत्पत्तिस्थानं ७३ अव्ययः न विविधेन रूपेण एति प्राप्नोत्येनं साधक इत्यव्ययः एकाग्रचित्तप्राप्यः एरच् प्रत्ययांतोयं ७४ ।

५. गुहःकुमारः७५ कांतःकस्य सुखस्य अंतःसीमा आनंदस्य पराकाष्ठेत्यर्थः७६ निजःसर्गः सृज्यत इति सर्गस्तस्य विशेषणं निजःस्वस्मादनन्यः७७ पवित्रं पविर्वज्रं तत्तुल्यं मृत्युदुःखं तस्मात्त्रायत इति पवित्रं ७८ अतएव सर्वपावनः सर्वेषां ब्रह्मादीनामपि शुद्धिकरः ७९ शृंगी वृषभादिरूपः ९८० शृंगप्रियः पर्वतशिखराश्रयः८९ बभ्रुः शनैश्चरः८२ राजराजः कुबेरः८३ निरामयःनिर्दोषः ८४ ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अभिरामःसुरगणो विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ८ ॥ १५१ ॥[1]
स्थावराणां पतिश्चैव नियमेंद्रियवर्धनः ।
सिद्धार्थः सिद्धभूतार्थोऽचिंत्यःसत्यव्रतः शुचिः ७ ॥ १५२ ॥[2]
व्रताधिपः परं ब्रह्म भक्तानां परमा गतिः ।
विमुक्तो मुक्ततेजाश्च श्रीमाञ्श्रीवर्धनो जगत् ९ ॥ १५३ ॥[3]

---

१. अभिरामः प्रीतिजनकः ८५ सुरगणःदेवसंघरूपः ८६ विरामः सर्वोपरमरूपः ८७ सर्वसाधनः सर्वाणि आश्रमकर्माणि यदवाप्तये साधनानि यस्मिन्निति ८८ ललाटाक्षः ८९ विश्वदेवः विश्वैर्ब्रह्मांडकंदुकैर्दीव्यति क्रीडत इति ९९० हरिणःमृगरूपः ९१ ब्रह्मवर्चसं विद्यातपः समुद्भवं तेजः तद्वान् अर्शआद्यच्प्रत्ययांतोऽयं १२ ।

२. स्थावराणां पतिःहिमाचलादिरूपः ९३ नियमेंद्रियवर्धनःनियमैर्निग्रहैः कृत्वा इंद्रियाणां समनस्कानां वर्धनो हिंसकःक्षीणमना लब्धसमाधिरित्यर्थः ९४ सिद्धार्थःनित्यसिद्ध एव मोक्षो ज्ञानापगममात्रेण कंठगतविस्मृतचामीकरवदर्थोऽर्थनीयो यस्य स सिद्धार्थः तत्वज्ञानार्थी ९५ अतएव सिद्धभूतार्थः पूर्वसिद्धः पश्चाद्भूतःसाधितःसिद्धभूतः पूर्वकालैकेतिसमासः स चासौ अर्थश्च सिद्धभूतार्थःउक्तविधो मोक्षः ९६ अतएव अचिंत्यः चिंत्यादुपास्यादन्यप्रत्यगात्मत्वात् 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' इतिश्रुतेश्च ९७ सत्यव्रतः सत्यं ब्रह्म तदर्थान्येव व्रतानि तपांसि यस्य ९८ शुचिःनिर्मलचित्तः ९९ ।

३. व्रताधिपः तत्तद्व्रतफलप्रदः १००० इति दशमं शतकं। परं विश्वतैजस-प्राज्ञेभ्योऽपरब्रह्मभ्यःपरं तुरीयं शिवाख्यं। 'शिवमद्वैतं चतुर्थं मन्यंते' इतिश्रुतिप्रसिद्धं १ अतएव ब्रह्म देशतः कालतो वस्तुतश्चपरिच्छेदशून्यं। 'नेह नानास्ति किंचन' इतिश्रुतेर्विश्वादीनामनृतत्वेन स्वगतभेदस्याप्यभावादखंडैकरसं वस्तु तन्मात्रं २ भक्तानां परमा गतिः भंजोआमर्दनेऽस्य रूपं भक्तानां विश्वादिषु पूर्वपूर्वस्य उत्तरस्मिन्नुत्तरस्मिन्प्रविलापनलक्षणंआमर्दनं सैंधवखिल्यसलिलन्यायेन कुर्वतां परमा निरतिशया गतिःकैवल्यरूपाविश्रांतिः ३ विमुक्तःदेहांते विशेषेण मुक्तः ४ कुतो विमुक्तत्वमत आह मुक्ततेजा इति। तेजः पदेनात्र लिंगशरीरमुच्यते तत् मुक्तं तेजोऽनेनेति तथा ५ मुक्ततेजस्त्वमपि कुतः यतः श्रीमान्योगैश्वर्यवान् तथाहि योगी जितमृत्युर्यथा वायं भीष्मवदिहैव तिष्ठति ब्रह्मलोकं वा मूर्धन्यनाड्यागच्छति इहैव लिंगशरीरं कवचवद्वा त्यक्त्वा विशुद्धं कैवल्यमाप्नोति ६ श्रीमत्त्वमपि कुतःयतश्रीवर्धनः। 'ऋचःसामानि यजूंषि सा हि श्रीरमृता सतां इति श्रुतेर्वेदत्रयरूपां श्रियं कर्मोपास्तिज्ञानकांडात्मिकां वर्धयति तत्तदुक्तार्थानुष्ठानेन सम्यक्परिपोषयति स श्रीवर्धनः ७ जगत् अव्याकृतादिघटांत नश्वरवस्तुरूपःगच्छति नित्यं रूपांतरं प्राप्नोतीति जगदिति व्युत्पत्तेःप्रधानादीनामपिजगत्त्वं चलं गुणवृत्तमिति कापिलसिद्धांताच्च। एवं च यआदौ स्थिर उक्तः स एव जगदित्युक्ते स्थिरे भूमात्मनि जगत्कल्पितमित्युक्तं भवति 'ततश्चात्मैवेदं सर्वं तत्त्वमस्यहं ब्रह्मास्म्ययमात्मा' इत्यादिशाखासिद्धं ब्रह्माद्वैतं प्रतिपादितं भवतीति शिवम् १०००८ ॥ इति नाम्नामष्टाधिकं दशमं शतकं समाप्तम् ॥ १५३ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यथाप्रधानं भगवानिति भक्त्या स्तुतो मया ।
८३५ हर्यक्षः-सिंहस्वरूप, ८३६ ककुभः-सम्पूर्ण दिशास्वरूप, ८३७ वज्री-वज्रधारी, ८३८ शतजिह्वः-सैकड़ों जिह्वावाले, ८३९ सहस्रपात् सहस्रमूर्धा-सहस्रों पैर और मस्तकवाले, ८४० देवेन्द्रः-देवताओं के राजा, ८४१ सर्वदेवमयः-सम्पूर्ण देवस्वरूप, ८४२ गुरुः-सबके ज्ञानदाता ॥ १३२ ॥

सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ।
पवित्रं त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिङ्गलः ॥ १३३ ॥

८४३ सहस्रबाहुः-सहस्रों भूजाओं वाले, ८४४ सर्वाङ्गः-समस्त अङ्गों से सम्पन्नः ८४५ शरण्यः-शरण लेने के योग्य, ८४६ सर्वलोककृत-सम्पूर्ण लोकों को उत्पन्न करने वाले, ८४७ पवित्रम्-परम पावन, ८४८ त्रिककुन्मन्त्रः-त्रिपदा गायत्रीरूप, ८४९ कनिष्ठः-अदिति के पुत्रों में छोटे, वामनरूपधारी विष्णु, ८५० कृष्णपिङ्गलः-श्याम गौर हरि-हर मूर्ति ॥ १३३ ॥

ब्रह्मदण्डविनिर्माता शतघ्नीपाशशक्तिमान् ।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥ १३४ ॥

८५१ ब्रह्मदण्डविनिर्माता-ब्रह्मदण्डका निर्माण करने वाले, ८५२ शतघ्नीपाशशक्तिमान्-शतघ्नी, पाश और शक्तिसे युक्त, ८५३ पद्मगर्भः-ब्रह्मास्वरूप, ८५४ महागर्भः-जगत्‌रूप गर्मको धारण करने वाले होने से महागर्भ, ८५५ ब्रह्मगर्भः-वेद को

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

उदर में धारण करने वाले, ८५६ जलोद्भवः-एकार्णवके जल में प्रकट होने वाले ॥ १३४ ॥

> गभस्तिर्ब्रह्मकृद् ब्रह्मी ब्रह्मविद् ब्राह्मणो गतिः ।
> अनन्तरूपो नैकात्मा तिग्मतेजाः स्वयम्भुवः ॥ १३५ ॥

८५७ गभस्तिः-सूर्यस्वरूप, ८५८ ब्रह्मकृत्-वेदों का आविष्कार करने वाले, ८५९ ब्रह्मी-वेदाध्यायी, ८६० ब्रह्मवित्-वेदार्थवेत्ता, ८६१ ब्राह्मणः-ब्रह्मनिष्ठ, ८६२ गतिः-ब्रह्मनिष्ठों की परमगति, ८६३ अनन्तरूपः-अनन्त रूप वाले, ८६४ नैकात्मा-अनेक शरीरधारी, ८६५ तिग्मतेजाः स्वयम्भुवः-ब्रह्माजी की अपेक्षा प्रचण्ड तेजस्वी ॥ १३५ ॥

> ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ।
> चन्दनी पद्मनालाग्रः सुरभ्युत्तरणो नरः ॥ १३६ ॥

८६६ ऊर्ध्वगात्मा-देश काल-वस्तुकृत उपाधि से अतीत स्वरूपवाले, ८६७ पशुपतिः-जीवों के स्वामी, ८६८ वातरंहाः-वायु के समान वेगशाली, ८३९ मनोजवः-मन के समान वेगशाली, ८७० चन्दनी-चन्दनचर्चित अङ्गवाले, ८७१ पद्मनालाग्रः-पद्मनाल के मूल विष्णुस्वरूप, ९७२ सुरभ्युत्तरणः-सुरभि को नीचे उतारने वाले, ८७३ नरः-पुरुषरूप ॥ १३६ ॥

> कर्णिकारमहास्रग्वी नीलमौलिः पिनाकधृत् ।
> उमापतिरुमाकान्तो जाह्नवीधृदुमाधवः ॥ १३७ ॥

८७४ कर्णिकारमहास्रग्वी-कनेर की बहुत बड़ी माला धारण करने वाले, ८७५ नीलमौलिः-मस्तकपर नीलमणिमयमुकुट धारण करने वाले, ८७६ पिनाकधृत्-पिनाक धनुष को धारण करने वाले, ८७७ उमापतिः-उमा-ब्रह्मविद्या के स्वामी, ८७८ उमाकान्तः-पार्वती के प्राण-प्रियतम, ८७९ जाह्नवीधृत्-गङ्गा को मस्तकपर धारण करने वाले, ८८० उमाधवः-पार्वतीपति ॥ १३७ ॥

> वरो वराहो वरदो वरेण्यः सुमहास्वनः ।
> महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥ १३८ ॥

८८१ वरो वराहः-श्रेष्ठ वराहरूपधारी भगवान, ८८२ वरदः-वरदाता, ८८३ वरेण्यः-स्वामी बनाने योग्य, ८८४ सुमहास्वनः-महान् गर्जना करने वाले, ८८५ महाप्रसादः-भक्तों पर महान् अनुग्रह करने वाले, ८८६ दमनः-दुष्टों का दमन करने वाले, ८८७

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शत्रुहा-शत्रुनाशक,८८८ श्वेतपिङ्गलः-अर्धनारीश्वर वेश में श्वेत-पिङ्गल वर्णवाले ॥ १३८ ॥

पीतात्मा परमात्मा च प्रयतात्मा प्रधानधृत्।
सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणो वरः ॥ १३९ ॥

८८९ पीतात्मा-हिरणमय पुरुष, ८९० परमात्मापरब्रह्म परमेश्वर, ८९१ प्रयतात्मा-विशुद्ध चित्त, ८९२ प्रधानधृत्-जगत् के कारणभूत त्रिगुणमय प्रधान के अधिष्ठानस्वरूप, ८९३ सर्वपार्श्वमुखः-सम्पूर्ण दिशाओं की ओर मुखवाले, ८९४ त्र्यक्षः-त्रिनेत्रधारी, ८९५ धर्मसाधारणो वरः-धर्म-पालन के अनुसार वर देने वाले ॥ १३९ ॥

चराचरात्मा सूक्ष्मात्मा अमृतो गोवृषेश्वरः ।
साध्यर्षिर्वसुरादित्यो विवस्वान् सवितामृतः ॥ १४० ॥

८९६ चराचरात्मा-चराचर प्राणियों के आत्मा, ८९७ सूक्ष्मात्मा-अति सूक्ष्मस्वरूप, ८९८ अमृतो गोवृषेश्वरः-निष्काम धर्म के स्वामी, ८९९ साध्यर्षिः-साध्य देवताओं के आचार्य ९०० आदित्यो वसुः-अदितिकुमार वसु, ९०१ विवस्वान् सवितामृतः-किरणों से सुशोभित एवं जगत् को उत्पन्न करने वाले अमृतस्वरूप सूर्य ॥ १४० ॥

व्यासः सर्गः सुसंक्षेपो विस्तरः पर्ययो नरः ।
ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः ॥ १४१ ॥

९०२ व्यासः-पुराण इतिहास आदि के स्रष्टा वेदव्यासस्वरूप, ९०३ सर्गः सुसंक्षेपो विस्तरः-संक्षिप्त और विस्तृत सृष्टिस्वरूप ९०४ पर्ययो नरः-सब ओर से व्यास करने वाले वैश्वानरस्वरूप, ९०५ ऋतुः-ऋतुरूप, ९०६ संवत्सरः-संवत्सररूप, ९०७ मासः-मासरूप, ९०८ पक्षः-पक्षरूप, ९०९ संख्यासमापनः-पूर्वोक्त ऋतु आदि की संख्या समाप्त करने वाले पर्व (संक्रान्ति, दर्श, पूर्णमासादि) रूप ॥ १४१ ॥

कलाः काष्ठा लवा मात्रा मुहूर्ताहः क्षपाः क्षणाः ।
विश्वक्षेत्रं प्रजाबीजं लिङ्गमाद्यस्तु निर्गमः ॥ १४२ ॥

९१० कलाः, ९११ काष्ठाः, ९१२ लवाः, ९१३ मात्राः-(इत्यादि कालावयवस्वरूप), ९१४ मुहूर्ताहः-क्षपाः-मुहूर्त, दिन और रात्रिरूप, ९१५ क्षणाः-क्षणरूप, ९१६ विश्वक्षेत्रम्-ब्रह्माण्डरूपी वृक्ष के आधार, ९१७ प्रजा-बीजम्-प्रजाओं के कारणरूप,

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

९१८ लिङ्गम्-महत्तत्त्वस्वरूप, ९१९ आद्यो निर्गमः-सबसे पहले प्रकट होने वाले ॥ १४२ ॥

सदसद् व्यक्तमव्यक्तं पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ १४३ ॥

९२० सत्-सत्स्वरूप, ९२१ असत्-असत्स्वरूप, ९२२ व्यक्तम्-साकाररूप, ९२३ अव्यक्तम्-निराकाररूप, ९२४ पिता, ९२५ माता, ९२६ पितामहः ९२७ स्वर्गद्वारम्-स्वर्ग के साधनस्वरूप, ९२८ प्रजाद्वारम्-प्रजा के कारण, ९२९ मोक्षद्वारम्-मोक्ष के साधनस्वरूप, ९३० त्रिविष्टपम्-स्वर्ग के साधनस्वरूप ॥ १४३ ॥

निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परा गतिः ।
देवासुरविनिर्माता देवासुरपरायणः ॥ १४४ ॥

९३१ निर्वाणम्-मोक्षस्वरूप, ९३२ ह्लादनः-आनन्द प्रदान करने वाले, ९३३ ब्रह्मलोकः-ब्रह्मलोकस्वरूप, ९३४ परागतिः-सर्वोत्कृष्ट गतिस्वरूप, ९३५ देवासुरविनिर्माता देवताओं और असुरों के जन्मदाता,९३६ देवासुरपरायणः-देवताओं तथा असुरा- के परम आश्रय ॥ १४४ ॥

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुरगणाश्रयः ॥ १४५ ॥

९३७ देवासुरगुरुः-देवताओं और असुरों के गुरु, ९३८ देवः-परम देवस्वरूप, ९३९ देवासुरनमस्कृतः-देवताओं और असुरों से वन्दित, ९४० देवासुरमहामात्रः-देवताओं और असुरों से अत्यन्त श्रेष्ठ, ९४१ देवासुरगणाश्रयः-देवताओं तथा असुरगणों के आश्रय लेने योग्य ॥ १४५ ॥

देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।
देवातिदेवो देवर्षिर्देवासुरवरप्रदः ॥ १४६ ॥

९४२ देवासुरगणाध्यक्षः-देवताओं तथा असुरगणों के अध्यक्ष, ९४३ देवासुरगणाग्रणीः-देवताओं तथा असुरों के अगुआ, ९४४ देवातिदेवः-देवताओं से बढ़कर महादेव, ९४५ देवर्षिः-नारदस्वरूप, ९४६ देवासुरवरप्रदः-देवताओं और असुरों को भी वरदान देने वाले ॥ १४६ ॥

देवासुरेश्वरो विश्वो देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिन्त्यो देवतात्माऽऽत्मसम्भवः ॥ १४७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

९४७ देवासुरेश्वरः-देवताओं और असुरों के ईश्वर, ९४८ विश्वः-विराट् स्वरूप, ९४९ देवासुरमहेश्वरः-देवताओं और असुरों के महान् ईश्वर, ९५० सर्वदेवमयः-सम्पूर्ण देवस्वरूप, ९५१ अचिन्त्यः-अचिन्त्यस्वरूप, ९५२ देवतात्मा-देवताओं के अन्तरात्मा, ९५३ आत्मसम्भवः-स्वयम्भू ॥ १४७ ॥

उद्भित् त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः ।
ईड्यो हस्तीश्वरो व्याघ्रो देवसिंहो नरर्षभः ॥ १४८ ॥

९५४ उद्भित्-वृक्षादिस्वरूप, ९५५ त्रिविक्रमः-तीनों लोकों को तीन चरणों से नाप लेने वाले भगवान् वामन, ९५६ वैद्यः-वैद्यस्वरूप, ९५७ विरजः-रजोगुणरहितः ९५८ नीरजः-निर्मल, ९५९ अमरः-नाशरहित ९६० ईड्यः-स्तुति के योग्य, ९६१ हस्तीश्वरः-ऐरावत हस्ती के ईश्वर इन्द्रस्वरूप, ९६२ व्याघ्रः-सिंहस्वरूप, ९६३ देवसिंहः-देवताओं में सिंह के समान पराक्रमी, ९६४ नरर्षभः-मनुष्यों में श्रेष्ठ ॥ १४८ ॥

विबुधोऽग्रवरः सूक्ष्मः सर्वदेवस्तपोमयः ।
सुयुक्तः शोभनो वज्री प्रासानां प्रभवोऽव्ययः ॥ १४९ ॥

९६५ विबुधः-विशेष ज्ञानवान्, ९६६ अग्रवरः-यज्ञ में सबसे प्रथम भाग लेने के अधिकारी, ९६७ सूक्ष्मः-अत्यन्त सूक्ष्मस्वरूप, ९६८ सर्वदेवः-सर्वदेवस्वरूप, ९३९ तपोमयः-तपोमयस्वरूप, ९७० सुयुक्तः-भक्तों पर कृपा करने के लिये सब तरह से सदा सावधान रहने वाले, ९७१ शोभनः-कल्याणस्वरूप, ९७२ वज्री-वज्रायुधधारी, ९७३ प्रासानां प्रभवः-प्रास नामक अस्त्र की उत्पत्ति के स्थान, ९७४ अव्ययः-विनाशरहित ।। १४९ ॥

गुहः कान्तो निजः सर्गः पवित्रं सर्वपावनः ।
शृङ्गी शृङ्गप्रियो बभ्रू राजराजो निरामयः ॥ १५० ॥

९७५ गुहः-कुमार कार्तिकेयस्वरूप, ९७६ कान्तः-आनन्द की पराकाष्ठारूप, ९७७ निजः सर्गः-सृष्टि से अभिन्न, ९७८ पवित्रम्-परम पवित्र, ९७९ सर्वपावनः-सबको पवित्र करने वाले, ९८० शृङ्गी-सिंगी नामक बाजा अपने पास रखने वाले, ९८१ शृङ्गप्रियः-पर्वत शिखर को पसंद करने वाले, ९८२ बभ्रुः-विष्णुस्वरूप, ९८३ राजराजः-राजाओं के राजा, ९८४ निरामयः-सर्वथा दोषरहित ॥ १५० ॥

अभिरामः सुरगणो विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ॥ १५१ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

९८५ अभिरामः-आनन्ददायक, ९८६ सुरगणः-देवसमुदायरूप, ९८७ विरामः-सबसे उपरत, ९८८ सर्वसाधनः-सभी साधनों द्वारा साध्य, ९८९ ललाटाक्षः-ललाटमें तीसरा नेत्र धारण करने वाले, ९९० विश्वदेवः-सम्पूर्ण विश्व के द्वारा क्रीडा करने वाले, ९९१ हरिणः-मृगरूप, ९९२ ब्रह्मवर्चसः-ब्रह्मतेजससे सम्पन्न ॥ १५१ ॥

स्थावराणां पतिश्चैव नियमेन्द्रियवर्धनः ।

सिद्धार्थः सिद्धभूतार्थोऽचिन्त्यः सत्यव्रतः शुचिः ॥ १५२ ॥

९९३ स्थावराणां पतिः-पर्वतों के स्वामी हिमाचलादिरूप, ९९४ नियमेन्द्रिय-वर्धनः-नियमों द्वारा मनसहित इन्द्रियों का दमन करने वाले, ९९५ सिद्धार्थः-आप्त-काम,९९३ सिद्धभूतार्थ-जिसके समस्त प्रयोजन सिद्ध हैं, ९९७ अचिन्त्यः-चित्तकी पहुंचसे परे, ९९८ सत्यव्रतः-सत्यप्रतिज्ञ, ९९९ शुचिः-सर्वथा शुद्ध ॥ १५२ ॥

व्रताधिपः परं ब्रह्म भक्तानां परमा गतिः ।

विमुक्तो मुक्ततेजाश्च श्रीमाञ्श्रीवर्धनो जगत् ॥ १५३ ॥

१००० व्रताधिपः-व्रतों के अधिपति, १००१ परम्-परमसर्वश्रेष्ठ, १००२ ब्रह्म-देश, काल और वस्तु से अपरिच्छिन्न चिन्मयतत्त्व, १००३ भक्तानां परमा गतिः-भक्तों के लिए परम गतिस्वरूप, १००४ विमुक्तः-नित्य मुक्त, १००५ मुक्त-तेजाः-शत्रुओं पर तेज छोड़ने वाले, १००६ श्रीमान् योगैश्वर्य से सम्पन्न, १००७ श्रीवर्धनः-भक्तों की सम्पत्ति को बढ़ाने वाले, १००८ जगत्-जगत्स्वरूप ॥ १५३ ॥

यथाप्रधानं भगवानिति भक्त्या स्तुतो मया ।

यन्न ब्रह्मादयो देवा विदुस्तत्त्वेन नर्षयः ॥ १५४ ॥

स्तोतव्यमर्च्यं वन्द्यं च कः स्तोष्यति जगत्पतिम् ।

श्रीकृष्ण ! इस प्रकार बहुत से नामों में से प्रधान-प्रधान नाम चुनकर मैंने उनके द्वारा भक्तिपूर्वक भगवान् शङ्कर का स्तवन किया जिन्हें ब्रह्मा आदि देवता तथा ऋषि भी तत्त्व से नहीं जानते, उन्हीं स्तवन के योग्य, अर्चनीय और वन्दनीय जगत्पति शिव की कौन स्तुति करेगा ॥ १५४ ॥

भक्त्या त्वेवं पुरस्कृत्य मया यज्ञपतिर्विभुः ।

ततोऽभ्यनुज्ञां सम्प्राप्य स्तुतो मतिमतां वरः ॥ १५५ ॥

इस तरह भक्ति के द्वारा भगवान् को सामने रखते हुए मैंने उन्हीं से आज्ञा लेकर उन बुद्धिमानों में श्रेष्ठ भगवान् यज्ञपति की स्तुति की ॥ १५५ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शिवमेभिः स्तुवन् देवं नामभिः पुष्टिवर्धनैः ॥ १५६ ॥

नित्ययुक्तः शुचिर्भक्तः प्राप्नोत्यात्मानमात्मना ॥ १५७ ॥

जो सदा योगयुक्त एवं पवित्र भाव से रहने वाला भक्त इन पुष्टिवर्धक नामों द्वारा भगवान् शिव की स्तुति करता है, वह स्वयं ही उन परमात्मा शिव को प्राप्त कर लेता है ॥ १५६-१५७ ॥

एतद्धि परमं ब्रह्म परं ब्रह्माधिगच्छति ।
ऋषयश्चैव देवाश्च स्तुवन्त्येतेन तत्परम् ॥ १५८ ॥

यह उत्तम वेदतुल्य स्तोत्र परब्रह्म परमात्मस्वरूप शिव को अपना लक्ष्य बनाता है । ऋषि और देवता भी उसके द्वारा उन परमात्मा शिव की स्तुति करते हैं ॥ १५८ ॥

स्तूयमानो महादेवस्तुष्यते नियतात्मभिः ।
भक्तानुकम्पी भगवानात्मसंस्थाकरो विभुः ॥ १५९ ॥

जो लोग मन को संयम में रखकर इन नामों द्वारा भक्तवत्सल तथा आत्मनिष्ठा प्रदान करने वाले भगवान् महादेव की स्तुति करते हैं, उनपर वे बहुत संतुष्ट होते हैं ॥ १५९ ॥

तथैव च मनुष्येषु ये मनुष्याः प्रधानतः ।
आस्तिकाः श्रद्दधानाश्च बहुभिर्जन्मभिः स्तवैः ॥ १६० ॥

भक्त्या ह्यनन्यमीशानं परं देवं सनातनम् ।
कर्मणा मनसा वाचा भावेनामिततेजसः ॥ १६१ ॥

शयाना जाग्रमाणाश्च व्रजन्नुपविशंस्तथा ।
उन्मिषन् निमिषंश्चैव चिन्तयन्तः पुनः पुनः ॥ १६२ ॥

शृण्वन्तः श्रावयन्तश्च कथयन्तश्च ते भवम् ।
स्तुवन्तः स्तूयमानाश्च तुष्यन्ति च रमन्ति च ॥ १६३ ॥

इसी प्रकार मनुष्यों में जो प्रधानतः आस्तिक और श्रद्धालु हैं तथा अनेक जन्मतक की हुई स्तुति एवं भक्ति के प्रभाव से मन, वाणी, क्रिया तथा प्रेमभाव के द्वारा सोते जागते, चलते बैठते और आंखों के खोलते-मीचते समय भी सदा अनन्यभाव से उन परम सनातनदेव जगदीश्वर शिवका बारंबार ध्यान करते हैं, वे अमित तेजसे सम्पन्न

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

हो जाते हैं तथा जो उन्हीं के विषय में सुनते सुनाते एवं उन्हीं की महिमा का कथोपकथन करते हुए इस स्तोत्रद्वारा सदा उनकी स्तुति करते हैं, वे स्वयं भी स्तुत्य होकर सदा संतुष्ट होते हैं और रमण करते हैं ॥ १६०-१६३ ॥

जन्मकोटिसहस्रेषु नानासंसारयोनिषु ।
जन्तोर्विगतपापस्य भवे भक्तिः प्रजायते ॥ १६४ ॥

कोटि सहस्र जन्मों तक नाना प्रकार की संसारी योनियों में भटकते -भटकते जब कोई जीव सर्वथा पापों से रहित हो जाता है, तब उसकी भगवान् शिव में भक्ति होती है ॥ १६४ ॥

उत्पन्ना च भवे भक्तिरनन्या सर्वभावतः ।
भाविनः कारणे चास्य सर्वयुक्तस्य सर्वथा ॥ १६५ ॥

भाग्यसे जो सर्वसाधनसम्पन्न हो गया है, उसको जगत् के कारण भगवान् शिव में सम्पूर्ण भाव से सर्वथा अनन्य भक्ति प्राप्त होती है ॥ १६५ ॥

एतद् देवेषु दुष्प्रापं मनुष्येषु न लभ्यंते ।
निर्विघ्ना निश्चला रुद्रे भक्तिरव्यभिचारिणी ॥ १६६ ॥

रुद्र देव में निश्चल एवं निर्विघ्नरूप से अनन्यभक्ति हो जाये-यह देवताओं के लिए भी दुर्लभ है, मनुष्यों में तो प्रायः ऐसी भक्ति स्वतः नहीं उपलब्ध होती है ॥ १६६ ॥

तस्यैव च प्रसादेन भक्तिरुत्पद्यते नृणाम् ।
येन यान्ति परां सिद्धिं तद्भागवतचेतसः ॥ १६७ ॥

भगवान् शङ्कर की कृपा से ही मनुष्यों के हृदय में उनकी अनन्यभक्ति उत्पन्न होती है, जिससे वे अपने चित्त को उन्हीं के चिन्तन में लगाकर परमसिद्धि को प्राप्त होते हैं ॥ १६७ ॥

ये सर्वभावानुगताः प्रपद्यन्ते महेश्वरम् ।
प्रपन्नवत्सलो देवः संसारात् तान् समुद्धरेत् ॥ १६८ ॥

जो सम्पूर्ण भाव से अनुगत होकर महेश्वर की शरण लेते हैं, शरणागतवत्सल महादेव जी इस संसार से उनका उद्धार कर देते हैं ॥ १६८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

एवमन्ये विकुर्वन्ति देवाः संसारमोचनम्।
मनुष्याणामृते देवं नान्या शक्तिस्तपोबलम्॥ १६९॥

इसी प्रकार भगवान् की स्तुति द्वारा अन्य देवगण भी अपने संसार-बन्धन का नाश करते हैं; क्योंकि महादेव जी की शरण लेने के सिवा ऐसी दूसरी कोई शक्ति या तप का बल नहीं है, जिससे मनुष्यों का संसारबन्धन से छुटकारा हो सके॥ १६९॥

इति तेनेन्द्रकल्पेन भगवान् सदसत्पतिः।
कृत्तिवासाः स्तुतः कृष्ण तण्डिना शुभबुद्धिना॥ १७०॥

श्रीकृष्ण ! यह सोचकर उन इन्द्र के समान तेजस्वी एवं कल्याणमयी बुद्धि वाले तण्डि मुनि ने गजचर्मधारी एवं समस्त कार्यकारण के स्वामी भगवान् शिव की स्तुति की॥ १७०॥

स्तवमेतं भगवतो ब्रह्मा स्वयमधारयत्।
गीयते च स बुद्ध्येत ब्रह्मा शंकरसंनिधौ॥ १७१॥

भगवान् शङ्कर के इस स्तोत्र को ब्रह्माजी ने स्वयं अपने हृदय में धारण किया है। वे भगवान् शिव के समीप इस वेद तुल्य स्तुति का गान करते रहते हैं; अतः सबको इस स्तोत्र का ज्ञान प्राप्त करना चाहिये॥ १७१॥

इदं पुण्यं पवित्रं च सर्वदा पापनाशनम्।
योगदं मोक्षदं चैव स्वर्गदं तोषदं तथा॥ १७२॥

यह परम पवित्र, पुण्यजनक तथा सर्वदा सब पापों का नाश करने वाला है। यह योग, मोक्ष, स्वर्ग और संतोप-सब कुछ देने वाला है॥ १७२॥

एवमेतत् पठन्ते य एकभक्त्या तु शङ्करम्।
या गतिः सांख्ययोगानां व्रजन्त्येतां गतिं तदा॥ १७३॥

जो लोग अनन्य भक्तिभाव से भगवान् शिव के स्वरूपभूत इस स्तोत्र का पाठ करते हैं, उन्हें वही गति प्राप्त होती है, जो सांख्यवेत्ताओं और योगियों को मिलती है॥ १७३॥

स्तवमेतं प्रयत्नेन सदा रुद्रस्य संनिधौ।
अब्दमेकं चरेद् भक्तः प्राप्नुयादीप्सितं फलम्॥ १७४॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जो भक्त भगवान् शङ्कर के समीप एक वर्षतक प्रयत्नपूर्वक इस स्तोत्र का पाठ करता है, वह मनोवाञ्छित फल प्राप्त कर लेता है ॥ १७४ ॥

एतद् रहस्यं परमं ब्रह्मणो हृदि संस्थितम् ।
ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे ॥ १७५ ॥

यह परम रहस्यमय स्तोत्र ब्रह्माजी के हृदय में स्थित है । ब्रह्मा जी ने इन्द्र को इसका उपदेश दिया और इन्द्र ने मृत्यु को ॥ १७५ ॥

मृत्युः प्रोवाच रुद्रेभ्यो रुद्रेभ्यस्तण्डिमागमत् ।
महता तपसा प्राप्तस्तण्डिना ब्रह्मसद्मनि ॥ १७६ ॥

मृत्यु ने एकादश रुद्रों को इसका उपदेश किया । रुद्रों से तण्डिको इसकी प्राप्ति हुई । तण्डिने ब्रह्मलोक में ही बड़ी भारी तपस्या करके इसे प्राप्त किया था ॥ १७६ ॥

तण्डिः प्रोवाच शुक्राय गौतमाय च भार्गवः ।
वैवस्वताय मनवे गौतमः प्राह माधव ॥ १७७ ॥

माधव ! तण्डिने शुक्र को, शुक्र ने गौतम को और गौतम ने वैवस्वतमनुको इसका उपद्रेश दिया ॥ १७७ ॥

नारायणाय साध्याय समाधिष्ठाय धीमते ।
यमाय प्राह भगवान् साध्यो नारायणोऽच्युतः ॥ १७८ ॥

वैवस्वत मनु ने समाधिनिष्ठ और ज्ञानी नारायण नामक किसी साध्यदेवता को यह स्तोत्र प्रदान किया । धर्म से कभी च्युत न होने वाले उन पूजनीय नारायण नामक साध्यदेव ने यम को इसका उपदेश किया ॥ १७८ ॥

नाचिकेताय भगवानाह वैवस्वतो यमः ।
मार्कण्डेयाय वार्ष्णेय नाचिकेतोऽभ्यभाषत ॥ १७९ ॥

वृष्णिनन्दन ! ऐश्वर्यशाली वैवस्वत यम ने नाचिकेत को और नाचिकेत ने मार्कण्डेय मुनि को यह स्तोत्र प्रदान किया ॥ १८० ॥

मार्कण्डेयान्मया प्राप्तो नियमेन जनार्दन ।
तवाप्यहममित्रघ्न स्तवं दद्यां ह्यविश्रुतम् ॥ १८० ॥

शत्रुसूदन जनार्दन ! मार्कण्डेय जी से मैंने नियमपूर्वक यह स्तोत्र ग्रहण किया था । अभी इस स्तोत्र की अधिक प्रसिद्धि नहीं हुई है, अतः मैं तुम्हें इसका उपदेश देता हूं ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्वर्ग्यमारोग्यमायुष्यं धन्यं वेदेन सम्मितम् ।
नास्य विघ्नं विकुर्वन्ति दानवा यक्षराक्षसा ।
पिशाचा यातुधाना वा गुह्यका भुजगा अपि ॥ १८१ ॥

यह वेदतुल्य स्तोत्र स्वर्ग, आरोग्य, आयु तथा धनधान्य प्रदान करने वाला है । यक्ष, राक्षस, दानव, पिशाच, यातुधान, गुह्यक और नाग भी इसमें विघ्न नहीं डाल पाते हैं ॥ १८१ ॥

यः पठेत शुचिः पार्थ ब्रह्मचारी जितेन्द्रियः ।
अभग्नयोगो वर्षं तु सोऽश्वमेधफलं लभेत् ॥ १८२ ॥

(श्री कृष्ण कहते हैं—-) कुन्तीनन्दन युधिष्ठिर ! जो मनुष्य पवित्र भाव से ब्रह्मचर्य पालन पूर्वक इन्द्रियों को संयम में रखकर एक वर्ष तक योगयुक्त रहते हुए इस स्तोत्र का पाठ करता है, उसे अश्वमेध यज्ञ का फल मिलता है ॥ १८२ ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि महादेवसहस्रनामस्तोत्रे सप्तदशोऽध्यायः ॥ १७ ॥

इस प्रकार श्रीमहाभारत अनुशासन पर्व के अन्तर्गत दानधर्मपर्व में महादेवसहस्रनामस्तोत्रविषयक सत्रहवाँ अध्याय पूरा हुआ ॥ १७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

VERSION-2

लिङ्गमहापुराणे

ऋषय ऊचुः ॥

आदित्यवंशं सोमस्य वंशं वंशविदां वर ।
वक्तुमर्हसि चास्माकं संक्षेपाद्रोमहर्षणम् ॥ १ ॥[1]

सूत उवाच ॥

अदितिः सुषुवे पुत्रमादित्यं कश्यपाद्द्विजाः ।
तस्यादित्यस्य चैवासीद् भार्यात्रयमथापरम् ॥ २ ॥[2]

संज्ञा राज्ञी प्रभा छाया पुत्रांस्तासां वदामि वः ।
संज्ञा त्वाष्ट्री च सुषुवे सूर्यान्मनुमनुत्तमम् ॥ ३ ॥[3]

यमं च यमुनां चैव राज्ञी रेवतमेव च ।
प्रभा प्रभातमादित्याच्छायां संज्ञाप्यकल्पयत् ॥ ४ ॥

---

१. अष्टाधिकसहस्रं च तंडिप्रोक्तं निगद्यते ॥ ऋषय आदित्यसोमवंशमपृच्छन्— आदित्येत्यादिना ।

२. तस्यादितिपुत्रस्यादित्यस्य भार्या मुख्यस्त्री अथापरमन्यस्त्रीत्रयं चासीदित्यन्वयः ।

३. तासां संज्ञादिचतसृणाम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

छाया च तस्मात्सुषुवे सावर्णिं भास्करादृद्विजाः ।
ततः शर्निं च तपतीं विष्टिं चैव यथाक्रमम् ॥ ५ ॥

छाया स्वपुत्राभ्यधिकं स्नेहं चक्रे मनौ तदा ।
पूर्वो मनुर्न चक्षाम यमस्तु क्रोधमूर्च्छितः ॥ ६ ॥[1]

संताडयामास रुषा पादमुद्यम्य दक्षिणम् ।
यमेन ताडिता सा तु छाया वै दुःखिताभवत् ॥ ७ ॥

छायाशापात्पदं चैकं यमस्य क्लिन्नमुत्तमम् ।
पूतशोणितसंपूर्णं कृमीणां निचयान्वितम् ॥ ८ ॥[2]

सोपि गोकर्णमाश्रित्य फलकेनानिलाशनः ।
आराधयन्महादेवं यावद्वर्षायुतायुतम् ॥ ९ ॥

भवप्रसादादागत्य लोकपालत्वमुत्तमम् ।
पितृणामाधिपत्यं तु शापमोक्षं तथैव च ॥ १० ॥

लब्धवान्देवदेवस्य प्रभावाच्छूलपाणिनः ।
असहंती पुरा भानोस्तेजोमयमनिंदिता ॥ ११ ॥

रूपं त्वाष्ट्री स्वदेहात्तु छायाख्यां सा त्वकल्पयत् ।
वडवारूपमास्थाय तपस्तेपे तु सुव्रता ॥ १२ ॥

कालात्प्रयत्नतो ज्ञात्वा छायां छायापतिः प्रभुः ।
वडवामगमत्संज्ञामश्वरूपेण भास्करः ॥ १३ ॥

वडवा च तदा त्वाष्ट्री संज्ञा तस्माद्दिवाकरात् ॥
सुषुवे चाश्विनौ देवौ देवानां तु भिषग्वरौ ॥ १४ ॥

---

१. तदापत्यजननानंतरं छाया स्वपुत्रे अभ्यधिकं स्वपुत्राभ्यधिकं मनौ सावर्णिके स्नेहमनुरागं चक्रे पूर्वः प्रथमो वैवस्वतमनुः चक्षाम क्रोधमूर्छितः यमस्तु नेत्यन्वयः ।

२. क्लिन्नं पूयादिना आर्द्रमभवदिति शेषः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

लिखितो भास्करः पश्चात्संज्ञापित्रा महात्मना।
विष्णोश्चक्रं तु यद्घोरं मंडलाद् भास्करस्य तु ॥ १५ ॥[1]

निर्ममे भगवांस्त्वष्टा प्रधानं दिव्यमायुधम्।
रुद्रप्रसादाच्च शुभं सुदर्शनमिति स्मृतम् ॥ १६ ॥

लब्धवान् भगवांश्चक्रं कृष्णः कालाग्निसन्निभम्।
मनोस्तु प्रथमस्यासन्नव पुत्रास्तु तत्समाः ॥ १७ ॥

इक्ष्वाकुर्नभग श्चैव धृष्णुः शर्यातिरेव च।
नरिष्यंतश्च वै धीमान् नाभागोरिष्ट एव च ॥ १८ ॥

करूषश्च पृषध्रश्च नवैते मानवाः स्मृताः।
इला ज्येष्ठा वरिष्ठा च पुंस्त्वं प्राप च या पुरा ॥ १९ ॥

सुद्युम्न इति विख्याता पुंस्त्वं प्राप्ता त्विला पुरा।
मित्रावरुणयोस्त्वत्र प्रसादान्मुनिपुंगवः ॥ २० ॥[2]

पुनः शरवणं प्राप्य स्त्रीत्वं प्राप्तो भवाज्ञया।
सुद्युम्नो मानवः श्रीमान् सोमवंशप्रवृद्धये ॥ २१ ॥[3]

इक्ष्वाकोरश्वमेधेन इला किंपुरुषोऽभवत्।
इला किंपुरुषत्वे च सुद्युम्न इति चोच्यते ॥ २२ ॥[4]

मासमेकं पुमान्वीरः स्त्रीत्वं मासमभूत्पुनः।
इला बुधस्य भवनं सोमपुत्रस्य चाश्रिता ॥ २३ ॥

---

१. लिखितः भ्रमिमारोप्य निर्गलिततेजाः कृत इत्यर्थः। इयं कथा मार्कंडेयपुराणे विस्तरेणोक्ता।

२. इलापुंस्त्वप्रयोजनं कथयति—सुद्युम्न इति। इला पुरा प्रथमतः मित्रावरुणयोः प्रसादात्तत्पुत्रद्वारेत्यर्थः। वसिष्ठप्रभावात्पुंस्त्वप्राप्तिकथा भागवते विस्तरेणोक्ता। पुंस्त्वं प्राप्ता सुद्युम्न इति विख्याता अभवदिति शेषः।

३. पुनस्तदनन्तरं शरवणं तत्संज्ञकशिवक्रीडास्थानं प्राप्तो गतः भवाज्ञया रुद्राज्ञया सोमवंशप्रवृद्धये सुद्युम्नः स्त्रीत्वं प्राप्त इत्यन्वयः। शरवणे देव्याः प्रियचिकीर्षया यः पुरुषस्तत्र गच्छेत्स स्त्री भवेदिति शिवेन वरो दत्तः। इयं कथा भागवतादौ विस्तृता।

४. किंपुरुषः मासानंतरं स्त्रीभावात्कुत्सितपुरुष इत्यर्थः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

बुधेनांतरमासाद्य मैथुनाय प्रवर्तिता ।
सोमपुत्राद्बुधाच्चापि ऐलो जज्ञे पुरुरवाः ॥ २४ ॥

सोमवंशाग्रजो धीमान्भवभक्तः प्रतापवान् ।
इक्ष्वाकोर्वंशविस्तारं पश्चाद्वक्ष्ये तपोधनाः ॥ २५ ॥

पुत्रत्रयमभूत्तस्य सुद्युम्नस्य द्विजोत्तमाः ।
उत्कलश्च गयश्चैव विनताश्वस्तथैव च ॥ २६ ॥[1]

उत्कलस्योत्कलं राष्ट्रं विनताश्वस्य पश्चिमम् ।
गया गयस्य चाख्याता पुरी परमशोभना ॥ २७ ॥

सुराणां संस्थितिर्यस्यां पितृणां च सदा स्थितिः ।
इक्ष्वाकुर्ज्येष्ठदायादो मध्यदेशमवाप्तवान् ॥ २८ ॥

कन्याभावाच्च सुद्युम्नो नैव भागमवाप्तवान् ।
वसिष्ठवचनात्त्वासीत्प्रतिष्ठाने महाद्युतिः ॥ २९ ॥[2]

प्रतिष्ठा धर्मराजस्य सुद्युम्नस्य महात्मनः ।
तत्पुरूरवसे प्रादाद्राज्यं प्राप्य महायशाः ॥ ३० ॥

मानवेयो महाभागः स्त्रीपुंसोर्लक्षणान्वितः ।
इक्ष्वाकोरभवद्वीरो विकुक्षिर्धर्मवित्तमः ॥ ३१ ॥

ज्येष्ठः पुत्रशतस्यासीद्दश पंच च तत्सुताः ।
अभूज्ज्येष्ठः ककुत्स्थश्च ककुत्स्थात्तु सुयोधनः ॥ ३२ ॥

ततः पृथुर्मुनिश्रेष्ठा विश्वकः पार्थिवस्तथा ।
विश्वकस्यार्द्रको धीमान्युवनाश्वस्तु तत्सुतः ॥ ३३ ॥

शावस्तिश्च महातेजा वंशकस्तु ततोभवत् ।
निर्मिता येन शावस्ती गौडदेशे द्विजोत्तमाः ॥ ३४ ॥

---

१. तस्य पुंस्त्वविशिष्टस्य ।
२. भागं मुख्यभागमित्यर्थः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वंशाच्च बृहदश्वोभूत्कुवलाश्वस्तु तत्सुतः ।
धुंधुमारत्वमापन्नो धुंधुं हत्वा महाबलम् ॥ ३५ ॥

धुंधुंमारस्य तनयास्त्रयस्त्रैलोक्यविश्रुताः ।
दृढाश्वश्चैव चंडाश्वः कपिलाश्वश्च ते स्मृताः ॥ ३६ ॥

दृढाश्वश्वस्य प्रमोदस्तु हर्यश्वस्तस्य वै सुतः ।
हर्यश्वस्य निकुंभस्तु संहताश्वस्तु तत्सुतः ॥ ३७ ॥

कृशाश्वोथ रणाश्वश्च संहताश्वात्मजावुभौ ।
युवनाश्वो रणाश्वस्य मांधाता तस्य वै सुतः ॥ ३८ ॥

मांधातुः पुरुकुत्सोभूदंबरीषश्च वीर्यवान् ।
मुचुकुंदश्च पुण्यात्मा त्रयस्त्रैलोक्यविश्रुताः ॥ ३९ ॥

अंबरीषस्य दायादो युवनाश्वोपरः स्मृतः ।
हरितो युवनाश्वस्य हरितास्तु यतः स्मृताः ॥ ४० ॥

एते ह्यंगिरसः पक्षे क्षत्रोपेता द्विजातयः ।
पुरुकुत्सस्य दायादस्त्रसद्दस्युर्महायशाः ॥ ४१ ॥[१]

नर्मदायां समुत्पन्नः संभूतिस्तस्य चात्मजः ।
विष्णुवृद्धः सुतस्तस्य विष्णुवृद्धा यतः स्मृताः ॥ ४२ ॥

एते ह्यंगिरसः पक्षे क्षत्रोपेताः समाश्रिताः ।
संभूतिरपरं पुत्रमनरण्यमजीजनत् ॥ ४३ ॥[२]

रावणेन हतो योऽसो त्रैलोक्यविजये द्विजः ।
बृहदश्वोऽनरण्यस्य हर्यश्वस्तस्य चात्मजः ॥ ४४ ॥

हर्यश्वात्तु दृषद्वत्यां जज्ञे वसुमना नृपः ।
तस्य पुत्रोभवद्राजा त्रिधन्वा भवभावितः ॥ ४५ ॥[३]

---

१. अंगिरसः पक्षे तत्संज्ञक ऋषिगोत्रे क्षत्रात्क्षत्रियकुलादाप्तः प्राप्त इत्यर्थः ।

२. एते विष्णुवृद्धाः ।

३. त्रिधन्वा ब्रह्मसूनोस्तंडिनः शिष्यतां प्राप्य प्रसादादश्वमेधसहस्रस्य फलं प्राप्य तदाज्ञया गणैश्वर्यमनुप्राप्त इति तृतीयेनान्वयः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रसादाद्ब्रह्मसूनोर्वै तंडिनः प्राप्य शिष्यताम् ।
अश्वमेधसहस्रस्य फलं प्राप्य तदाज्ञया ।। ४६ ।।

गणैश्वर्यमनुप्राप्तो भवभक्तः प्रतापवान् ।
कथं चैवाश्वमेधं वै करोमीति विचिंतयन् ।। ४७ ।।[1]

धनहीनश्च धर्मात्मा दृष्टवान् ब्रह्मणः सुतम् ।
तंडिसंज्ञं द्विजं तस्माल्लब्धवान्द्विजसत्तमाः ।। ४८ ।।

नाम्नां सहस्रं रुद्रस्य ब्रह्मणा कथितं पुरा ।
तेन नाम्नां सहस्रेण स्तुत्वा तण्डिर्महेश्वरम् ।। ४९ ।।

लब्धवान्गाणपत्यं च ब्रह्मयोनिर्द्विजोत्तमः ।
ततस्तस्मान्नृपो लब्ध्वा तण्डिना कथितं पुरा ।। ५० ।।

नाम्नां सहस्रं जप्त्वा वै गाणपत्यमवाप्तवान् ।

ऋषय ऊचुः ।।

नाम्नां सहस्रं रुद्रस्य तंडिना ब्रह्मयोनिना ।। ५१ ।।

कथितं सर्ववेदार्थसंचयं सूत सुव्रत ।
नाम्नां सहस्रं विप्राणां वक्तुमर्हसि शोभनम् ।। ५२ ।।

सूत उवाच ।।

सर्वभूतात्मभूतस्य हरस्यामिततेजसः ।
अष्टोत्तरसहस्रं तु नाम्नां शृणुत सुव्रताः ।। ५३ ।।

यज्जप्त्वा तु मुनिश्रेष्ठा गाणपत्यमवाप्तवान् ।
ऊँ स्थिरः स्थाणुः प्रभुर्भानुः प्रवरो वरदो वरः ।। ५४ ।।[2]

---

१. त्रिधन्वनः अश्वमेधफलादिप्राप्तिप्रकारं कथयति—कथमित्यादिना ।
२. यदष्टोत्तरनामसहस्रं गाणपत्यं शिवगणस्वामित्वमित्यर्थः। एतत्स्वराजमहिमा भारतानुशासनपर्वणि उपमन्युना श्रीकृष्णायातीवोक्तः। तदुक्तम्—"इदं ब्रह्मा पुरा कृत्वा

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः ।
जटी दंडी शिखंडी च सर्वगः सर्वभावनः ॥ ५५ ॥[1]

हरिश्च हरिणाक्षश्च सर्वभूतहरः स्मृतः ।
प्रवृत्तिश्च निवृत्तिश्च शांतात्मा शाश्वतो ध्रुवः ॥ ५६ ॥[2]

सर्वलोकपितामहः। सर्वस्तवानां राजत्वे दिव्यानां समकल्पयत्। यतस्तंडिः पुरा प्राप तेन तंडिकृतोभवत् ॥" इति। तत्रत्यनाम्नामत्र प्रायशः साम्यं क्वचिद्भेदः कल्पभेदव्यवस्थया बोध्यः। तदुक्तं मेघवाहनपर्वणि—"दश नामसहस्राणि यान्याह प्रपितामहः। तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतम् ॥" इति। अत्र नाम्नां शब्दतोर्थतश्च पौनरुक्त्येऽपि शब्दार्थभेदान्न पौनरुक्त्यं 'विधिगत एव शब्दः प्रयोक्तव्य' इति मीमांसकनियमात् अन्यथा 'अग्नये जुष्टं निर्वपामि' इत्यत्र वह्न्यादिपदप्रयोगापत्तिर्दुर्वारा। श्रीरुद्रस्यैव विश्वरूपत्वाद्ब्रह्मविष्ण्वादिसर्वशब्दैः स एव प्रतिपाद्यते। तथा च श्रुतयः—"विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ॥ सर्वो ह्येष च यत् ॥ सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु। एवं यो देवानां नामधा एक एव नामानि सर्वाणि यमाविशंति ॥" इति श्रुत्युपवर्णितानंतैश्वर्यसच्चिदानंदैकरसस्य परमशिवस्यानेकार्थानि नामानि कथयति—स्थिर इत्यादिना। सर्वसहस्रनामसु नमःशब्दांतचतुर्थ्यन्तनामप्रयोगस्यैव सर्वसंमतत्वाच्चतुर्थ्यंतनामानि प्रदर्श्यैव व्याख्यायंते। शाब्दशास्त्रस्यानंतत्वाद्यावदर्थज्ञानं तल्लेखनं चाशक्यमतः यत्किंचिच्छब्दार्थाः प्रदर्श्यंते। स्थिरायेति १ तिष्ठतीति स्थिरः कूटस्थत्वाद्गमनवर्जित इत्यर्थः। स्थाणवे २ तिष्ठंत्यस्मिन्निति स्थाणुः। तदुक्तं "संसारमंडपस्यास्य मूलस्तंभाय शंभवे" इति। प्रभवे ३ प्रभुः सर्वस्वामीत्यर्थः। भानवे ४ भासतीति भानुः सूर्यरूपः इत्यर्थः। यद्वा भासयतीति भानुः 'यस्य भासा सर्वमिदं विभाति' इति श्रुतेः। प्रवराय ५ प्रवरः श्रेष्ठः। यद्वा प्रकर्षेण व्रियते चतुर्विधपुरुषार्थार्थिभिः प्रार्थ्यत इत्यर्थः। वरदाय ६ वरान् भक्ताभिलषितान् ददाति वा वरानावरकान्मायाविलासान् द्यति खंडयतीत्यर्थः। वराय ७ वरोऽभीष्टरूपो वा जगदावरक इत्यर्थः।

१. सर्वात्मने ८ सर्वेषामात्मा सर्वात्मा प्रत्यग्रूपः सर्वेषामंतर्यामीत्यर्थः। सर्वविख्याताय ९ सर्वेषां जीवानां विख्यातः नियंतृत्वेन स्वत एव प्रतीयमान इत्यर्थः। सर्वस्मै १० सर्वः विश्वरूप इत्यर्थः। सर्वकराय ११ सर्वं वस्तुजातं करोत्युत्पादयतीति सर्वकरः जगदुपादानभूत इत्यर्थः। "यतो वा इमानि भूतानि जायन्ते" इति श्रुतेः। "कृञो हेतु" इति टः। अयमेवाग्र एतादृशप्रयोगेषु ज्ञेयः। भवाय १२ भवत्यस्मिन्निति भवः प्रातिभासिकजगत्सत्ताधिकरणस्थानभूत इत्यर्थः। जटिने १३ जटा लग्नकचास्तद्वान् जटीत्यर्थः। "जटा लग्नकचे मूले" इति विश्वः। व्रीह्यादित्वादिनिः दंडिने १४ दण्डी दंडविशिष्टः। शिखण्डिने १५ मयूरबर्हः शिखंडः तद्वान् शिखंडी अर्जुनप्रसादावसरे धृतकिरातवपुषो मयूरबर्हमुकुटधारणं भारते उक्तम्। एतदेवोपवर्णितं भारतचंपौ "हेरंबगंडमदपंकविशेषकांकौ स्कंधोपवाह्यशिखिपिच्छविलासचूडौ" इति। सर्वगाय १६ सर्वस्मिन् गच्छतीति सर्वगः। सर्वभावनाय १७ सर्वं विश्वजातं भावयते प्रापयतीति सर्वभावनः सर्वप्रापक इत्यर्थः।

२. हरये १८ हरति पातकजातं स्मृतिमात्रेणापनयतीति हरिः। हरिणाक्षाय १९ हरिणवदक्षिणी यस्य

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

श्मशानवासी भगवान्खचरो गोचरोर्दनः ।
अभिवाद्यो महाकर्मा तपस्वी भूतधारणः ॥ ५७ ॥[1]

उन्मत्तवेषः प्रच्छन्नः सर्वलोकः प्रजापतिः ।
महारूपो महाकायः सर्वरूपो महायशाः ॥ ५८ ॥[2]

महात्मा सर्वभूतश्च विरूपो वामनो नरः ।
लोकपालोऽन्तर्हितात्मा प्रसादोऽभयदो विभुः ॥ ५९ ॥[3]

स हरिणाक्षः विशालनयन इत्यर्थः। सर्वभूतहराय २० सर्वभूतानां हरः सर्वभूतहरः। स्मृताय २१ स्मर्यत इति मुमुक्षुभिः निरंतरं स्मर्यमाण इत्यर्थः। प्रवृत्तये २२ प्रवृत्तिः कर्ममार्गरूपः इत्यर्थः। निवृत्तये २३ निवृत्तिर्मोक्षमार्गरूपः। शांतात्मने २४ शांतानां त्यक्तेषणानामात्मा सततं विद्यमान इत्यर्थः। "यच्चास्य संततो भावस्तस्मादात्मेति गीयते" इति श्रुतेः। शाश्वताय २५ शश्वन्निरंतरं भवतीति शाश्वतः नित्य इत्यर्थः। ध्रुवाय २६ ध्रुवोऽचल इत्यर्थः।

१. श्मशाने सुषुम्नायां वसति तच्छीलः श्मशानवासी। तदुक्तं हठदीपिकायां "सुषुम्ना शून्यपदवी ब्रह्मरन्ध्रं महापथः। श्मशानं शांभवी मध्यमार्गश्चेत्येकवाचका इति। भगवते २८ भगवान् षड्गुणैश्वर्यविशिष्टः। तदुक्तं विष्णुपुराणे 'उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति। खचराय २९ खे हृदयाकाशे चरतीति खचरः। गोचराय ३० गोष्विन्द्रियेषु चरति विषयरूपेण गच्छति वा गोभिः इन्द्रियैश्चरति विषयान् भुंक्त इति गोचर इत्यर्थः। अर्दनाय ३१ अर्दयति पापिनं कालान्तकरूपेण पीडयति वा अर्दति याचति भैक्ष्यचर्यया चरतीत्यर्थः। अभिवाद्याय ३२ अभिवादयितुं योग्योऽभिवाद्यः सर्वेषां नमस्कार्य इत्यर्थः। अभिवाद्याय ३२ अभिवादयितुं योग्योऽभिवाद्यः सर्वेषां नमस्कार्य इत्यर्थः। महाकर्मणे ३३ महज्जगत्सर्जनादिकं कर्म यस्य स महाकर्मा। तपस्विने ३४ तप एव स्वं धनं यस्यास्तीति तपस्वी वा तपोविशिष्टः "तपःसहस्राभ्यां" इति विनिः। भूतधारणाय ३५ भूतानि गगनादीनि धारयतीति भूतधारणः।

२. उन्मत्तवेषाय ३६ उन्मत्तवद्वेषो यस्य स उन्मत्तवेषः। दारुवनस्य ऋषिपरीक्षार्थमागतस्यात्रैवोपवर्णितः। प्रच्छन्नाय ३७ प्रकर्षेणच्छन्नः मायाजवनिकया तिरोहित इत्यर्थः। सर्वलोकाय ३८ सर्वान् लोकयतीति सर्वलोकः सर्वदर्शीत्यर्थः। प्रजापतये ३९ प्रजानां हिरण्यगर्भादीनां पतिः स्वामीत्यर्थः। महारूपाय ४० महदपरिच्छिन्नं रूपं यस्य स महारूपः "महतो महीयान्" इति श्रुतेः। महाकायाय ४१ महान् कायो विराड्रूपं यस्य स महाकायः। सर्वरूपाय ४२ सर्वं दृश्यमात्रं रूपं यस्य सर्वरूपः। महायशसे ४३ महत् सर्वातिशयितं यशो यस्य स महायशाः।

३. महात्मने ४४ महांश्चासावात्मा च महात्मा व्यष्टिजीवपूज्यः समष्टिरूप इत्यर्थः। सर्वभूताय ४५ सर्वं विश्वं भूतमुत्पन्नं यस्मादसौ सर्वभूतः। विरूपाय ४६ विरूपः शरभपक्षिरूप इत्यर्थः। इयं कथात्रैव विस्तारेणोक्ता। वामनाय ४७ वामनो ह्रस्वरूप इत्यर्थः। नराय ४८ नरः पुरुषरूपो वा नरावताररूप इत्यर्थः। लोकपालाय ४९ लोकान् भूरादीन् पालयतीति लोकपालः। अंतर्हितात्मने ५० अंतर्हितः अविद्याकामाहंकारादिना तिरोहितः आत्मा अखंडैकरसस्वरूपं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पवित्रश्च महांश्चैव नियतो नियताश्रयः ।
स्वयंभूः सर्वकर्मा च आदिरादिकरो निधिः ॥ ६० ॥[1]

सहस्राक्षो विशालाक्षः सोमो नक्षत्रसाधकः ।
चन्द्रः सूर्यः शनिः केतुर्ग्रहो ग्रहपतिर्मतः ॥ ६१ ॥[2]

राजा राज्योदयः कर्ता मृगबाणार्पणो धनः ।
महातपा दीर्घतपा अदृश्यो धनसाधकः ॥ ६२ ॥[3]

यस्य सोन्तर्हितात्मा । प्रसादाय ५१ प्रकर्षेण ह्लादयति मोक्षाख्यपरमगतिं प्रापयतीति प्रसादः । यद्वा प्रसादः प्रसन्नतारूप इत्यर्थः अभयदाय ५२ अभयं स्वात्मैक्यं ददातीत्यभयदः । तदुक्तं भागवते—"भयं द्वितीयाभिनिवेशतः स्यात्" इति । विभवे ५३ विभुर्व्यापक इत्यर्थः । "तेनेदं पूर्णं पुरुषेण सर्वम्" इति श्रुतेः ।

१. पवित्राय ५४ पवित्रः पावनः । महते ५५ महान्पूज्य इत्यर्थः । नियताय ५६ नियतः निगृहीतेन्द्रियवृत्तिरित्यर्थः । नियताश्रयाय ५७ नियतो नित्यः आश्रयो यस्य स नियताश्रयः । स्वयंभुवे५८ स्वयमेव भवतीति स्वयंभूः तत्संज्ञकलिंगरूप इत्यर्थः । सर्वकर्मणे ५९ सर्वकर्मा विश्वकर्मरूप इत्यर्थः । आदये ६० आदिः प्रथमः "यो देवानां प्रथमं पुरस्तात्" इति श्रुतेः । आदिकराय ६१ आदिं हिरण्यगर्भं करोतीत्यादिकरः "यो ब्रह्माणं विदधाति पूर्वम्" इति श्रुतेः । निधये ६२ निधिरक्षयः पद्मशंखादिरूप इत्यर्थः ।

२. सहस्राक्षाय ६३ सहस्राण्यपरिमितान्यक्षीणि यस्य स सहस्राक्षः विश्वरूपत्वादित्यर्थः । विशालाक्षाय ६४ विस्तृतचंद्रसूर्यरूपनयनविशिष्ट इत्यर्थः । सोमाय ६५ सोम उमासहित इत्यर्थः । नक्षत्रसाधकाय ६६ न क्षरंति तानि नक्षत्राणि साधयति क्रमशः चन्द्रादिग्रहरूपेणाक्रमतीति नक्षत्रसाधकः । चंद्राय ६७ सूर्याय ६८ शनये ६९ केतवे ७० इमानि तत्तद्ग्रहरूप इति स्पष्टान्येव । ग्रहाय ७१ गृह्णातीति ग्रहः वृष्ट्यवग्रहकारको भौम इत्यर्थः । ग्रहपतये ७२ ग्रहाणां पतिः गुरुरित्यर्थः । मताय ७३ मतो बुध इत्यर्थः ।

३. राज्ञे ७४ राजते परमभासा शोभतीति राजा शुक्र इत्यर्थः । राज्योदयाय ७५ राज्यस्य उदयो यस्मादसौ राज्योदयः राहुरित्यर्थः । अत एव नरपतिजयचर्यारूपस्वरशास्त्रे राहोः प्राधान्यं संगतम् । कर्त्रे ७६ करोतीति कर्ता जगत्सर्जनव्यापाराश्रय इत्यर्थः । मृगबाणार्पणाय ७७ बाणमर्पयतीति बाणार्पणः मृगस्य मृगरूपधारिणो ब्रह्मणः बाणार्पणः मृगबाणार्पणः । एतदेवोपवर्णितं महिम्नस्तोत्रे—"प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा । धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसंतं तेऽद्यापि त्यजति न मृगव्याधरभसः" इति । घनाय ७८ घनो मेघरूपः । महातपसे ७९ महत्सर्वातिशयितं तपो यस्य स महातपाः । दीर्घतपसे ८० दीर्घं चिरकालं तपो यस्य स दीर्घतपाः अजरामरत्वादित्यर्थः । अदृश्याय ८१ न दृश्योऽदृश्यः सर्वेषामतींद्रिय इत्यर्थः । धनसाधकाय ८२ धनं साधयति कामुकभक्तेभ्यः प्रतिपादयतीति धनसाधकः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

संवत्सरः कृतो मंत्रः प्राणायामः परंतपः ।
योगी योगो महाबीजो महारेता महाबलः ॥ ६३ ॥[१]

सुवर्णरेताः सर्वज्ञः सुबीजो वृषवाहन
दशबाहुस्त्वनिमिषो नीलकंठ उमापतिः ॥ ६४ ॥[२]

विश्वरूपः स्वयंश्रेष्ठो बलवीरो बलाग्रणीः ।
गणकर्ता गणपतिर्दिग्वासाः काम्य एव च ॥ ६५ ॥[३]

मंत्रवित्परमो मंत्रः सर्वभावकरो हरः ।
कमंडलुधरो धन्वी बाणहस्तः कपालवान् ॥ ६६ ॥[४]

---

१. संवत्सराय ८३ संवत्सरः प्रभवादिकरूप इत्यर्थः । कृताय ८४ कृतः कृतयुगरूप इत्यर्थः । मंत्राय ८५ मननात्त्रायत इति मंत्रः प्रणवादिरूप इत्यर्थः । प्राणायामाय ८६ प्राणायामो योगांगरूप इत्यर्थः । परंतपाय ८७ परानसुरान्तापयतीति परंतपः । योगिने ८८ योगश्चित्तवृत्तिनिरोधस्तद्विशिष्ट इत्यर्थः । योगाय ८९ योगः समाधिरूपः इत्यर्थः । महाबीजाय ९० महत्पूज्यं बीजं यस्य सः महाबीजः । महारेतसे ९१ महन्महत्तत्वं रेतो यस्य स महारेता इत्यर्थः । महाबलाय ९२ महदतुलं बलं यस्य स महाबलः ।

२. सुवर्णरेतसे ९३ सुवर्णं रेतो यस्य सुवर्णरेताः । सर्वज्ञाय ९४ सर्वं वस्तुजातं जानाति युगपत्पश्यतीति सर्वज्ञः । सुबीजाय ९५ सुशोभनमवंध्यं बीजं वीर्यं यस्य सः सुबीजः वह्निनिक्षिप्तेपि पुत्रजननादित्यर्थः । वृषवाहनाय ९६ वृषो नन्दिकेश्वरः वाहनं यस्य स वृषवाहनः । दशवाहवे ९७ दशबाहुर्दशभुजः । अनिमिषाय ९८ अनिमिषो निमेषरहित इत्यर्थः । नीलकंठाय ९९ नीलकंठो नीलग्रीव इत्यर्थः । उमापतये १०० उमा प्रणवरूपिणी चिच्छक्तिः तस्याः पतिः स्वामी । तदुक्तं पंचाशीतितमे श्रीशिवेन देव्यै—"उकारं च मकारं च अकारं च क्रमेण वै । त्वदीयं प्रणवं विद्धि त्रिमात्रं प्लुतमुत्तमम् ॥" इति । तथाच उम इति देवीप्रणवाददन्तत्वाट्टापि कृते उमेति रूपं ज्ञेयम् । अत एव केनोपनिषदि ब्रह्म विद्यैवोमेत्युक्तम् । इति प्रथमशतकं समाप्तम् ।

३. विश्वरूपाय १ विश्वं रूपं यस्य स विश्वरूपः । स्वयंश्रेष्ठाय २ स्वयमेव श्रेष्ठः अन्यानपेक्ष्यश्रैष्ठ्यविशिष्ट इत्यर्थः । बलवीराय ३ बलेन स्वसामर्थ्येन वीरो विक्रांत इत्यर्थः । बलाग्रण्ये ४ बलेन सामर्थ्येन अग्रणीः स्वभक्तान्सर्वश्रेष्ठस्थानप्रापक इत्यर्थः । गणकर्त्रे ५ गणान् स्वसेवकसंघान्करोति उत्पादयतीति गणकर्ता । गणपतये ६ गणानां प्रभवादीनां पतिः स्वामी । दिग्वाससे ७ दिश एव वासो यस्य स दिग्वासाः । काम्याय ८ कामयितुं स्पृहयितुं योग्यः काम्यः ।

४. मंत्रविदे ९ मंत्रान् सार्धत्रिकोटीन् वेत्तीति मंत्रवित् । परमाय १० परमः सर्वोत्कृष्ट इत्यर्थः । मंत्राय ११ मंत्रो गुप्तसंभाषणीय इत्यर्थः । सर्वभास्कराय १२ सर्वान् भावान् उत्पत्त्यादीन् करोति तच्छीलः सर्वभावकरः । हराय १३ हरति स्मृतिमात्रेण भक्तानिष्टं नाशयतीति हरः । कमंडलुधराय १४ कमंडलोरुदकपात्रस्य धरः कमंडलुधरः । धन्विने १५ धन्वमाजगवं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शरी शतघ्नी खड्गी च पट्टिशी चायुधी महान्।
अजश्च मृगरूपश्च तेजस्तेजस्करो विधिः ॥ ६७ ॥[१]

उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा
दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ॥ ६८ ॥[२]

शृगालरूपः सर्वार्थो मुंडः सर्वशुभंकरः।
सिंहशार्दूलरूपश्च गंधकारी कपर्द्यपि ॥ ६९ ॥[३]

ऊर्ध्वरेतोर्ध्वलिङ्गी च ऊर्ध्वशायी नभस्तलः।
त्रिजटी चीरवासाश्च रुद्रः सेनापतिर्विभुः ॥ ७० ॥[४]

यस्यास्तीति धन्वी। वाणहस्ताय १६ बाणो विष्णुरूपः हस्ते यस्य स बाणहस्तः। तदुक्तं महिम्नि—'रथचरणपाणिः शरः' इति। कपालवते १७ कपालं ब्रह्मकपालं विद्यते यस्य स कपालवान्।

१. शरिणे १८ शरी बाणविशिष्ट इत्यर्थः। शतघ्निने १९ शतघ्नीशक्तिविशिष्ट इत्यर्थः। अत्र व्रीह्यादित्वादिनिः। खड्गिने २० खड्गश्चंद्रहाससंज्ञस्तद्विशिष्ट इत्यर्थः। पट्टिशिने २१ पट्टिशः सरलाकृतिखड्गविशेषस्तद्विशिष्टः। आयुधिने २२ आयुधं स्वकीयासाधारणं शूलं तद्विशिष्ट इत्यर्थः। महते २३ महान् महत्तत्त्वरूप इत्यर्थः। अजाय २४ न जायत इत्यजः पूर्वसिद्ध इत्यर्थः। मृगरूपाय २५ मृगमन्वेष्यं रूपं यस्य स मृगरूप। अत्र घञर्थे कः। तेजसे २६ तेजस्तेजोरूपः। तेजस्कराय २७ तेजः करोतीति तेजस्करः। विधये २८ विधिब्रह्मरूप इत्यर्थः।

२. उष्णीषिणे २९ उष्णीषं शिरोवेष्टनं तद्विशिष्ट इत्यर्थः। उष्णीषवत्त्वं सद्योजाताद्यवतारेष्वेवोक्तम्। सुवक्त्राय ३० शोभनं वक्त्रं मुखं यस्य स सुवक्त्रः। उदग्राय ३१ उदग्रः ऊर्जितरूप इत्यर्थः। विनताय ३२ विनतो नम्र इत्यर्थः। दीर्घाय ३३ दीर्घोऽत्युच्च इत्यर्थः। हरिकेशाय ३४ हरिर्विष्णुः कः ब्रह्मा तयोरीशः स्वामीत्यर्थः। सुतीर्थाय ३५ शोभनानि तीर्थानि पुष्कराद्यादीनि यस्मादसौ सुतीर्थः। कृष्णाय ३६ कृष्णः कृष्णवर्णविशिष्टः तत्तु अघोरावतारे अस्मिन्नेवोक्तम्।

३. शृगालरूपाय ३७ शृगालेन तत्संज्ञकदैत्यहननहेतुना रूप्यते प्रशस्यत इति शृगालरूपः। तदुक्तं द्विनवतितमे (९२.९५) "पुरा जंबुकरूपेण असुरो देवकंटकः। निहतो हिमवत्पुत्रि जंबुकेशस्ततो ह्यहम् ॥" इति। सर्वार्थाय ३८ सर्वे धनादयोर्थाः यस्मादसौ सर्वार्थः। मुंडाय ३९ मुंडः परिव्राड्रूप इत्यर्थः। सर्वशुभंकराय, ४० सर्वस्मिन् शुभं भक्तकल्याणं करोतीति सर्वशुभंकरः। यद्वा सर्वेषां शुभंकरः कल्याणकर्तेत्यर्थः। बाहुलकात्खच्। सिंहशार्दूलरूपाय ४१ सिंहः शार्दूलो व्याघ्रः तौ देवीवाहनभूतौ रूपयति प्रशंसतीति सिंहशार्दूलरूपः। गंधकारिणे ४२ गंधान्कस्तूर्यादीन्करोतीति गंधकारी। कपर्दिने ४३ कपर्दो जटाजूटस्तद्विशिष्ट इत्यर्थः।

४. ऊर्ध्वरेतसे ४४ ऊर्ध्वरेता अविप्लुतब्रह्मचर्य इत्यर्थः। संधिरार्षः। उर्ध्वलिंगिने ४५ ऊर्ध्वं सर्वोपरि लिंगं यस्यास्तीति ऊर्ध्वलिंगी। ऊर्ध्वशायिने ४६ ऊर्ध्वमंतरिक्षे शेते तच्छील ऊर्ध्वशायी। नभसे ४७ नभो गगनरूप इत्यर्थः तलाय ४८ तलः पातालरूप इत्यर्थः। त्रिजटिने

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अहोरात्रं च नक्तं च तिग्ममन्युः सुवर्चसः ।
गजहा दैत्यहा कालो लोकपाता गुणाकरः ॥ ७१ ॥[1]

सिंहशार्दूलरूपाणामार्द्रचर्मांबरंधरः ।
कालयोगी महानादः सर्वावासश्चतुष्पथः ॥ ७२ ॥[2]

निशाचरः प्रेतचारी सर्वदर्शी महेश्वरः ।
बहु भूतो बहुधनः सर्वसारोऽमृतेश्वरः ॥ ७३ ॥[3]

नृत्यप्रियो नित्यनृत्यो नर्तनः सर्वसाधकः ।
सकार्मुको महाबाहुर्महावीरो महातपाः ॥ ७४ ॥[4]

---

४९ त्रयाणां सत्त्वादिगुणानां जटा मूलं त्रिजटा प्रकृतिर्यस्यास्तीति त्रिजटी "जटा लग्नकचे मूले" इति विश्वः। चीरवाससे ५० चीरं वस्त्रं वा वल्कलं वासो यस्य स चीरवासाः रुद्राय ५१ रोदयतीति रुज्जन्ममरणादिदुःखं तद्द्रावयति दूरीकरोतीति रुद्रः सेनायै ५२ सेनादेवसेनारूप इत्यर्थः। पत्ये ५३ पतिः पालक इत्यर्थः। विभवे ५४ विशेषेण भवति स्वाविर्भावान्करोतीति विभुः।

१. अहोरात्राय ५५ अहश्च रात्रिश्चानयोः समाहारः अहोरात्रं तद्रूप इत्यर्थः। नक्ताय ५६ नक्तव्रतरूप इत्यर्थः। तिग्ममन्यवे ५७ तिग्मः तीक्ष्णो मन्युर्यस्य स तिग्ममन्युः। सुवर्चसाय ५८ शोभनं वर्चो दीप्तिर्यस्य स सुवर्चसः। अत्र योगविभागात्समासांतोऽच्। गजघ्ने ५९ गजं गजासुरं हन्ति इति गजहा। दैत्यघ्ने ६० दैत्यान्दितिपुत्रान् हंतीति दैत्यहा। कालाय ६१ कालो निमेषादिरूप इत्यर्थः। लोकधात्रे ६२ लोकानां चतुर्दशभुवनानां धाता आधारभूत इत्यर्थः। गुणाकराय ६३ गुणानां षोडशाध्यायोक्तयोगादिगुणानां वा नैयायिकोक्तरूपादिचतुर्विंशतिगुणानामाकरः खनीभूत इत्यर्थः।

२. सिंहशार्दूलरूपाणामार्द्रचर्मांवरंधराय ६४ सिंहशार्दूलरूपा ये स्वभक्ताः तेषां चार्द्रं सद्य उद्धृतं यच्चर्म तदंबरं धरतीति धरः। कालयोगिने ६५ कालवंचको योगी कालयोगी। महानादाय ६६ महानत्युच्चः नादो यस्य स महानादः। सर्वावासाय ६७ सर्वस्य विश्वस्यावासो वसतिस्थानमित्यर्थः। चतुष्पथाय ६८ चतुर्णां धर्मादिपुरुषार्थानां पंथाः मार्गरूपः। यद्वा चत्वारः ब्रह्मचर्यादयः पंथानो यस्मादिति चतुष्पथः।

३. निशाचराय ६९ निशायां रात्रौ चरतीति निशाचरः निर्ऋत्यादिरक्षोरूप इत्यर्थः। प्रेतचारिणे ७० प्रेतेन चरति तच्छीलः प्रेतचारी चामुंडारूपः 'चामुंडा शववाहना इत्युक्तत्वात्। सर्वदर्शिने ७१ सर्वं पश्यतीति सर्वदर्शी। महेश्वराय ७२ महांतो ब्रह्मेन्द्रादय ईश्वराः यस्मात्स महेश्वरः। बहुने ७३ बहुः अनेकरूप इत्यर्थः। भूताय ७४ भूतोऽतीतकालरूप इत्यर्थः। बहुधनाय ७५ बहु अपरिमितं धनं यस्मादसौ बहुधनः। सर्वसाराय ७६ सर्वस्य सारो बलरूप इत्यर्थः। "सारो बले स्थिरांशे च" इत्यमरः। अमृतेश्वराय ७७ अमृतस्य मोक्षस्येश्वरः अमृतेश्वरः।

४. नृत्यप्रियाय ७८ नृत्यं नर्तनं तांडवरूपं प्रियं यस्य स नृत्यप्रियः। नित्यनृत्याय ७९ नित्यं सततं नृत्यं यस्य स नित्यनृत्यः। नर्तनाय ८० नर्तयतीति नर्तनः सर्वप्रेरक इत्यर्थः। सर्वसाधकाय ८१

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

महाशरो महापाशो नित्यो गिरिचरोऽमतः ।
सहस्रहस्तो विजयो व्यवसायो ह्यनिन्दितः ॥ ७५ ॥[1]

अमर्षणो मर्षणात्मा यज्ञहा कामनाशनः ।
दक्षहा परिचारी च प्रहसो मध्यमस्तया ॥ ७६ ॥[2]

तेजोपहारी बलवान्विदितोऽभ्युदितोऽबहुः ।
गंभीरघोषो योगात्मा यज्ञहा कामनाऽशनः ॥ ७७ ॥[3]

सर्व साधयति सिद्धिं प्रापयतीति सर्वसाधकः सकार्मुकाय ८२ सकार्मुको धनुः सहित इत्यर्थः। महाबाहवे ८३ महांतःबाहवो यस्य स महाबाहुः। महावीराय ८४ महांश्चासौ वीरश्च महावीरः महाप्रलयकारक इत्यर्थः। महातपसे ८५ महत्तपो यस्य स महातपाः।

१. महाशराय ८६ महान् त्रिपुरदाहकः शरो यस्य स महाशरः। महापाशाय ८७ महान्पाशः मायारूपो यस्य स महापाशः। नित्याय ८८ नित्यो ध्वंसाप्रतियोगी इत्यर्थः। गिरिचराय ८९ गिरिषु कैलासादिषु चरतीति गिरिचरः। अमताय ९० अमतो विकृताकृतिधारणाद्दारुवनस्थ-ऋष्यादिभिरज्ञात इत्यर्थः। सहस्रहस्ताय ९१ सहस्रहस्तोऽसंख्यातबाहुरित्यर्थः। विजयाय ९२ विशेषेण जयो रामपार्थादीनां यस्माद्यत्प्रसादादसौ विजयः। व्यवसायाय ९३ विशेषेण अवसीयते मुनिभिर्निश्चीयते इति व्यवसायः। अनिंदिताय ९४ न निंदितोऽनिंदितः सर्वदोषरहित इत्यर्थः।

२. अमर्षणाय ९५ नास्ति मर्षणं यस्य सोऽमर्षणः पापादितितिक्षाशून्य इत्यर्थः। मर्षणात्मने ९६ मर्षणो भक्तापराधतितिक्षुरात्मा स्वभावो यस्य स मर्षणात्मा। यज्ञघ्ने ९७ यज्ञं मृगरूपेण दक्षं मखे धावंतं हन्तीति यज्ञहा। कामनाशनाय ९८ कामः नश्यत्यनेन कामनाशनः। दक्षघ्ने ९९ दक्षं दक्षप्रजापतिं हंतीति दक्षहा। परिचारिणे २०० परितःसर्वतः चरणशीलःपरिचारी। द्वितीयं शतकं समाप्तम्। प्रहसाय १ प्रकर्षेण हसतीति प्रहसः। तदुक्तं शिवकवचे —"स्फुटाट्टहासोच्चलितांडकोशः" इति। मध्यमाय २ मध्ये मध्यशरीरे भवतीति मध्यमो रुद्ररूपः। तदुक्तं पाद्मे—"मध्यतो रुद्रमीशानम्"इति।

३. तेजसे ३ तेजो वह्निरूपः। "रुद्रो वा एष यदग्निः" इति श्रुतेः। अपहारिणे ४ अपहरति तच्छीलः अपहारी सकलजगदपहारक इत्यर्थः। बलवते ५ बलं शरीरसामर्थ्यं विद्यते यस्य स बलवान्। विदिताय ६ वित् ब्रह्मज्ञानं संजातं यस्य स विदितः ब्रह्मविद्रूपः। "ब्रह्मविद्ब्रह्मैव भवति" इति श्रुतेः। अभ्युदिताय ७ अभितः अरूपमस्तमित्यादि निषेधमुखेनैव उदितः वेदैरप्युक्त इत्यर्थः। अबहवे ८ अवहुरेकरूपः। "एकं सद्विप्रा बहुधा वदंति" इति श्रुतेः। गंभीरघोषाय ९ गंभीरः घोषो यस्य स गंभीरघोषः समुद्ररूप इत्यर्थः। योगात्मने १० योगः समाधिरात्मा स्वरूपं यस्य स योगात्मा यज्ञघ्ने १२ यज्ञं दक्षयागं हंतीति यज्ञहा। कामनायै १२ कामना मुमुक्षा तद्रूप इत्यर्थः। अशनाय १३ अश्नातीत्यशनः। नन्द्यादित्वाल्ल्युः। सर्वजगद्भक्षक इत्यर्थः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

गंभीररोषो गंभीरो गंभीरबलवाहनः ।
न्यग्रोधरूपो न्यग्रोधो विश्वकर्मा च विश्वभुक् ॥ ७८ ॥[१]

तीक्ष्णोपायश्च हर्यश्वः सहायः कर्मकालवित् ।
विष्णुः प्रसादितो यज्ञः समुद्रो वडवामुखः ॥ ७९ ॥[२]

हुताशनसहायश्च प्रशांतात्मा हुताशनः ।
उग्रतेजा महातेजा जयो विजयकालवित् ॥ ८० ॥[३]

ज्योतिषामयनं सिद्धिः संधिर्विग्रह एव च ।
खड्गी शंखी जटी ज्वाली खचरो द्युचरो बली ॥ ८१ ॥[४]

---

१. गंभीररोषाय १४ गंभीरोऽपारो रोषो यस्य स गंभीररोषः। गंभीराय १५ गंभीरोऽक्षोभ्य इत्यर्थः। गंभीरबलवाहनाय १६ गंभीरमक्षोभ्यं बलवाहनं यस्य स गंभीरबलवाहनः। न्यग्रोधरूपाय १७ न्यग्नीचैः रोहतीति न्यग्रोधः संसारवृक्षस्तं रूपयंति उत्पादयतीति न्यग्रोधरूपः। न्यग्रोधाय १८ न्यग्रोधो वटवृक्षस्वरूप इत्यर्थः। विश्वकर्मणे १९ विश्वं ब्रह्मांडं कर्म यस्य स विश्वकर्मा। विश्वभुजे २० विश्वं भुनक्ति पालयतीति विश्वभुक्।

२. तीक्ष्णाय २१ तीक्ष्णो निशितरूपः। अपायाय २२ अपगतः आयोऽभक्तधनादिप्राप्तिरूपो यस्मादसौ अपायः। हर्यश्वाय २३ हरिर्विष्णुरश्वो वाहनं यस्य स हर्यश्वः। सहायाय २४ सहायः स्वभक्तसाह्यकर इत्यर्थः। कर्मणे २५ कर्म इष्टापूर्तादि तद्रूप इत्यर्थः। कालविदे २६ कालं सर्वेषामिष्टानिष्टसमयं वेत्तीति कालवित् विष्णवे २७ विष्णुस्तत्संज्ञकपालकमूर्तिः प्रसादिताय २८ प्रसादितोऽसुरादिभयवारणार्थं देवैः स्तुत इत्यर्थः। यज्ञाय २९ यज्ञो देवपूजारूपः। समुद्राय ३० समुद्रः सागररूप इत्यर्थः। वडवामुखाय ३१ वडवामुखः समुद्रजलशोषकाग्निरूपः।

३. हुताशनसहायाय ३२ हुताशनस्य वह्नेः सहायो वायुरुपः। प्रशांतात्मने ३३ प्रशांतः आत्मा स्वरूपं यस्य स प्रशांतात्मा। हुताशनाय ३४ हुतं विधिवत्प्रक्षिप्तं हविः अश्नातीति हुताशनः। उग्रतेजसे ३५ उग्रं दाहकं तेजो यस्य स उग्रतेजाः बंहुरूप इत्यर्थः। महातेजसे ३६ महद्विश्वप्रकाशकं तेजो यस्य स महातेजाः सूर्यरूप इत्यर्थः। जयाय ३७ जयो जयरूपः। विजयकालविदे ३८ विजयकालं वेत्तीति विजयकालवित्।

४. ज्योतिषामयनाय ३९ ज्योतिषामयनं स्थानभूतः। सिद्धये ४० सिद्धिरीप्सितफलप्राप्तिस्तद्रूपः। संधये ४१ संधिः शत्रोर्मैत्रीकरणं तद्रूपः। विग्रहाय ४२ विग्रहः कलहस्तद्रूपः। खड्गिने ४३ खड्गस्तत्संज्ञको मृगस्तद्विशिष्ट इत्यर्थः। शंखिने ४४ शंखी शंखविशिष्ट इत्यर्थः। जटिने ४५ जटा जगन्मूलं यस्मिन्नस्तीति जटी। ज्वालिने ४६ ज्वालाः संति यस्मिन्निति ज्वाली अर्चिरादिमार्गरूपः। खचराय ४७ खे आकाशे चरतीति खचरः। द्युचराय ४८ दिवि चरतीति द्युचरः। बलिने ४९ बलं सैन्यं यस्यास्तीति बली।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वैणवी पणवी कालः कालकंठः कटंकटः ।
नक्षत्रविग्रहो भावो निभावः सर्वतोमुखः ॥ ८२ ॥[१]

विमोचनस्तु शरणो हिरण्यकवचोद्भवः ।
मेखलाकृतिरूपश्च जलाचारः स्तुतस्तथा ॥ ८३ ॥[२]

वीणी च पणवी ताली नाली कलिकटुस्तथा ।
सर्वतूर्यनिनादी च सर्वव्याप्यपरिग्रहः ॥ ८४ ॥[३]

व्यालरूपी विलावासी गुहावासी तरंगवित् ।
वृक्षः श्रीमालकर्मा च सर्वबंधविमोचनः ॥ ८५ ॥[४]

---

१. वैणविने ५० वैणवं वेणुवाद्यं यस्यास्तीति वैणवी। पणविने ५१ पणवस्तत्संज्ञकवाद्यं यस्यास्तीति पणवी । कालाय ५२ कालो मृत्युरूपः। कालकंठाय ५३ कालः कृष्णवर्णः कंठो यस्य स कालकण्ठः। कटंकटाय ५४ कटं गजाननमस्तकं टति प्रेम्णा वरयतीति कटंकटः। नक्षत्रविग्रहाय ५५ नक्षत्राणि विग्रहे यस्य स नक्षत्रविग्रहः शिशुमाररूप इत्यर्थः। भावाय ५६ भावः श्रद्धारूप इत्यर्थः निभावाय ५७निभावो जगदात्यंतिकसत्ता यस्मादसौ निभावः ।सर्वतोमुखाय ५८ सर्वतः मुखानि यस्य स सर्वतोमुखः "विश्वतश्चक्षुरुत विश्वतोमुखः" इति श्रुतेः ।

२. विमोचनाय ५९ विशेषेण मोचयतीति विमोचनः चतुर्विंशतितत्त्वबंधमोचक इत्यर्थः। शरणाय ६० शरणो भक्तजनरक्षकः। हिरण्यकवचोद्भवाय ६१ हिरण्यकवचो हिरण्यगर्भस्तस्य उद्भव उत्पत्तिर्यस्मादसौ हिरण्यकवचोद्भवः। मेखलायै ६२ मेखला लिंगपरिणालिका तद्रूपः। कृतिरूपाय ६३ कृतिर्यत्नः रूपं यस्य स कृतिरूपः। जलाचाराय ६४ आ समंताच्चारः संचारो आचारः जलस्य भागीरथ्युदकस्य आचारो यस्मिन्नसौ जलाचारः। स्तुताय ६५ स्तुतो भगीरथादिकृतस्तुतिविषयः।

३. वीणिने ६६ वीणी वीणावाद्यविशिष्टः। पणविने ६७ पणो व्यवहारः तं वाति गच्छतीति पणवः सोस्यास्तीति पणवी । तालिने ६८ तालाख्यवाद्य विशिष्टः "वाद्यभांडे तु कांसस्य तालं" इति विश्वः। नालिने ६९ नालं सरोजदंडः अस्ति यस्येति नालो पद्मनाभत्वाद्वा पद्महस्तत्वादित्यर्थः। कलिकटवे ७० कलेः कलियुगस्य कटुः अप्रियः तद्धर्मनिवारकत्वादित्यर्थः। सर्वतूर्यनिनादिने ७१ सर्वतूर्याणि वाद्यानि निनादयति वादयति तच्छीलः सर्वतूर्यनिनादी। सर्वव्याप्यपरिग्रहाय ७२ सर्वव्याप्यः सर्वसूक्ष्मः परिग्रहो यस्य स सर्वव्याप्यपरिग्रहः। "अणोरणीयान्" इति श्रुतेः।

४. व्यालरूपिणे ७३ व्यालरूपं वासुकिरूपं यस्यास्तीति व्यालरूपी। बिलवासिने ७४ बिले पाताले आवसतीति विलावासी। गुहावासिने ७५ गुहायां बुद्धौ वसति तच्छीलः गुहावासी। तरंगविदे ७६ तरंगान् समुद्राद्यूर्मीन् वेत्तीति तरंगवित्। वृक्षाय ७७ वृक्षो बिल्वसंज्ञक इत्यर्थः। श्रीमालकर्मणे ७८ श्रीमालं लक्ष्मीक्षेत्रं कर्म पूजादिकं यस्य स श्रीमालरूपो। "मालं क्षेत्रे जले"इति विश्वः। सर्वबंधविमोचनाय ७९ सर्वबंधा अविद्याकामादिरूपाः मुच्यंतेऽनेनेति सर्वबंधविमोचनः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

बंधनस्तु सुरेन्द्राणां युधि शत्रुविनाशनः ।
सखा प्रवासो दुर्वापः सर्वसाधुनिषेवितः ॥ ८६ ॥[१]

प्रस्कंदोप्यविभावश्च तुल्यो यज्ञविभागवित् ।
सर्ववासः सर्वचारी दुर्वासा वासवो मतः ॥ ८७ ॥[२]

हैमो हेमकरो यज्ञः सर्वधारी धरोत्तमः ।
आकाशो निर्विरूपश्च विवासा उरगः खगः ॥ ८८ ॥[३]

भिक्षुश्च भिक्षुरूपी च रौद्ररूपः सुरूपवान् ।
वसुरेताः सुवर्चस्वी वसुवेगो महाबलः ॥ ८९ ॥[४]

---

१. बंधनाय ८० बंधयत्यविद्यादिनाऽभक्तान् बंधयुक्तान् कारयतीति बंधनः । सुरेन्द्राणां युधि शत्रुविनाशनाय ८१ सुरेन्द्राणां देवस्वामिनां युधि संग्रामे शत्रून्दैत्यादीन् विनाशयति पराभावयतीति शत्रुविनाशनः । सख्ये ८२ सखा जीवस्य मित्रम् "सुपर्णावेतौ सदृशौ सखायौ" इति श्रुतेः । प्रवासाय ८३ प्रकर्षेण वासो यस्मिन्निति प्रवासः सकलनिवासभूत इत्यर्थः । दुर्वापाय ८४ दुःखेनातिकृच्छ्रेण वाप्तुं मनोनिर्वापं कर्तुं योग्यो दुर्वापः । वयधातोर्णिजंतात्खल् । सर्वसाधुनिषेविताय ८५ सर्वसाधुभिः निषेवितः अत्यंतसेवित इत्यर्थः ।

२. प्रस्कंदाय ८६ प्रकर्षेण स्कंदयति ब्रह्मादीनपि स्वस्थानेभ्यः चालयतीति प्रस्कंदः । अविभावाय ८७ न विभावः विशिष्टैश्वर्यं यस्मादित्यविभावः । तुल्याय ८८ तुल्यो निष्पक्षपातः । यज्ञविभागविदे ८९ यज्ञविभागानग्निष्टोमादिसर्वक्रतुभेदान् जानातीति यज्ञविभागवित् । सर्ववासाय ९० सर्वं वास्यते वेष्ट्यते अनेनेति सर्ववासः । "ईशा वास्यमिदं सर्वम्" इति श्रुतेः । सर्वचारिणे ९१ सर्वस्मिन् चरतीति सर्वचारी । दुर्वाससे ९२ दुर्वासास्तत्संज्ञकमुनिरूप इत्यर्थः । वासवाय ९३ वासव इंद्ररूपः । मताय ९४ मतोऽद्वैतादिमतरूपः ।

३. हैमाय ९५ हैमः सुवर्णविकाररूपः । हेमकराय ९६ हेम सुवर्णं करोति तच्छीलः हेमकरः । यज्ञाय ९७ यज्ञः संगतिकरणः तद्रूपः । सर्वधारिणे ९८ सर्वमनंतब्रह्मांडसमूहं धरति तच्छीलो सर्वधारी । धरोत्तमाय ९९ धरेषु धारणकर्तृषु शेषादिष्वपि उत्तमः श्रेष्ठः तेषामपि धारणकर्तृत्वादित्यर्थः । आकाशाय ३०० अतिशयेन काशते दीप्यते इत्याकाशः । इति तृतीयशतकं समाप्तम् ॥ निर्विरूपाय १ निर्गतं विरूपं शरभपक्षिरूपं यस्मादसौ निर्विरूपः । विवाससे २ विशिष्टं सर्वश्रेष्ठं वासो यस्य वा विगतं वासः आच्छादकं यस्य स विवासः । उरगाय ३ उरसा गच्छतीत्युरगः सर्परूप इत्यर्थः । खगाय ४ खे गगने गच्छतीति खगः पक्षिरूप इत्यर्थः ।

४. भिक्षवे ५ भिक्षुः संन्यस्तरूपः । भिक्षुरूपिणे ६ भिक्षुं संन्यासिनं रूपयति प्रशंसतीति भिक्षुरूपी । रौद्ररूपाय ७ रौद्रं भयंकरं रूपं यस्य स रौद्ररूपः । सुरूपवते ८ सुरूपं शांत रूपं विद्यते यस्य स सुरूपवान् "तस्यैते तनुवौ घोरान्या शिवान्या" इति श्रुतेः । वसुरेतसे ९ वसु हाटकं रेतो यस्य स वसुरेताः । "वसु हाटकेषु च" इति विश्वः । सुवर्चस्विने १० शोभनं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मनो वेगो निशा चारः सर्वलोकशुभप्रदः ।
सर्वावासी त्रयीवासी उपदेशकरो धरः ॥ ९० ॥[1]

मुनिरात्मा मुनिर्लोकः सभाग्यश्च सहस्त्रभुक् ।
पक्षी च पक्षरूपश्च अतिदीप्तो निशाकरः ॥ ९१ ॥[2]

समीरो दमनाकारो ह्यर्थो ह्यर्थकरो वशः ।
वासुदेवश्च देवश्च वामदेवश्च वामनः ॥ ९२ ॥[3]

सिद्धियोगापहारी च सिद्धः सर्वार्थसाधकः ।
अक्षुण्णः क्षुण्णरूपश्च वृषणो मृदुरव्ययः ॥ ९३ ॥[4]

वर्चोस्ति यस्य स सुवर्चस्वी । वसुवेगाय ११ वसुना धनेन वेगयति वेगविशिष्टान् करोतीति वसुवेगः । महाबलाय १२ महद्बलं सैन्यं यस्य स महाबलः ।

१. मनसे १३ मनोरूप इत्यर्थः । वेगाय १४ वेगः शैघ्र्यरूपः । निशायै १५ निशा रात्रिरूपः । चराय १६ चारः प्राणिनां शुभाशुभनिरीक्षणार्थं गुप्तसंचारकारक इत्यर्थः । सर्वलोकशुभप्रदाय १७ सर्वं कोहं कस्मादिह आयात इत्यादि लोकयंति विचारयंति ते सर्वलोकाः तेषां शुभं परमसुखं प्रददातीति सर्वलोकशुभप्रदः । सर्वावासिने १८ सर्वत्र आवसति तच्छीलः सर्वावासी । त्रयीवासिने १९ त्रय्यां वेदत्रय्याम् आवसति तच्छीलः त्रयीवासी । उपदेशकराय २० उपदेशं करोति तच्छीलः उपदेशकरः गुरुरूप इत्यर्थः । अधराय २१ नास्ति धरो धारको यस्य सोऽधरः ।

२. मुनये २२ मननशीलो मुनिः । आत्मने २३ आत्मा देशकालाद्यवच्छेदशून्यः । मुनये २४ मुनिरगस्तिवृक्षरूपः "मुनिर्यतींगुदीबुद्धपिप्पलागस्तिकिंशुके" इति विश्वः । लोकाय २५ लोको भुवनरूपः । सभाग्याय २६ भाग्यमचिंत्यैश्वर्यं तत्सहितः सभाग्यः । सहस्त्रभुजे २७ सहस्त्रं अनंतजीवसमुदायं भुनक्ति भुंक्ते भक्षयति पालयति वेति सहस्त्रभुक् । पक्षिणे २८ पक्षी ऋक्साम्नी यस्य स्तः स पक्षी । "ऋक् दक्षिणः पक्षः सामोत्तरः" इति श्रुतेः । पक्षरूपाय २९ पक्षौ शुक्लकृष्णसंज्ञौ रूपे यस्य स पक्षरूपः । अतिदीप्ताय ३० अति अत्यंतं दीप्तः सूर्यरूपः । निशाकराय ३१ निशायां कराः किरणा यस्य स निशाकरः । चंद्ररूप इत्यर्थः ।

३. समीराय ३२ सम्यगीरयति जगत्प्रेरयतीति समीरो वायुरूपः । दमनाकाराय ३३ दमनः शान्तिकरः आकारो यस्य स दमनाकारः । अर्थाय ३४ अर्थो धर्मादिपुरुषार्थरूपः । अर्थकराय ३५ अर्थान् चतुर्विधपुरुषार्थान् करोतीत्यर्थकरः । वशाय ३६ वशः स्वभक्ताधीन इत्यर्थः । वासुदेवाय ३७ वासयति आच्छादयति इति वासुः दीव्यति क्रीडत इति देवः वासुश्चासौ देवश्च वासुदेवः स्वमायया स्वरूपमाच्छाद्य क्रीडमान इत्यर्थः । देवाय ३८ दीव्यति पुण्यपापानुसारेण फलप्रदानरूपव्यवहारं करोतीति देवः । वामदेवाय ३९ वामं कामं दीव्यति विजिगीषतीति वामदेवः । वामनाय ४० वामनो वामनावताररूपः ।

४. सिद्धियोगापहारिणे ४१ योगं चित्तवृत्तिनिरोधमपहरति तच्छीलः योगापहारी सिद्ध्या योगापहारी सिद्धियोगापहारी । सिद्धाय ४२ सिद्धः कपिलादिरूपः । तदुक्तं भगवद्-गीतायाम्—"सिद्धानां कपिलो मुनिः" इति । सर्वार्थसाधकाय ४३ सर्वार्थाः धर्मार्थकाम-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

महासेनो विशाखश्च षष्टिभागो गवां पतिः ।
चक्रहस्तस्तु विष्टंभी मूलस्तम्भन एव च ।। ९४ ।।[1]

ऋतुर्ऋतुकरस्तालो मधुर्मधुकरो वरः ।
वानस्पत्यो वाजसनो नित्यमाश्रम पूजितः ।। ९५ ।।[2]

ब्रह्मचारी लोकचारी सर्वचारी सुचारवित् ।
ईशान ईश्वरः कालो निशाचारी ह्यनेकदृक् ।। ९६ ।।[3]

मोक्षरूपाः साधयति स्वभक्तान्प्रापयतीति सर्वार्थसाधकः। अक्षुण्णाय ४४ अक्षुण्णः प्रलयेप्यसंपिष्टः। 'क्षुदिर् संपेषणे' तस्मात्कर्मणिक्तः। क्षुण्णरूपाय ४५ क्षुण्णं संपिष्टमपि रूपं यस्य स क्षुण्णरूपः। वृषणाय ४६ वृषणोण्डकोशरूपः केदारे तथैव वर्णनात्। मृदवे ४७ मृदुर्मृदुरूपः गोकर्णे ब्रह्मोत्तरखंडे तथैव वर्णनात्। "आक्रांतसप्तपातालकुहरोपि महाबलः प्राप्ते कलियुगे घोरे मृदुतामुपयास्यति ॥" इति। अव्ययाय ४८ अव्ययो नाशशून्य इत्यर्थः।

१. महासेनाय ४९ महती सेना यस्य स महासेनः स्कंदरूपः। विशाखाय ५० विशाखः स्कंदस्यैव मूर्तिभेदः तद्रूप इत्यर्थः। षष्टिभागाय ५१ षष्टिस्तत्संख्याकतत्त्वानि मांडूक्योपनिषदि प्रसिद्धानि भागो यस्य स षष्टिभागः। गवां पत्ये ५२ गवां छंदोरूपधेनूनां पतिः स्वामी प्रणवरूपः। तदुक्तं शिवगीतायाम्—"छंदसां यस्तु धेनूनामृषभत्वेन कीर्तितः" इति। चक्रहस्ताय ५३ चक्रं वार्युद्धवं सुदर्शनचक्रं हस्ते यस्य स चक्रहस्तः। विष्टंभिने ५४ विशेषेण स्तंभयति सर्वदेवान् स्तंभितान् करोतीति विष्टंभी। देवीस्वयंवरे शिशुरूपेण सर्वदेवस्तंभनं शिवकृतमत्रैवाग्रे उक्तम्। मूलस्तंभनाय ५५ मूलं जगदुपादानकारणं प्रकृतिं स्तंभयतीति मूलस्तंभनः।

२. ऋतवे ५६ ऋतुर्वसंतादिरूपः। ऋतुकराय ५७ ऋतून् वसंतादीन् करोति तत्तत्काले उत्पादयतीति ऋतुकरः। तालाय ५८ तले संसारपादपतले भवति बीजरूपेण तिष्ठतीति तालः। मधवे ५९ मधुः चैत्रमासस्तद्रूपो वा मधुर्जीवरूपः। मधुकराय ६० मधु पुष्परसं करोति उत्पादयतीति मधुकरः। वराय ६१ वरः सर्वश्रेष्ठ इत्यर्थः। वानस्पत्याय ६२ वनस्पतिषु वृक्षेषु भवति फलादिरूपेणोत्पद्यत इति वानस्पत्यः। वाजसनाय ६३ वाजसनस्तत्संज्ञकसूर्यप्रणीतशाखारूपः। नित्याय ६४ नित्यं निर्विकारं ब्रह्म तद्रूपः। आश्रम पूजिताय ६५ आश्रमेषु ब्रह्मचर्यादिषु पूजितः आश्रमपूजितः।

३. ब्रह्मचारिणे ६६ ब्रह्मणि वेदे चरतीति ब्रह्मचारी। लोकचारिणे ६७ लोकेषु चतुर्दशभुवनेषु चरतीति लोकचारी। सर्वचारिणे ६८ सर्वत्र चरति तच्छीलः सर्वचारी अप्रतिहतगतिरित्यर्थः। सुचारविदे ६९ सुचारं शोभनाचारं वेत्तीति सुचारवित्। ईशानाय ७० ईशानः सर्वविद्यास्वामी "ईशानः सर्वविद्यानाम्" इति श्रुतेः। ईश्वराय ७१ ईश्वरो नियंता "ईश्वरः सर्वभूतानाम्" इति श्रुतेः। कालाय ७२ कलयति सर्वसंख्यानं करोतीति कालः निशाचारिणे ७३ निशायां कालरात्रौ चरति तच्छीलः निशाचारी। अनेकदृशे ७४ अनेकदृगसंख्यनयनः। "नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे" इति श्रुतेः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निमित्तस्थो निमित्तं च नंदिर्नंदिकरो हरः ।
नंदीश्वरः सुनंदी च नंदनो विषमर्दनः ॥ ९७ ॥[1]

भगहारी नियंता च कालो लोकपितामहः ।
चतुर्मुखो महालिंगश्चारुलिङ्गस्तथैव च ॥ ९८ ॥[2]

लिंगाध्यक्षः सुराध्यक्षः कालाध्यक्षो युगावहः ।
बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः ॥ ९९ ॥[3]

इतिहासश्च कल्पश्च दमनो जगदीश्वरः ।
दंभो दंभकरो दाता वंशो वंशकरः कलिः ॥ १०० ॥[4]

---

१. निमित्तस्थाय ७५ निमित्तं निमित्तकारणं तत्र तिष्ठतीति निमित्तस्थः। निमित्ताय ७६ निमित्तं निमित्तकारणरूपः। नंदये ७७ नंदयतीति नंदिः समृद्धिकर इत्यर्थः। नंदिकराय ७८ नंदिं मोदं करोतीति नंदिकरः। हराय ७९ हरतीति हरः सकलसंहारकर्ता। नंदिने ८० नंदी शैलादिरूपः। ईश्वराय ८१ ईश्वरो विभवाढ्यः 'ईश्वरो विभवैराढ्यः' इति विश्वः। सुनंदिने ८२ सुनंदं तत्संज्ञकमुसलं यस्यास्तीति सुनंदी संकर्षणरूपः। नंदनाय ८३ नंदयतीति नंदनः आनंदकर्ता। विषमर्दनाय ८४ विषं कालकूटं मर्दयति वीर्यरहितं करोतीति विषमर्दनः।

२. भगहारिणे ८५ भगमिंद्राद्यैश्वर्यं हरति तच्छीलः भगहारी। नियंत्रे ८६ नियंता सूतः। तदुक्तमहोबलरुद्रभाष्ये—"जगद्यंत्रस्वरूपस्य रथस्य श्रीमहेश्वरः। नियंता तत एवेशः सूत इत्यभिधीयते ॥" इति। कालाय ८७ कालो महाकालरूपः। लोकपितामहाय ८८ लोकयंति ते लोकाः जीवाः तेषां पितामहः लोकपितामहः सकललोकजनकप्रकृतिपुरुषजनक इत्यर्थः। चतुर्मुखाय ८९ चत्वारि मुखानि यस्य वा चत्वारो वेदाः मुखे यस्य स चतुर्मुखः ब्रह्मरूपः। महालिंगाय ९० महत्सर्वपूज्यं लिङ्गं यस्य स महालिंगः। चारुलिंगाय ९१ चारु रमणीयं लिंगं यस्य स चारुलिंगः।

३. लिंगाध्यक्षाय ९२ लिंगमव्यक्तं तस्य अध्यक्षः प्रकृतिनियामक इत्यर्थः। सुराध्यक्षाय ९३ सुराणां देवानामध्यक्षः स्वामी। कालाध्यक्षाय ९४ कालस्य महाकालस्याध्यक्षः प्रवृत्तिनियामक इत्यर्थः। युगवाहाय ९५ युगानि कृतादीन्यावहति तत्तत्काले प्रापयतीति युगावहः। बीजाध्यक्षाय ९६ बीजं धर्माधर्मरूपं तस्याध्यक्षः फलदाता। बीजकर्त्रे ९७ बीजं धर्माधर्मरूपं तस्य कर्ता उत्पादकः। अध्यात्मने ९८ आत्मनि अधीत्यध्यात्मा स्वाधिकरण इत्यर्थः। अनुगताय ९९ अनुगम्यत इत्यनुगतः मुमुक्षुसेव्य इत्यर्थः बलाय ४०० बलो बलसंज्ञः "बलाय नमः" इति श्रुतेः। इति चतुर्थशतकं समाप्तम् ॥

४. इतिहासाय १ इतिहासो भारतादिस्तद्रूपः। कल्पाय २ कल्पो रुद्रादिकल्परूपः। दमनाय ३ दमयतीति दमनः सर्वभूतदमन इत्यर्थः। जगदीश्वराय ४ जगतामखिलब्रह्मांडानामीश्वरः स्वामी। दंभाय ५ दभ्नोति शत्रून्दमयतीति दंभो वा दंभयत्यसुरादीन्धर्मध्वजान्करोतीति दंभः। दंभकराय ६ दंभं करोति उत्पादयतीति दंभकरः। दात्रे ७ ददातीति दाता सकलप्रद इत्यर्थः। वंशाय ८ वंशः सूर्यवंशरूपः। वंशकराय ९ वंशं सौरवंशं करोतीति वंशकरः। कलये १०

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

लोककर्ता पशुपतिर्महाकर्ता ह्यधोक्षजः ।
अक्षरं परमं ब्रह्म बलवाञ्छुक्र एव च ॥ १ ॥[1]

नित्यो ह्यनीशः शुद्धात्मा शुद्धो मानो गतिर्हविः ।
प्रासादस्तु बलो दर्पो दर्पणो हव्य इन्द्रजित् ॥ २ ॥[2]

वेदकारः सूत्रकारो विद्वांश्च परमर्दनः ।
महामेघनिवासी च महाघोरो वशी करः ॥ ३ ॥[3]

अग्निज्वालो महाज्वालः परिधूम्रावृतो रविः ।
धिषणः शंकरो नित्यो वर्चस्वी धूम्रलोचनः ॥ ४ ॥[4]

कलिः कलियुगरूपः ।

१. लोककर्त्रे ११ लोकानां चतुर्दशभुवनानां कर्ता उत्पादक इत्यर्थः । पशुपतये १२ पशवो ब्रह्माद्याः देहधारिणस्तेषां पतिः स्वामी । महाकर्त्रे १३ महांश्चासी कर्ता च महाकर्ता ब्रह्माण्डोत्पादकः । अधोक्षजाय १४ अक्षादिंद्रियाज्जातमक्षजम् अधः अक्षजं यस्मादसावधोक्षजः इंद्रियजन्यज्ञानाविषय इत्यर्थः । अक्षराय १५ अक्षरं नाशशून्यं यत्कैवल्यं तद्रूपः । परमाय १६ परा अक्षरत्वात्सर्वातिशयिता मा लक्ष्मीर्यस्य तत्परमं तद्रूपः । ब्रह्मणे १७ ब्रह्म सच्चिदानन्दं तद्रूपः । बलवते १८ बलं रूपं विद्यते यस्य स बलवान् "बलं गंधे रसे रूपे" इति विश्वः शुक्राय १९ शुक्रः शुक्लवर्णः ।

२. नित्याय २० नितरां त्यजतीति नित्यः । त्यजधातोरन्यत्रापि दृश्यत इति डः । अविद्याबंधशून्य इत्यर्थः । अनीशाय २१ नास्ति ईशो यस्य सोऽनीशः । शुद्धात्मने २२ शुद्धश्चासावात्मा च शुद्धात्मा शुद्धमनोरूपः । 'आत्मा देहमनोबुद्धिषु' इति विश्वः शुद्धाय २२ शुद्धो मायारहित इत्यर्थः । मानाय २४ मानः प्रमाणरूपः । गतये २५ गतिः सन्मार्गरूपः । हविषे २६ हविर्यागद्रव्यरूपः । प्रासादाय २७ प्रासादो देवालयरूपः । बलाय २८ बलं कैलासादि स्थानं यस्यास्तीति बलः 'बलं स्थाने' इति विश्वः । दर्पाय ३९ दर्पयति मोहयतीति दर्पः असुरमोहक इत्यर्थः । दर्पणाय ३० दर्पणो जगदादर्शरूपः । हव्याय ३१ होतुं योग्यो हव्यः । इंद्रजिते ३२ इंद्रं जयतीति इंद्रजित् ।

३. वेदकाराय ३३ वेदकारो वेदकर्ता । सूत्रकाराय ३४ सूत्राणि ब्रह्मसूत्रादीनि करोतीति सूत्रकारः । विदुषे ३५ वेत्तीति विद्वान् सर्वज्ञ इत्यर्थः । परमर्दनाय ३६ परान् शत्रून् मर्दयतीति परमर्दनः । महामेघनिवासिने ३७ महांश्चासौ मेघश्च महामेघः विष्णुरूपः तत्र निवसति तच्छीलः । इयं कथा अत्रैवोक्ता । महाघोराय ३८ महांश्चासावघोरश्च महाघोरः । वशिने ३९ वशोस्यास्तीति वशी । कराय ४० कृणोति जगद्धिनस्तीति करः ।

४. अग्निज्वालाय ४१ अग्निरिव ज्वाला यस्य सोग्निज्वालः । महाज्वालाय ४२ महत्यो ज्वाला यस्य स महाज्वालः प्रलयवह्निरूपः । परिधूम्रावृताय ४३ परितः धूम्रेणेव धूसरा तया दृशाऽविद्यया आवृतः परिधूम्रावृतः । रवये ४४ रौति अनाहतध्वनिं करोतीति रविः । धिषणाय ४५ प्रशस्ता धिषणा अस्येत्यर्शाद्यच् । शंकराय ४६ शं सुखं करोतीति शंकरः । अनित्याय

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नीलस्तथाङ्गलुप्तश्च शोभनो नरविग्रहः ।
स्वस्ति स्वस्तिस्वभावश्च भोगी भोगकरो लघुः ॥ ५ ॥[1]

उत्संगश्च महांगश्च महागर्भः प्रतापवान् ।
कृष्णवर्णः सुवर्णश्च इन्द्रियः सर्ववर्णिकः ॥ ६ ॥[2]

महापादो महाहस्तो महाकायो महायशः ।
महामूर्धा महामात्रो महामित्रो नगालयः ॥ ७ ॥[3]

महास्कंधो महाकर्णो महोष्ठश्च महाहनुः ।
महानासो महाकंठो महाग्रीवः श्मशानवान् ॥ ८ ॥[4]

---

४७ अनित्यो जगद्रूपः। वर्चस्विने ४८ वर्चस्वी नित्यवर्चोविशिष्टः। धूम्रलोचनाय ४९ धूम्रलोचनाय ४९ लोचनाद्वह्निरूपनयनाद्यस्य स वा धूम्रवर्णानि लोचनानि यस्य स धूम्रलोचनः।

१. नीलाय ५० नीलो नीलवर्णः अघोरमूर्तेस्तथैव वर्णनात् । अंगलुप्ताय ५१ अंगं वामशरीरं लुप्तं देव्या प्रेमहृतं यस्य सोङ्गलुप्तः। शोभनाय ५२ शोभनोऽर्धनारीरूपत्वादति शोभमान इत्यर्थः। नरविग्रहाय ५३ नरेणार्जुनेन विग्रहः शौर्यपरीक्षार्थं कलहो यस्य स नरविग्रहः। स्वस्ति ५४ स्वस्तीत्यव्ययं मंगले तद्रूप इत्यर्थः। स्वस्तिस्वभावाय ५५ स्वस्ति मंगलः स्वभावो यस्य स स्वस्तिस्वभावः। भोगिने ५६ भोगः सुखं नित्यं यस्यास्तीति भोगी । भोगकराय ५७ भोगान् सुखानि स्वभक्तेभ्यः करोतीति भोगकरः। लघवे ५८ लघुर्मनोज्ञः "लघुर्मनोज्ञनिःसारागुरुषु" इति विश्वः।

२. उत्संगाय ५९ उद्गतः संगो यस्य स उत्संगः। महांगाय ६० महदंगं विराड्रूपं यस्य स महांगः। महागर्भाय ६१ महान् वहन्यादेरसहः गर्भो वीर्यजो यस्य स महागर्भः। प्रतापवते ६२ प्रतापवान् तेजोविशिष्टः. कृष्णवर्णाय ६३ कृष्णेन वर्णः स्तुतः कृष्णवर्णः "वर्णो द्विजादौ शुक्लादौ स्तुतौ" इति विश्वः। सुवर्णाय ६४ सुष्ठु वर्णः रूपं यस्य स सुवर्णः। इंद्रियाय ६५ इंद्रियः इंद्रजुष्टः। सर्ववर्णिकाय ६६ सर्ववर्णाः संति यस्य स सर्ववर्णिकः "अत इनिठनौ" इति ठन् ।

महापादाय ६७ महांतौ पादौ यस्य स महापादः महाहस्ताय ६८ महांतः हस्ता यस्य स महाहस्तः। महाकायाय ६९ महायशसे ७० महामूर्ध्ने ७१ नामत्रयं पूर्ववत्स्पष्टम् । महामात्राय ७२ महामात्रो दुर्निवारमृत्युगजनियंता । महामित्राय ७३ महान्विष्णुर्मित्रं यस्य स महामित्रः। नगालयाय ७४ नगेषु कैलासादिपर्वतेषु आलयो यस्य स नगालयः।

४. महास्कंधाय ७५ महास्कंधो महाविटपिरूपः। महाकर्णाय ७६ महोष्ठाय ७७ महाहनवे ७८ महानासाय ७९ महाकंठाय ८० महाग्रीवाय ८१ इमानि षण्नामानि पूज्यतत्तदवयवतानीनि । श्मशानवते ८२ श्मनां शरीराणां शानं तनूकरणं पुनर्जन्मनिवारकत्वात् काशीपुरं [illegible] श्मशानवान् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

महाबलो महातेजा ह्यंतरात्मा मृगालयः ।
लंबितोष्ठश्च निष्ठश्च महामायः पयोनिधिः ॥ ९ ॥[1]

महादन्तो महादंष्ट्रो महाजिह्वो महामुखः ।
महानखो महारोमा महाकेशो महाजटः ॥ १० ॥[2]

असपत्नः प्रसादश्च प्रत्ययो गीतसाधकः ।
प्रस्वेदनोऽस्वेहनश्च आदिकश्च महामुनिः ॥ ११ ॥[3]

वृषको वृषकेतुश्च अनलो वायुवाहनः ।
मंडली मेरुवासश्च देववाहन एव च ॥ १२ ॥[4]

---

१. महाबलाय ८३ महदपरिमितं बलं यस्मादिति महाबलः। महातेजसे ८४ महत्तेजः सूर्यादीनां यस्मादिति महातेजाः। अंतर्नमः ८५ अंतरित्यव्ययं मध्ये सर्वमध्यवर्तीत्यर्थः। आत्मने ८६ आत्मा अन्नमयादिकोशरूपः। मृगालयाय ८७ मृगस्य यज्ञहरिणस्यालयः स्थानभूतः। लंबितोष्ठाय ८८ लंबितः ओष्ठो यस्य स लंबितोष्ठः गजाननरूप इत्यर्थः। निष्ठाय ८९ नितरां तिष्ठतीति निष्ठः कूटस्थत्वादचंचल इत्यर्थः। महामायाय ९० महती विष्ण्वादिमोहिका माया यस्य स महामायः। पयोनिधये ९१ पयोनिधिः क्षीरसमुद्रस्तद्रूपः।

२. महादन्ताय ९२ महादंष्ट्राय ९३ महाजिह्वाय ९४ महामुखाय ९५ महानखाय ९६ महादंतायेत्यादि नामपंचकं पूज्यमानतत्तदवयवसंबंधिवाचकम्। महारोम्णे ९७ महांति पूज्यानि रोमाणि शारीरलोमानि यस्य स महारोमा। महाकेशाय ९८ महांतः शिरोबालाः यस्य स महाकेशः। महाजटाय ९९ महत्यो जटाः यस्य स महाजटः।

३. असपत्नाय ५०० नास्ति सपत्नी जगदंबिकान्यस्त्री यस्य वा सपत्नः शत्रुर्यस्य सोऽसपत्नः॥ इति पंचमशतकं समाप्तम्॥ प्रसादाय १ प्रकर्षेण सादयति असुरादिविशरणं करोतीति प्रसादः। प्रत्ययाय २ प्रत्ययोऽनुभवरूपः। गीतसाधकाय ३ गीतं गायनं साधकं संसिद्धिकरं यस्य स गीतसाधकः। प्रस्वेदनाय ४ प्रकर्षेण स्वेदयति निदाघकाले घर्मविशिष्टान्करोतीति प्रस्वेदनः। अस्वहेनाय ५ शोभनमहः स्वहः तस्य इनः स्वामी स्वहेनः अः विष्णुः स्वहेनो यस्मात्सोस्वहेनः। अहेत्यव्ययमद्भुते अहनीत्यर्थे च। आदिकाय ६ आदिको मुख्यप्रजापतिः। तदुक्तं द्रोणपर्वणि—"प्रजापतीनां प्रथमम्" इति। महामुनये ७ महामुनिर्नारदरूपः।

४. वृषकाय ८ वृषको धर्मरूपः। वृषकेतवे ९ वृषो नंदिकेश्वरः केतौ यस्य स वृषकेतुः अनलाय १० अनलः अग्निरूपः। वायुवाहनाय ११ वायुर्वाहनं यस्य स वायुवाहनः। तदुक्तं शिवरहस्ये—"मरुन्मयरथः शंभुः" इति। मंडलिने १२ मंडलं सौरचांद्रं यस्य नेत्रे अस्तीति मंडली। मेरुवासाय १३ मेरौ वासो यस्य स मेरुवासः। देववाहनाय १४ देवो धर्मः वाहनं यस्य स देववाहनः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अथर्वशीर्षः सामास्य ऋक्सहस्रोर्जितेक्षणः ।
यजुःपादभुजो गुह्यः प्रकाशौजास्तथैव च ॥ १३ ॥[1]

अमोघार्थप्रसादश्च अंतर्भाव्यः सुदर्शनः ।
उपहारः प्रियः सर्वः कनकः कांचनस्थितः ॥ १४ ॥[2]

नाभिर्नन्दिकरो हर्म्यः पुष्करः स्थपतिः स्थितः ।
सर्वशास्त्रो धनश्चाद्यो यज्ञो यज्वा समाहितः ॥ १५ ॥[3]

नगो नीलः कविः कालो मकरः कालपूजितः ।
सगणो गणकारश्च भूतभावनसारथिः ॥ १६ ॥[4]

अथर्वशीर्षाय १५ अथर्वस्तत्संज्ञकवेदः शीर्षं यस्य स अथर्वशीर्षः। सामास्याय १६ साम तत्संज्ञको वेदः आस्यं मुखं यस्य स सामास्यः। ऋक्सहस्रोर्जितेक्षणाय १७ ऋक्सहस्रमनंतऋक्समुदायः ऊर्जितानि ईक्षणानि यस्य स ऋक्सहस्रोर्जितेक्षणः। यजुःपादभुजाय १८ यजुस्तत्संज्ञकवेदःपादभुजा यस्य स यजुःपादभुजः। गुह्याय १९ गुहायै बुद्ध्यै हितः गुह्यः। प्रकाशौजसे २० प्रकाशं प्रसिद्धमोजो यस्य स प्रकाशौजाः।

२. अमोघार्थप्रसादाय २१ अमोघार्थःप्रसादो यस्य' सःअमोघार्थप्रसादः। अंतर्भाव्याय २२ अंतः अभ्यन्तरे भावयितुं योग्यः अंतर्भाव्यः। सुदर्शनाय २३ शोभनं दर्शनं यस्य स सुदर्शनः। उपहाराय २४ उपहरंति बलिं सर्वे देवाःयस्मै इत्युपहारः। "सर्वेऽस्मै देवा बलिमावहन्ति" इति श्रुतेः। प्रियाय २५ प्रियः आत्मत्वात्सर्वप्रेष्ठः। सर्वाय २६ सरति भक्ताभिमुखमायातीति सर्वः। कनकाय २७ कनकः सुवर्णरूपः। कांचनस्थिताय २८ कांचने सुवर्णासने स्थितः कांचनस्थितः।

३. नाभये २९ नाभिर्भुवनमध्यरूपः। "विश्वं बिभर्ति भुवनस्य नाभिः" इति श्रुतेः। नंदिकराय ३० नंदिकरो यज्ञफलसमृद्धि कर्ता। हर्म्याय ३१ हर्म्यं कुबेरगृहं यस्यास्तीति हर्म्यः। अर्श आद्यच्। पुष्कराय ३२ पुष्करं तत्संज्ञकं तीर्थमस्यास्तीति पुष्करः। स्थपतये ३३ "स्थपतिः प्रभुरध्यक्षः" इति रुद्रभाष्ये उक्तम्। स्थिताय ३४ स्थितोऽचंचलः "वृक्ष इव स्तब्धो दिवि तिष्ठति" इति श्रुतेः। सर्वशास्त्राय ३५ सर्वाणि शास्त्राणि यस्मात्स सर्वशास्त्रः। धनाय ३६ धनो धनस्वरूपः। आद्याय ३७ आदौ भवः आद्यः। यज्ञाय ३८ यज्ञो जीवेशयोः संगतिकरणं तद्रूपः। यज्वने ३९ यज्वा विधिवद्यज्ञकर्ता। समाहिताय ४० सम्यग्यथाविधि आहितः स्थापितो गार्हपत्यादिरूप इत्यर्थः।

४. नगाय ४१ नगः श्रीशैलादिरूपः। नीलाय ४२ नीलो लांछनरूपः "नीलः कपीश्वरे नीलिवृक्षलांछनभेदयोः" इति विश्वः कवये ४३ कविः काव्यकरः। कालाय ४४ कालो यमरूपः। मकराय ४५ मकरो मत्स्येन्द्ररूपः। कालपूजिताय ४६ कालेन यमेनापि पूजितः कालपूजितः। सगणाय ४७ गणैः सहितः सगणः। गणकाराय ४८ गणान्बाणादीन् करोतीति गणकारः। भूतभावनसारथये ४९ भूतभावनो ब्रह्मा सारथिः रथप्रेरको यस्य स भूतभावनसारथिः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भस्मशायी भस्मगोप्ता भस्मभूततनुर्गणः ।
आगमश्च विलोपश्च महात्मा सर्वपूजितः ॥ १७ ॥[1]

शुक्लः स्त्रीरूपसंपन्नः शुचिर्भूतनिषेवितः ।
आश्रमस्थः कपोतस्थो विश्वकर्मा पतिर्विराट् ॥ १८ ॥[2]

विशालशाखस्ताम्रोष्ठो ह्यंबुजालः सुनिश्चितः ।
कपिलः कलशः स्थूल आयुधश्चैव रोमशः ॥ १९ ॥[3]

गंधर्वो ह्यदितिस्तार्क्ष्यो ह्यविज्ञेयः सुशारदः ।
परश्वधायुधो देवो ह्यर्थकारी सुबांधवः ॥ २० ॥[4]

---

१. भस्मशायिने ५० भस्मनि शेते तच्छीलः भस्मशायी। भस्मगोप्त्रे ५१ भस्मना गोपयतीति भस्मगोप्ता। तदुक्तं भारते—"रक्षार्थं मंगलार्थं च पवित्रार्थं च भामिनि। लांछनार्थं च भक्तानां भस्म दत्तं मया पुरा॥" इति। भस्मभूततनवे ५२ भस्मभूतमुत्पन्नं दर्शयित्वा प्रकृतिस्थं चकारेति कथा भारतादौ प्रसिद्धा। गणाय ५३ गणो भृंग्यादिरूपः। आगमाय ५४ आगमयति स्वात्मरूपं प्रापयतीत्यागमः शास्त्ररूपः। विलोपाय ५५ विशेषेण लोपयति परमभक्तेभ्यः जगद्दर्शनं करोतीति विलोपः। महात्मने ५६ महात्मा परमात्मेत्यर्थः। सर्वपूजिताय ५७ सर्वस्मिन् पूजितः सर्वपूजितः।

२. शुक्लाय ५८ शुक्लः शुद्ध इत्यर्थः। स्त्रीरूपसंपन्नाय ५९ स्त्रीरूपेण स्त्रीरूपवामभागेन संपन्नो युक्तः वा स्त्री रूपसंपन्ना परमरूपवती त्रिपुरसुंदरी यस्य स स्त्रीरूपसंपन्नः। शुचये ६० शुचिर्बाह्याभ्यंतरमलशून्यः। भूतनिषेविताय ६१ भूतैः पूर्वाचार्यैः निषेवितो भूतनिषेवितः। आश्रमस्थाय ६२ आश्रमेषु चतुर्ष्वपि धर्मरूपेण तिष्ठतीत्याश्रमस्थः। कपोतस्थाय ६३ कपोतः शिबिपरीक्षार्थमागतो वह्निः तत्र तिष्ठतीति कपोतस्थः। विश्वकर्मणे ६४ विश्वकर्मा तत्संज्ञकदेवशिल्पिरूपः। पत्ये ६५ पतिर्गतिरूपः। "पतिः प्रभौ गतौ मूले" इति विश्वः। विराजे ६६ विशेषेण राजत इति विराट्।

३. विशालशाखाय ६७ विशाला शाखा यस्य स विशालशाखः वेदद्रुमरूप इत्यर्थः। ताम्रोष्ठाय ६८ ताम्रौ ओष्ठौ यस्य स ताम्रोष्ठः। अंबुजालाय ६९ अंबूनां जालं समुदायस्तद्रूपः। सुनिश्चिताय ७० सुतरां निश्चितः सतामत्यंतनिश्चितविषयः। कपिलाय ७१ कपिलस्तद्वर्णविशिष्टः। कलशाय ७२ कलशः पृषदाज्यादिकलशरूपः। स्थूलाय ७३ स्थूलो बृहद्वपुः। आयुधाय ७४ आयुधो वज्रादिरूपः रोमशाय ७५ रोमशस्तत्संज्ञकगणरूपः।

४. गंधर्वाय ७६ गंधर्वश्चित्ररथादिरूपः। अदितये ७७ अदितिर्देवमाता तद्रूपः। तार्क्ष्याय ७८ तार्क्ष्यो वैनतेयरूपः। अविज्ञेयाय ७९ न विज्ञेयोऽविज्ञेयः प्रत्यक्षरूपेण ज्ञातुमशक्य इत्यर्थः। सुशारदाय ८० शोभना शारदा वाक् यस्मादिति सुशारदः। परश्वधायुधाय ८१ परश्वधः कुठारः आयुधं यस्य स परश्वधायुधः। देवाय ८२ देवो विजिगीषुः। अर्थकारिणे ८३ अर्थान्नानाविधशब्दार्थान्करोति तच्छीलः अर्थकारी। सुबांधवाय ८४ शोभनो बांधवः सुबांधवः आपत्कालेप्युपकारक इत्यर्थः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तुंबवीणो महाकोप ऊर्ध्वरेता जलेशयः ।
उग्रो वंशकरो वंशो वंशवादी ह्यनिन्दितः ॥ २१ ॥[1]

सर्वांगरूपी मायावी सुहृदो ह्यनिलो बलः ।
बंधनो बंधकर्ता च सुबंधनविमोचनः ॥ २२ ॥[2]

राक्षसघ्नोऽथ कामारिर्महादंष्ट्रो महायुधः ।
लंबितो लंबितोष्ठश्च लंबहस्तो वरप्रदः ॥ २३ ॥[3]

बाहुस्त्वनिंदितः सर्वः शंकरोथाप्यकोपनः ।
अमरेशो महाघोरो विश्वदेवः सुरारिहा ॥ २४ ॥[4]

---

१. तुंबवीणाय ८५ तुंबीफलद्वययुक्ता वीणा यस्य स तुंबवीणः। अत एव तादृशी लोके रुद्रवीणेत्युच्यते । महाकोपाय ८६ महान् पूज्यः कोपो यस्य स महाकोपः। अत एव "नमस्ते रुद्र मन्यवे" इत्यनेन वेदेपि कोपनमनमुक्तम् । ऊर्ध्वरेतसे ८७ ऊर्ध्वं ब्रह्मांडोपरि रेतःउदकरूपं यस्य स ऊर्ध्वरेताः। जलेशयाय८८ जले शेते इति जलेशयः। "शयवास" इत्यनेन सप्तम्यलुक्। नारायणरूपः। उग्राय ८९ उग्रः क्रूररूपः। वंशकराय ९० वंशं सोमवंशं करोतीति वंशकरः। वंशाय ९१ वंशः सोमवंशरूपः। वंशवादिने ९२ वंशं वेणुं वादयति तच्छीलो वंशवादी। अनिंदिताय ९३ अः विष्णुः निंदितः दधीच्यादिभिः तिरस्कृतो यस्मात्सोऽनिंदितः।

२. सर्वांगरूपिणे ९४ सर्वांगानि देवगात्राणि रूपयति प्रशंसति तच्छीलः सर्वांगरूपी । मायाविने ९५ माया प्रकृतिः यस्यास्तीति मायावी 'मायिनं तु महेश्वरम्' इत्युक्तत्वात् । सुहृदाय ९६ सुहृदः साधवः संति यस्मिन्निति सुहृदः। अनिलाय ९७ नितरां लाति विषयान् गृह्णातीति निलोजीवो न निलोऽनिलः परमात्मरूप इत्यर्थः। बलाय ९८ बलो हलायुधरूपः। "बलो हलायुधे दैत्यभेदे बलिनि वायसे" इति विश्वः। बंधनाय ९९ बंधनो वालिःधर्मपाश रूपः। बंधकर्त्रे ६०० बंधकर्ता वामनरूपः॥ इति षष्ठशतकं समाप्तम् ॥ सुबंधनविमोचनाय १ सुतरां बंधनं संसाररूपं तस्य मोचनो जन्ममरणनिवर्तक इत्यर्थः।

३. राक्षसघ्नाय २ राक्षसान् हंतीति राक्षसघ्नः। अत्र मूलविभुजादित्वात्कप्रत्यये 'गमहन' इत्युपधालोपः। कामारये ३ कामस्य मदनस्यारिर्नाशकः। महादंष्ट्राय ४ महती दंष्ट्रा यस्य स महादंष्ट्रः यज्ञवराहदंष्ट्रायुक्तः। इयं कथाग्रे उक्ता। महायुधाय ५ महत्पूज्यमायुधं यस्य स महायुधः। लंबिताय ६ लंबितो महाकालरूपत्वादतिदीर्घः। लंबितोष्ठाय ७ लंबितावतिदीर्घौ ओष्ठौ जगद्भक्षणार्थं येन स लंबितोष्ठः। लंबहस्ताय ८ लंबहस्तो दीर्घबाहुः। वरप्रदाय ९ वरान् भक्ताभिलाषान् प्रकर्षेण ददातीति वरप्रदः।

४. बाहवे १० बाहुः सर्वेषां हस्तरूपः। अनिन्दिताय ११ नास्ति इंदितं परमैश्वर्यं यस्मादित्यनिन्दितः। सर्वाय १२ सर्वो ज्ञानरूपः। शंकराय १३ शं कल्याणं करे यस्मादिति शंकरः। अकोपनाय १४ न कोपनोऽकोपनः। अमरेशाय १५ अमराणां देवानामीशः स्वामी। महाघोराय १६ महांतः पूज्या घोराः भयंकरविग्रहः यस्य स महाघोरः। विश्वदेवाय १७ विश्वेन

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अहिर्बुध्न्यो निर्ऋतिश्च चेकितानो हली तथा।
अजैकपाच्च कापाली शं कुमारो महागिरिः ॥ २५ ॥[१]

धन्वंतरिर्धूमकेतुः सूर्यो वैश्रवणस्तथा।
धाता विष्णुश्च शक्रश्च मित्रस्त्वष्टा धरो ध्रुवः ॥ २६ ॥[२]

प्रभासः पर्वतो वायुरर्यमा सविता रविः।
धृतिश्चैव विधाता च मांधाता भूतभावनः ॥ २७ ॥[३]

नीरस्तीर्थश्च भीमश्च सर्वकर्मा गुणोद्वहः।
पद्मगर्भो महागर्भश्चंद्रवक्त्रो नभोऽनघः ॥ २८ ॥[४]

दीव्यतीति विश्वदेवः। सुरारिघ्ने १८ सुरारीन्देवशत्रून् हंतीति सुरारिहा।

१. अहिर्बुध्न्याय १९ बुध्ने पृथिवीमूले पाताले भवतीति बुध्न्यः अहिः सर्पश्चासौ बुध्न्यश्च अहिर्बुध्न्यः शेषरूपः इत्यर्थः। "मूलं बुध्नोंघ्रिनामकः" इत्यमरः। निर्ऋतये २० निर्ऋतिः तत्संज्ञकदिक्पालरूपः। चेकितानाय २१ 'कित ज्ञाने' अस्माद्यङ्लुकि ताच्छील्ये चानश्। अतिशयेन चेकेति जानातीति चेकितानः युगपदशेषज्ञानवानित्यर्थः। हलिने २२ हली तत्संज्ञकायुधविशिष्टः। अजैकपदे २३ अजैकपात्तत्संज्ञकरुद्ररूपः। यद्वा अजायाः मायारूपदेव्याः एकपादो यस्य सः अजैकपात् अर्धनारीरूपत्वादित्यर्थः। कपालिने २४ कपालाभ्यां द्यावापृथिवीरूपाभ्यां निर्मितं कपालं ब्रह्माण्डं यस्यास्तीति कापाली। शं नमः २५ शमित्यव्ययं सुखे तद्रूप इत्यर्थः। कुमाराय २६ कुमारः सनत्कुमारादिरूपः। महागिरये २७ महांश्चासौ गिरिश्च महागिरिः। हिमालयरूपः "स्थावराणां हिमालयः" इति भगवद्गीतोक्तेः।

२. धन्वन्तरये २८ धन्वंतरिर्भिषग्वररूपः "भिषक्तमं त्वां भिषजां शृणोमि" इति श्रुतेः। धूमकेतवे २९ धूमः केतुर्यस्य स धूमकेतुः वह्निरूपः इत्यर्थः। सूर्याय ३० 'षु प्रेरणे' तस्य क्यबंतनिपातितः सूर्यशब्दः सूर्यो जगत्प्रेरक इत्यर्थः। वैश्रवणाय ३१ वैश्रवणः कुबेररूपः। धात्रे ३२ धाता जगद्धारकः। विष्णवे ३३ विष्णुर्व्यापकः। शक्राय ३४ शक्रो देवराजरूपः। मित्राय ३५ मित्रस्तत्संज्ञकादित्यरूपः। त्वष्ट्रे ३६ त्वष्टा तत्संज्ञकादित्यरूपः। धराय ३७ ध्रुवाय ३८ नामद्वयं वसुवाचकं तद्रूप इत्यर्थः।

३. प्रभासाय ३९ प्रभासस्तत्संज्ञकवसुरूपः। पर्वताय ४० पर्वतस्तत्संज्ञकऋषिरूपः। वायवे ४१ याति गच्छति इति वायुस्तद्रूपः। अर्यम्णे ४२ अर्यमा तत्संज्ञकादित्यरूपः। सवित्रे ४३ सूतेऽसौ सविता जगदुत्पादक इत्यर्थः। रवये ४४ रौतीति रविः ब्रह्मकृपया रोदमान इत्यर्थः। इयं कथात्रैवोक्ता। धृतये ४५ धृतिर्धैर्यरूपः। विधात्रे ४६ विधाता विशेषेण पोषक इत्यर्थः। मांधात्रे ४७ मांधाता तत्संज्ञकभूपालरूपः। भूतभावनाय ४८ भूतानि भावयतीति भूतभावनः जगदुत्पादकः।

४. नीराय ४९ नितरामीरयतीति नीरः। तीर्थाय ५० तीर्थः सर्वतीर्थरूपः। भीमाय ५१ भीमो भयंकरः। सर्वकर्मणे ५२ सर्वं कर्म यस्य स सर्वकर्मा। गुणोद्वहाय ५३ गुणाः उद्वहंति यस्मादसौ गुणोद्वहः। पद्मगर्भाय ५४ पद्मस्य हृत्कमलस्य गर्भो मध्यवर्तीत्यर्थः। महागर्भाय ५५ महान्

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

बलवांश्चोपशांतश्च पुराणः पुण्यकृत्तमः ।
क्रूरकर्ता क्रूरवासी तनुरात्मा महौषधः ॥ २९ ॥[१]

सर्वाशयः सर्वचारी प्राणेशः प्राणिनां पतिः ।
देवदेवः सुखोत्सिक्तः सदसत्सर्वरत्नवित् ॥ ३० ॥[२]

कैलासस्थो गुहावासी हिमवद्गिरिसंश्रयः ।
कुलहारी कुलाकर्ता बहुवित्तो बहुप्रजः ॥ ३१ ॥[३]

प्राणेशो बंधकी वृक्षो नकुलश्चाद्रिकस्तथा ।
ह्रस्वग्रीवो महाजानुरलोलश्च महौषधिः ॥ ३२ ॥[४]

विराट् गर्भो यस्य स महागर्भः। चंद्रवक्त्राय ५६ चंद्रमाह्लादकं वक्त्रं यस्य स चंद्रवक्त्रः। नभाय ५७ नास्ति भं जन्मर्क्षं यस्य स नभः। अनघाय ५८ अनघः पातकशून्यः।

१. बलवते ५९ बलं रसो विद्यते यस्मिन्स बलवान् गंगाधरत्वादित्यर्थः। उपशांताय ६० उप समीपे शांताः शमयुक्ताः यस्य स उपशांतः। पुराणाय ६१ ॥ पुरापि नवः पुराणः यद्वा पुराणरूपः। पुण्यकृते ६२ पुण्यं करोतीति पुण्यकृत्। तमसे ६३ तमस्तत्संज्ञकगुणरूपः। क्रूरकर्त्रे ६४ क्रूरान् सिंहव्याघ्रादीन्करोति तच्छीलःक्रूरकर्ता। क्रूरवासिने ६५ क्रूरेष्वपि वसतीति क्रूरवासी। तनवे ६६ तनुः देहरूपः। आत्मने ६७ आत्मा जीवरूपः। महौपधाय ६८ महौषधः सर्वरोगनिवर्तकः।

२. सर्वाशयाय ६९ सर्वे आशेरते यस्मिन्निति सर्वाशयः सुषुप्तिस्थानप्राज्ञ रूपः। सर्वचारिणे ७० सर्वान् चारयतीति सर्वचारी समष्टिरूपः। प्राणेशाय ७१ प्राणस्य तत्संज्ञकवायोरीशः प्राणेशः प्राणिनां पत्ये ७२ प्राणिनां जीवानां पतिः स्वामी। देवदेवाय ७३ देवानां विष्ण्वादीनां देवो गतिरित्यर्थः। सुखोत्सिक्ताय ७४ सुखमानंदः उत्सिक्तो यस्मादसौ सुखोत्सिक्तः। "तस्यैवानंदस्य मात्रमुपजीवंति" इति श्रुतेः। सते ७५ सत्कारणरूपः। असते ७६ असत्कार्यरूपः। सर्वरत्नविदे ७७ सर्वाणि च तानि रत्नानि सर्वजातिश्रेष्ठानि वा सर्वरत्नानि तानि वेत्तीति सर्वरत्नवित्। "रत्नं स्वजातिश्रेष्ठेऽपि" इत्यमरः।

३. कैलासस्थाय ७८ कैलासस्थः तत्संज्ञकपर्वतवासी। गुहावासिने ७९ गुहायां मेरुगुहायां वसति तच्छीलः गुहावासी। हिमवते ८० हिमवत्केदारस्थानं तत्स्वरूपः। गिरिसंश्रयाय ८१ गिरेः हिमालयस्य संश्रयः आश्रयभूतः। कुलहारिणे ८२ कुलानि देहान् हरति तच्छीलः कुलहारी। कुलाकर्त्रे ८३ कुलानि देहान् वा गोत्राण्याकरोति तच्छीलः कुलाकर्ता। "सजातीयगणे गोत्रे देहेऽपि कथितं कुलम्" इति विश्वः। बहुवित्ताय ८४ बहु अपरिमितं वित्तं यस्मादसौ बहुवित्तः। बहुप्रजाय ८५ बह्वी प्रजा कृष्णादीनां यस्मादसौ बहुप्रजः।

४. प्राणेशाय ८६ प्राणो बलं तस्येशः स्वामी। "प्राणो बलम्" इति विश्वः। बंधक्यै ८७ बंधकी पुंश्चली माया तद्रूपः। वृक्षाय ८८ वृश्चतीति वृक्षः मायाच्छेदक इत्यर्थः। नकुलाय ८९ नास्ति कुलं यस्य स नकुलः। अद्रिकाय ९० अद्रिकोऽद्रिरूपः। ह्रस्वग्रीवाय ९१ ह्रस्वा संकुचिता ग्रीवा यस्य स ह्रस्वग्रीवः। महाजानवे ९२ महांतौ जानू यस्य स महाजानुः नामद्वयं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सिद्धान्तकारी सिद्धार्थश्छंदोव्याकरणोद्भवः ।
सिंहनादः सिंहदंष्ट्रः सिंहास्यः सिंहवाहनः ॥ ३३ ॥[1]

प्रभावात्मा जगत्कालः कालः कंपी तरुस्तनुः ।
सारंगो भूतचक्रांकः केतुमाली सुवेधकः ॥ ३४ ॥[2]

भूतालयो भूतपतिरहोरात्रो मलोऽमलः ।
वसुभृत्सर्वभूतात्मा निश्चलः सुविदुर्बुधः ॥ ३५ ॥[3]

असुहृत्सर्वभूतानां निश्चलश्चलविद्बुधः ।
अमोघः संयमो हृष्टो भोजनः प्राणधारणः ॥ ३६ ॥[4]

सलक्षणदेहवाचकम् । अलोलाय ९३ अलोलोऽचंचलः । महौषधये ९४ महत्य ओषधयो व्रीह्यादयो यस्मात्स महौषधः ।

१. सिद्धांतकारिणे ९५ सिद्धांतान् सकलशास्त्रीयादिशंकानिवर्तकभागान् करोति तच्छीलः सिद्धांतकारी । सिद्धार्थाय ९६ सिद्धाः निष्पन्ना अर्था यस्मात्स सिद्धार्थः । छंदसे ९७ छंदः गायत्र्यादिच्छंदोरूप । व्याकरणोद्भवाय ९८ व्याकरणस्य तत्संज्ञकशास्त्रस्योद्भवः उत्पत्तिर्यस्मात्स व्याकरणोद्भवः । सिंहनादाय ९९ सिंहः शत्रुविनाशकः नादो यस्य स सिंहनादः । सिंहदंष्ट्राय ७०० सिंहवत् दंष्ट्रा यस्य सिंहदंष्ट्रः । इति सप्तमं शतकं समाप्तम् ॥ सिंहास्याय १ सिंहसदृशमास्यं यस्य सः सिंहास्यः नृसिंहरूप इत्यर्थः । सिंहवाहनाय २ सिंहयुक्तं वाहनं रथो यस्य स सिंहवाहनः ।

२. प्रभावात्मने ३ प्रभावः गना आत्मा स्वरूपं यस्य स प्रभावात्मा । जगत्कालाय ४ जगत्कलयति गमयतीति जगत्कालः । कालाय ५ कालो यमस्वरूपः । कंपिने ६ कंपोस्यास्तीति कंपी वायुरूपः । तरवे ७ तरुर्वृक्षरूपः । तनवे ८ तनुः सूक्ष्मः । सारङ्गाय ९ सारंगस्तत्संज्ञकपक्षिरूपः । भूतचक्रांकाय १० भूतानां चक्रं परिवर्तनम् अंकाः चिह्नं यस्य स भूतचक्रांकः "यतो वा इमानि भूतानि जायंते" इति श्रुतेः । केतुमालिने ११ केतुना वृपध्वजेन मालते शोभते इति केतुमाली । सुवेधकाय १२ सुतरां वेधकः सुवेधकः अज्ञानग्रंथिनाशक इत्यर्थः ।

३. भूतालयाय १३ भूतं तत्संज्ञकवनमालयो यस्य स भूतालयः । भूपतये १४ भूतानां पंचभूतानां पतिः पालकः । अहोरात्राय १५ अहः राति ददातीत्यहोरास्तं सूर्य त्रायत इत्यहोरात्रः । अमलाय १६ अमलो निष्पापः । मलाय १७ मलोऽभक्तकृपणः । "मलं कृपणे" इति विश्वः । वसुभृते १८ वसून् मयूखान् विभर्तीति वसुभृत् । सर्वभूतात्मने१९ सर्वभूतानि अतति सातत्येन जानातीति सर्वभूतात्मा । निश्चलाय २० निश्चलो निष्कंपः । सुविदवे २१ सुष्ठु सम्यग्वेत्तीति सुविदुः । बुधाय २२ बुधः कविः । "बुधः कवौ रौहिणेये" इति विश्वः ।

४. सर्वभूतानामसुहृते २३ असून्प्राणान् हरतीति असुहृत् । निश्चलाय २४ निर्गतं चलमंतःकरणं यस्मात्स निश्चलः । "अमनाः" इति श्रुतेः । चलविदे २५ चलं चित्तं वेत्तीति चलवित् । बुधाय २६ बोधयतीति बुधः । अमोघाय २७ न मोघोऽमोघः । संयमाय २८ संयमः प्राणायामरूपः । हृष्टाय २९ हृष्टो हर्षविशिष्टः । भोजनाय ३० भोजनोऽभ्यवहारकर्ता । प्राणधारणाय ३१ प्राणं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

धृतिमान्मतिमांस्त्र्यक्षः सुकृतस्तु युधांपतिः ।
गोपालो गोपतिर्ग्रामो गोचर्मवसनो हरः ॥ ३७ ॥[1]

हिरण्यबाहुश्च तथा गुहावासः प्रवेशनः ।
महामना महाकामो चित्तकामो जितेन्द्रियः ॥ ३८ ॥[2]

गांधारश्च सुरापश्च तापकर्मरतो हितः ।
महाभूतो भूतवृतो ह्यप्सरोगणसेवितः ॥ ३९ ॥[3]

महाकेतुर्धराधाता नैकतानरतः स्वरः ।
अवेदनीय आवेद्यः सर्वगश्च सुखावहः ॥ ४० ॥[4]

तत्संज्ञकवायुं धारयतीति प्राणधारणः ।

१. धृतिमते ३२ धृतिमान्धैर्यविशिष्टः । मतिमते ३३ मतिमान्नित्यबुद्धिविशिष्टः । त्र्यक्षाय ३४ त्रीणि अक्षीणि यस्य स त्र्यक्षः सुकृताय ३५ सुष्ठु कृतं यस्य स सुकृतः युधांपत्ये ३६ युधां संप्रहारकर्तृणां पतिः स्वामी । गोपालाय ३७ गाः इंद्रियाणि पालयतीति गोपालः । गोपतये ३८ गवां त्राणीनां पतिः गोपतिः ग्रामाय ३९ ग्रामः स्वरशास्त्रोक्तग्रामत्रयरूपः । गोचर्मवसनाय ४० गोचर्मवसनं यस्य स गोचर्मवसनः । हराय ४१ हरतीति हरः । तदुक्तं भारते द्रोणपर्वणि—"ब्रह्माणमिंद्रं वरुणं यमं धनदमेव च । निगृह्य हरते यस्मात्तस्माद्धर इति स्मृतः ॥" इति ।

२. हिरण्यबाहवे ४२ हिरण्यभूषणाः बाहवो यस्य स हिरण्यबाहुः । गुहावासाय ४३ गुहा बुद्धिरावास उपलब्धिस्थानं यस्य स गुहावासः । प्रवेशनाय ४४ प्रकर्षेण विशति ब्रह्माभेदं भक्तः प्राप्नोत्यनेनेति प्रवेशनः । महामनसे ४५ महत्पूज्यं मनो यस्मात्स महामनाः । महाकामाय ४६ महान्सर्वजयी कामो मदनो यस्मात्स महाकामः । चित्तकामाय ४७ चित्ते कामो यस्मादसौ चित्तकामः अनंगकरणादित्यर्थः । जितेन्द्रियाय ४८ जितानि इंद्रियाणि यस्मादसौ जितेंद्रियः ।

३. गांधाराय ४९ गांधारस्तत्संज्ञकस्वरूपः । सुरापाय ५० आ पातीत्यापः सुराणां देवानामापः सुरापः । यद्वा सुराममरवारुणीं पिबतीति सुरापः । तदुक्तं हठदीपिकायां—"जिह्वाप्रवेशसंभूतवह्निनोत्पादितः खलु । चन्द्रात्स्रवति यः सारः सा स्यादमरवारुणी ॥" इति । तापकर्मरताय ५१ तापकर्मणि रतः तापकर्मरतः वह्निरूप इत्यर्थः । हिताय ५२ हितो हितरूपः । महाभूताय ५३ महाभूतस्तत्संज्ञः । तदुक्तं द्रोणपर्वणि—"ज्येष्ठं भूतं वदंत्येनम्" इति । भूतवृताय ५४ भूतैः पूर्वभक्तैः वृतो वेष्टितः । अप्सरसे ५५ अप्पूर्ण सरोऽप्सरः तद्रूपः । गणसेविताय ५६ गणैः बाणादिभिः सेवितो गणसेवितः ।

४. महाकेतवे ५७ महान्पूज्यो यः केतुर्ध्वजस्तद्रूपः । धराधात्रे ५८ धराया धारकः । नैकतानरताय ५९ न एकाः नैकाश्च तास्ताना मूर्छनाश्च नैकतानास्तासु रतः । स्वराय ६० स्वरः उदात्तादिरूपः । अवेदनीयाय ६१ अवेदनीयो ज्ञातुमशक्यः । आवेद्याय ६२ आवेद्यः ईषत् ज्ञातुं योग्यः । सर्वगाय ६३ सर्वैः गीयत इति सर्वगः । सुपीति योगविभागात्मकः । सुखावहाय ६४ सुखमावहति प्रापयतीति सुखावहः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तारणश्चरणो धाता परिधा परिपूजितः ।
संयोगी वर्धनो वृद्धो गणिकोऽथ गणाधिपः ॥ ४१ ॥[1]

नित्यो धाता सहायश्च देवासुरपतिः पतिः ।
युक्तश्च युक्तबाहुश्च सुदेवोपि सुपर्वणः ॥ ४२ ॥[2]

आषाढश्च सुषाढश्च स्कंधदो हरितो हरः ।
वपुरावर्तमानोऽन्यो वपुः श्रेष्ठो महावपुः ॥ ४३ ॥[3]

शिरो विमर्शनः सर्वलक्ष्यलक्षणभूषितः ।
अक्षयो रथगीतश्च सर्वभोगी महाबलः ॥ ४४ ॥[4]

---

१. तारणाय ६५ तारयति भवसागरमिति तारणः । चरणाय ६६ चरणो वह्वृचादिः तद्रूपः । धात्रे ६७ धाता पोषकः । परिधायै ६८ परितः दधाति सा परिधा पृथिवीरूपः । परिपूजिताय ६९ परितःपूजितःपरिपूजितः । संयोगिने ७० संयोगःप्रकृतिसंयोगोस्ति यस्य स संयोगी । वर्धनाय ७१ वर्धनो जगद्वर्धकः । वृद्धाय ७२ वृद्धो वयोधिकः । गणिकाय ७३ गणिं गणनां कायति कथयतीति गणिकः । गणाधिपाय ७४ गणाधिपो गणपतिरूपः ।

२. नित्याय ७५ नित्यो विकारशून्यः । धात्रे ७६ धाता ब्रह्मरूपः । सहायाय ७७ आयेन सहितः सहायः । देवासुरपतये ७८ स्पष्टम् । पत्ये ७९ पतिः सर्वपालकः । युक्ताय ८० युक्तो नित्यमुमासंगतः । युक्तबाहवे ८१ युक्तावुमायोगविशिष्टौ बाहू यस्य स युक्तबाहुः । सुदेवाय ८२ सुष्ठु दीव्यति देव्या साकं क्रीडतीति सुदेवः । सुपर्वणाय ८३ सुष्ठु पर्वाणि यस्य स सुपर्वणः । अत्र समासांतोच् ।

३. आषाढाय ८४ आषाढस्तत्संज्ञकमासरूपः । सुषाढाय ८५ सुष्ठु साहयतीति सुषाढः । स्कन्धदाय ८६ स्कंधकोपं द्यति खंडयतीति स्कंधदः । हरिताय ८७ हरितः तद्वर्णः । हराय ८८ ह अद्भुतं राति ददातीति हरः । "हेत्यद्भुते खेदे" इत्यमरः । वपुषे ८९, वपति जगद्बीजसंतानं करोतीति वपुः । आवर्तमानाय ९० आवर्ततेऽसावावर्तमानः संवत्सरादिरूपेण परिवर्तमान इत्यर्थः । अन्याय ९१ अन्यो जगद्भिन्नः । वपुश्रेष्ठाय ९२ वपुःशरीरं श्रेष्ठं यस्य स वपुःश्रेष्ठः । महावपुषे ९३ महत्पूज्यं वपुर्यस्य स महावपुः ।

४. शिरसे ९४ शिरो यजूरूपः । "तस्य यजुरेव शिरः" इति श्रुतेः । विमर्शनाय ९५ विमर्शतीति विमर्शनः । विचारकर्ता सर्वलक्ष्यलक्षणभूषिताय ९६ सर्वैः लक्ष्याणि लक्षितुं योग्यानि यानि लक्षणानि तैर्भूषितोऽलंकृतः । अक्षपाय ९७ अक्षपो नाशशून्यः रथगीताय ९८ रथेन रथंतरसाम्ना गीतः स्तुत इत्यर्थः । सर्वभोगिने ९९ सर्वं भुनक्ति पालयति तच्छीलः सर्वभोगी । महाबलाय ८०० महत्पूज्यं बलं गणसैन्यं यस्य स महाबलः ॥ इत्यष्टमं शतकं समाप्तम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

साम्नायोथ महाम्नायस्तीर्थदेवो महायशाः ।
निर्जीवो जीवनो मंत्रः सुभगो बहुकर्कशः ॥ ४५ ॥[1]

रत्नभूतोऽथ रत्नाङ्गो महार्णवनिपातवित् ।
मूलं विशालो ह्यमृतं व्यक्ताव्यक्तस्तपोनिधिः ॥ ४६ ॥[2]

आरोहणोधिरोहश्च शीलधारी महातपाः ।
महाकण्ठो महायोगी युगो युगकरो हरिः ॥ ४७ ॥[3]

युगरूपो महारूपो वहनो गहनो नगः ।
न्यायो निर्वापणोऽपादः पण्डितो ह्यचलोपमः ॥ ४८ ॥[4]

---

१. साम्नायाय १ आम्नायेन वेदेन सहितः साम्नायः। महाम्नायाय २ महत्पूज्य आम्नायो वेदो यस्मात्स महाम्नायः। तीर्थदेवाय ३ तीर्थानां देवः स्वामी । महायशसे ४ महायशः कृष्णादीनां यस्मादसौ महायशाः। निर्जीवाय ५ निर्जीवोऽचेतनस्वरूपः। जीवनाय ६ जीवयतीति जीवनः। मंत्राय ७ मंत्रो मृतसंजीवनरूपः। सुभगाय ८ सुभगः शोभनः। बहुकर्कशाय ९ बहुकर्कशः अंतकरूपत्वान्निर्दयः।

२. रत्नभूताय १० रत्नानि चतुर्दशरत्नानि भूतानि यस्मादसौ रत्नभूतः। रत्नांगाय ११ रत्नानि स्वस्वजातिश्रेष्ठान्यंगे यस्य स रत्नांगः। महार्णवनिपातविदे १२ महार्णवः संसारसागरः तस्य निपातं नाशं वेत्तीति महार्णवनिपातवित् । मूलाय १३ मूलं संसारवृक्षांघ्रिरूपः। विशालाय १४ विशेषेण शालत इति विशालः। अमृताय १५ अमृतं सुधारूपः। व्यक्ताव्यक्ताय १६ व्यक्तं स्पष्टमव्यक्तं प्रधानं यस्मात्स व्यक्ताव्यक्तः। तपोनिधये १७ तपसां निधिः स्थानभूतः।

३. आरोहणाय १८ आरोहयतीत्यारोहणः परमपदप्रापक इत्यर्थः। अधिरोहाय १९ अधिरोहंति भक्ता यस्मिन्नित्यधिरोहः। शीलधारिणे २० शीलं सुहृत्त्वं धारयति तच्छीलः शीलधारी महातपसे २१ महत् ज्ञानमयं तपो यस्य स महातपाः। महाकंठाय २२ कंठमभिव्याप्येत्याकंठं महः उत्सवो यस्मात्स महाकंठः। महायोगिने २३ महानष्टांगयोगो यस्यास्ति स महायोगी । युगाय २४ युगः कृतादिरूपः। युगकराय २५ युगानि करोतीति युगकरः। हरये २६ हरिर्मारुतिरुपः।

४. युगरूपाय २७ युगानि शीतोष्णादिद्वंद्वानि रूपाणि यस्य स युगरूपः। महारूपाय २८ महांश्चासावरूपश्च महारूपः। वहनाय २९ वहति सर्वं प्रापयतीति वहनः। गहनाय ३० गहनो दुर्गम इत्यर्थः। नगाय ३१ नगो विल्वादिवृक्षरूपः। न्यायाय ३२ न्यायो यथार्थनिर्णयरूपः। निर्वापणाय ३३ नितरां वापयति क्षेत्रे बीजान्याकिरयतीति निर्वापणः। अपादाय ३४ अपादः पाद शून्यः। पंडिताय ३५ पंडितो विवेकीत्यर्थः। अचलोपमाय ३६ अचलः पर्वतः उपमा यस्य सोऽचलोपमः कूटस्थ इत्यर्थः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

बहुमालो महामालः शिपिविष्टः सुलोचनः ।
विस्तारो लवणः कूपः कुसुमांगः फलोदयः ॥ ४९ ॥[1]

ऋषभो वृषभो भंगो मणिबिंबजटाधरः ।
इंदुर्विसर्गः सुमुखः शूरः सर्वायुधः सहः ॥ ५० ॥[2]

निवेदनः सुधाजातः स्वर्गद्वारो महाधनुः ।
गिरावासो विसर्गश्च सर्वलक्षणलक्षवित् ॥ ५१ ॥[3]

गन्धमाली च भगवाननन्तः सर्वलक्षणः ।
संतानो बहुलो बाहुः सकलः सर्वपावनः ॥ ५२ ॥[4]

---

१. बहुमालाय ३७ बह्व्योऽनेकभक्तसमर्पिताः मालाः पुष्पादिस्रजो यस्य स बहुमालः। महामालाय ३८ महती पादावलंबिनी माला यस्य स महामालः। शिपिविष्टाय ३९ शिपि विष्टो विष्णुरूपः "विष्णुः शिपिविष्टः" इति श्रुतेः। सुलोचनाय ४० शोभनानि लोचनानि यस्य स सुलोचनः। विस्ताराय ४१ विस्तीर्यंते सर्वाणि जगंति यस्मिन्निति विस्तारः। लवणाय ४२ लवणःक्षीरसमुद्ररूपः। कूपाय ४३ कूपोन्धुरूपः। कुसुमागाय ४४ कुसुमसदृशमृदुलान्यंगानि यस्य स कुसुमांगः। फलोदयाय ४५ फलानां सत्कर्म फलानामुदयो यस्मादसौ फलोदयः।

२. ऋषभाय ४६ ऋषभः सर्वश्रेष्ठः। वृषभाय ४७ वृषभो नंदिकेश्वररूपः। भंगाय४८ भंगोनेकविधबुद्धितरंगरूपः। "भंगस्तरंगे ऋग्भेदे" इति विश्वः। मणिबिंबजटाधराय ४९ मणीनां हीरकादीनां बिंबानि प्रतिबिंबानि तद्वज्जटानां धरः। इन्दवे ५० इंदुसदृशरूपः। विसर्गाय५१ विशिष्टो जरामृत्युहीनःसर्गो रुद्रगणसृष्टिर्यस्मात्सःविसर्गः। इयं कथात्रैवोक्ता। सुमुखाय ५२ शोभनानि मुखानि यस्य स सुमुखः। शूराय५३ शूरो विक्रमकर्ता। सर्वायुधाय ५४ सर्वाण्यायुधानि यस्माद्वा यस्य स सर्वायुधः। सहाय ५५ सहते सर्वायुधप्रहारान्न गणयतीति सहः।

३. निवेदनाय ५६ नितरां वेदयति स्वभक्तान्बोधयतीति निवेदनः। सुधाजाताय ५७ सुधा अमृतं जातं यस्मात्स सुधाजातः। स्वर्गद्वाराय ५८ स्वर्गस्य द्वारं कारणभूतः। तदुक्तम् "यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरम्। अभिलाषोपनीतं यत्तत्सुखं स्वःपदास्पदम्।।" इति। महाधनुषे ५९ महत् मेरुरूपं धनुर्यस्य स महाधनुः गिरावासाय ६० गिरा वाण्या सह उष्यते अर्धरूपेणानेनेति गिरावासः। विसर्गाय ६१ विसर्गो विसर्जनीयरूपः। सर्वलक्षणलक्षविदे ६२ सर्वलक्षणानि च वेत्तीति सर्वलक्षणलक्षवित्।

४. गंधमालिने ६३ गंधेन स्वांगसुगंधेन मालते शोभते तच्छीलः गंधमाली। भगवते ६४ भगं माहात्म्यं विद्यते यस्य स भगवान्। "भगमैश्वर्यमाहात्म्यज्ञानवैराग्ययोनिषु" इति विश्वः। अनंताय ६५ नास्त्यंतः पारो यस्य सोऽनंतः। सर्वलक्षणाय ६६ सर्वाणि लक्षणानि यस्मिन्स सर्वलक्षणः। सन्तानाय ६७ संतानः कल्पवृक्षरूपः। बहुलाय ६८ बहु लाति ददातीति बहुलः। बाहवे ६९ बाहति स्वभक्तानाह्वयतीति [illegible] सकलाय ७० कलया चंद्रकलया सहितः सकलः। सर्वपावनाय ७१ सर्वान्पावयतीति [illegible]।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

करस्थाली कपाली च ऊर्ध्वसंहननो युवा।
यंत्रतंत्रसुविख्यातो लोकः सर्वाश्रयो मृदुः ॥ ५३ ॥[1]

मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः।
वार्यक्षः ककुभो वज्री दीप्ततेजाः सहस्रपात् ॥ ५४ ॥[2]

सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः।
सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ॥ ५५ ॥[3]

पवित्रं त्रिमधुर्मंत्रः कनिष्ठः कृष्णपिंगलः।
ब्रह्मदंडविनिर्माता शतघ्नः शतपाशधृक् ॥ ५६ ॥[4]

---

१. करस्थालिने ७२ कर एव स्थालो भोजनपात्रं यस्यास्तीति करस्थाली। तदुक्तं भागवते—"ततः करतलीकृत्य व्यापि हालाहलं विषम्"इति। कपालिने ७३ कं ब्रह्माणं पालयति तच्छीलः कपाली। ऊर्ध्वसंहननाय ७४ ऊर्ध्वं सर्वोपरि संहननं बलं यस्य स ऊर्ध्वसंहननः। यूने ७५ युवा नित्यतरुणः। यंत्रतंत्रसुविख्याताय ७६ यंत्रतंत्रेषु सुतरां विख्यातो यंत्रतंत्रसुविख्यातः। लोकाय ७७ लोक्यतेऽनेनेति लोकः सूर्यादिरूपः इत्यर्थः। सर्वाश्रयाय ७८ सर्वेषामाश्रयः सर्वाश्रयः। मृदवे ७९ मृदुरत्यंतकोमलरूपः।

२. मुंडाय ८० मुंडो मुंडितशिराः विरूपाय ८१ विशिष्टं रूपं प्रशंसा यस्य स विरूपः। विकृताय ८२ विशिष्टं कृतं यस्य स विकृतः। दंडिने ८३ दंडो दमः यस्यास्ति स दंडी। "दंडो यमे मानभेदे लगुडे दमसैन्ययोः" इति विश्वः। कुंडिने ८४ कुंडं देवजलाधारो नाम गंगोदकाश्रयः यस्य मौलिरस्ति स कुण्डी "कुंडं देवजलाधारे पीठरे तु कमंडलौ" इति विश्वः। विकुर्वणाय ८५ करोतीति कुर्वणः विगतः कुर्वणो यस्मादसौ विकुर्वणः कर्माप्राप्य इत्यर्थः। कुर्वण इत्यत्र ह्रस्वत्वं छांदसम्। वार्यक्षाय ८६ वारयतीति वारि भवतजनकामपूरकमक्षि नेत्रं यस्य स वार्यक्षः कृपाकटाक्षमात्रेण सर्वप्रद इत्यर्थः। ककुभाय ८७ कुकुभो वीणांकः 'ककुभः स्वरभेदेपि वीणांकेऽर्जुनपदपे" इति विश्वः। वज्रिणे ८८ वज्राणि भूषणहीरकाः संति यस्य स वज्री। दीप्ततेजसे ८९ दीप्तं तेजो यस्य स दीप्ततेजाः। सहस्रपदे ९० सहस्रमंनताः पादाः यस्य स सहस्रपात्।

३. सहस्रमूर्ध्ने ९१ सहस्रपरिमिताः मूर्धानो यस्य स सहस्रमूर्धा। देवेंद्राय ९२ देवानामिंद्रः परमेश्वरः। सर्वदेवमयाय ९३ सर्वदेवमयः सर्वदेवरूपः। गुरवे ९४ गृणातीति गुरुः हितोपदेशक इत्यर्थः। सहस्रबाहवे ९५ सहस्रसंख्याः बाहवो यस्य स सहस्रबाहुः। सर्वांगाय ९६ सर्वं ब्रह्मांडमंगं यस्य स सर्वांगः। शरण्याय ९७ शरणेषु साधुः शरण्यः। सर्वलोककृते ९८ सर्वलोकान्करोतीति सर्वलोककृत्।

४. पवित्राय ९९ पवेर्वज्रादपि भक्तान् त्रायते इति पवित्रम्। त्रिमधवे १०० त्रिविधं क्षौद्रजलक्षीररूपं मधु यस्मादसौ त्रिमधुः॥ इति नवमशतकं संपूर्णम्॥ मंत्राय १ मंत्रो देवप्रसादनरूपः "मंत्रो वेदप्रभेदे स्याद्देवादीनां प्रसादने"इति विश्वः। कनिष्ठाय २ कनिष्ठार्थोऽहोवलभाष्ये—"नित्ययूने कनिष्ठाय यद्वाऽविज्ञेयमूर्तये" इति। कृष्णपिंगलाय ३

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कला काष्ठा लवो मात्रा मुहूर्तोऽहः क्षपा क्षणः ।
विश्वक्षेत्रप्रदो बीजं लिंगमाद्यस्तु निर्मुखः ॥ ५७ ॥[1]

सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ।
स्वर्गद्वारं मोक्षद्वारं प्रजाद्वारं त्रिविष्टपः ॥ ५८ ॥[2]

निर्वाणं हृदयश्चैव ब्रह्मलोकः परा गतिः ।
देवासुरविनिर्माता देवासुरपरायणः ॥ ५९ ॥[3]

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुरगणाश्रयः ॥ ६० ॥[4]

कृष्णः कंठे कृष्णवर्णः अन्यत्र पिंगलो लोहितः कृष्णपिंगलः । ब्रह्मदंडविनिर्मात्रे ४ ब्रह्मणो दंडविनिर्माता तस्यापि कन्यानुगमनकाले दंडकर्तेत्यर्थः । शतघ्नाय ५ शतान्यसंख्यजीवान् युगपद्धंतीति शतघ्नः । शतपाशधृपे ६ शतान्यसंख्यपाशान् धृष्णोतीति शतपाशधृक् ।

१. कलायै ७ कला तत्संज्ञककालमानरूपः । "अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला" इत्यमरः । काष्ठायै ८ अष्टादशनिमेषात्मककालरूपः । लवाय ९ लवो लेशमात्र-कालरूपः । "लवो लेशे विलासे च" इति विश्वः । मात्रायै १० मात्रा ह्रस्वाद्युच्चारणकालरूपः । मुहूर्ताय ११ मुहुर्तो द्विघटिकात्मककालरूपः । अह्ने १२ अहो दिवसरूपः । क्षपायै १३ क्षपा रात्रिरूपः । क्षणाय १४ क्षणस्त्रिंशत्कलात्मककालरूपः । विश्वक्षेत्रप्रदाय १५ प्रददातीति प्रदः विश्वेषां सर्वजीवानां क्षेत्राणि शरीराणि तेषां प्रदो विश्वक्षेत्रप्रदः । बीजाय १६ बीजं वीर्यरूपः । लिंगाय १७ लिंगं चिह्नरूपः । आद्याय १८ आदौ ब्रह्मांडोत्पत्तेःप्राग्लिंगरूपेण भवतीत्याद्यः । निर्मुखाय १९ निर्गतं मुखं मुखविशिष्टं रूपं यस्मादसौ निर्मुखः नीरूप इत्यर्थः ।

२. सदसते २० सच्चासच्च तयोः समाहारः सदसत् चेतनाचेतनसमाहाररूप इत्यर्थः । व्यक्ताय २१ विशेषेण अक्तं मायाकार्यानुरंजितं ब्रह्म तद्रूपः । अव्यक्ताय २२ न व्यक्तमव्यक्तं मायाकार्याननुरक्तं तद्रूप इत्यर्थः । पित्रे २३ पिता सकलजगज्जनकः । मात्रे २४ माता जगज्जननीरूपः । पितामहाय २५ पितामहो ब्रह्मरूपः । स्वर्गद्वाराय २६ स्वर्गद्वारं तपस्तद्रूपः । मोक्षद्वाराय २७ मोक्षद्वारं वैराग्यं तद्रूपः । प्रजाद्वाराय २८ प्रजाद्वारं रागस्तद्रूपः । त्रिविष्टपाय १९ त्रीणि विष्टपाणि यस्य स त्रिविष्टपः स्वर्गमृत्युपातालाधीशः ।

३. निर्वाणाय ३० निर्वाणं मोक्षस्तद्रूपः । हृदयाय ३१ अयते प्राप्नोतीत्ययः हृदि अयः हृदयः । ब्रह्मलोकाय ३२ ब्रह्मलोकः सत्यलोकरूपः । परागतये ३३ परा मोक्षाख्या आगतिर्यस्मात्स परागतिः । देवासुरविनिर्मात्रे ३४ देवासुरौ हि सामर्थ्यविशेषात्सर्वश्रेष्ठाव-तस्तद्धेतुकनामान्याह देवासुराणां विनिर्माता उत्पादकः ।देवासुरपरायणाय ३५ तेषां परायणः परमस्थानभूतः ।

४ देवासुरगुरवे ३६ देवासुराणां गुरुः हितोपदेशकः । देवाय ३७ देवयति देवासुरान् विजिगीष-तीति देवः देवासुरनमस्कृताय ३८ देवासुरैः नमस्कृतः देवासुरनमस्कृतः । देवासुरमहामात्राय ३९ देवासुररूपौ मत्तगजौ तेषां महामात्रो नियंता । देवासुरगणाश्रयाय ४०

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।
देवाधिदेवो देवर्षिर्देवासुरवरप्रदः ॥ ६१ ॥[1]

देवासुरेश्वरो विष्णुर्देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिंत्यो देवतात्मा स्वयंभवः ॥ ६२ ॥[2]

उद्गतस्त्रिक्रमो वैद्यो वरदोऽवरजोंबरः ।
इज्यो हस्ती तथा व्याघ्रो देवसिंहो महर्षभः ॥ ६३ ॥[3]

विबुधाग्र्यः सुरः श्रेष्ठः स्वर्गदेवस्तथोत्तमः ।
संयुक्तः शोभनो वक्ता आशानां प्रभवोव्ययः ॥ ६४ ॥[4]

देवासुरगणानामाश्रयः देवासुरगणाश्रयः ।

१. देवासुरगणाध्यक्षाय ४१ देवासुरगणानामध्यक्षः स्वामी । देवासुरगणाग्रण्ये ४२ देवासुरगणानामग्रणीः मुख्यः । देवाधिदेवाय ४३ देवानधिदेवयति स्वसमीपं क्रीडयतीति देवाधिदेवः । देवर्षये ४४ देवानाम् ऋषिरतीन्द्रियदर्शकः । देवासुरवरप्रदाय ४५ देवासुरयोः वरप्रदः देवासुरवरप्रदः ।

२. देवासुरेश्वराय ४६ तयोरीश्वरः स्वामीत्यर्थः । विष्णवे ४७ विशति देवासुरसभां मोहिनीरूपेण प्रविशतीति विष्णुः । देवासुरमहेश्वराय ४८ देवासुराणां महेश्वरः पूज्यः स्वामी । सर्वदेवमयाय ४९ सर्वदेवानां मयः सुखं यस्मात् स सर्वदेवमयः । अचिंत्याय ५० अस्य विष्णोरपि चिंत्यः अचिंत्यः । देवतात्मने ५१ देवतानामात्मा ब्रह्मरूपः । "आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु" इति विश्वः । स्वयंभवाय ८२ स्वयमात्मनैव भवतीति स्वयंभवः ।

३. उद्गताय ५३ उत् उत्कृष्टं गतं यस्य स उद्गतः । त्रिक्रमाय ५४ त्रिषु त्रिभुवनेषु क्रमः पादविक्षेपो यस्य स त्रिक्रमः । वैद्याय ५५ वैद्यो भवरोगचिकित्सकः । वरदाय ५६ वराणि सर्वोत्कृष्टानि दैत्यत्रिपुराणि द्यति खंडयतीति वरदः । अवरजाय ५७ अस्य विष्णोर्वरात्स्वदत्तवरप्रदानाज्जातः सांबरूपेणोत्पन्नः वा अवरे प्रलयकाले जायते कालग्निरूपेणोत्पद्यते इत्यवरजः । अंबराय ५८ अंबरो गगनरूपः । इज्याय ५९ इज्यो यजनार्हः । हस्तिने ६० हस्ती ऐरावतरूपः । व्याघ्राय ६१ व्याघ्रो देवीवाहनरूपः । देवसिंहाय ६२ दीव्यत्यसुरान् विजिगीषतीति देवः देवश्चासौ सिंहश्च देवसिंहः देवीवाहनसिंहरूप इत्यर्थः । महर्षभाय ६३ महांश्चासौ ऋषभो महर्षभः सर्वपूज्यनंदिकेश्वररूपः ।

४. विबुधाग्र्याय ६४ विबुधेष्वग्र्यः प्रथमः । सुराय ६५ सुरो देवरूपः । श्रेष्ठाय ६६ श्रेष्ठोतिप्रशस्यः । स्वर्गदेवाय ६७ स्वर्गस्य देवः स्वामी । उत्तमाय ६८ उत्तमः परमात्मरूपः । तदुक्तं भगवद्गीतायाम् "उत्तमः पुरूषस्त्वन्यः परमात्मेत्युदाहृतः" इति । संयुक्ताय ६९ संयुक्तः समाधिसंयुक्तः । शोभनाय ७० शोभयतीति शोभनः कृपामात्रेण सर्वेषां शोभाकर इत्यर्थः । वक्त्रे ७१ वक्ता परमवाग्मी । "अधिवक्ता" इति श्रुतेः । आशानां प्रभवाय ७२ आशानां दिशां प्रभवः कारणः । अव्ययाय ७३ अस्य विष्णोः विशेषेणायः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

गुरुः कांतो निजः सर्गः पवित्रः सर्ववाहनः ।
शृंगी शृंगप्रियो बभ्रू राजराजो निरामयः ॥ ६५ ॥[1]

अभिरामः सुशरणो निरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेहो हरिणो ब्रह्मवर्चसः ॥ ६६ ॥[2]

स्थावराणां पतिश्चैव नियतेन्द्रियवर्तनः ।
सिद्धार्थः सर्वभूतार्थोऽचिंत्यः सत्यः शुचिव्रतः ॥ ६७ ॥[3]

व्रताधिपः परं ब्रह्म मुक्तानां परमा गतिः ।
विमुक्तो मुक्तकेशश्च श्रीमाञ्छ्रीवर्धनो जगत् ॥ ६८ ॥[4]

त्रैलोक्यैश्वर्यप्राप्तिर्यस्मादित्यव्ययः ।

१. गुरवे ७४ गुरुः जगद्बीजनिषेककृदित्यर्थः। कांताय ७५ कांतोऽभिक्रमदेहयुक्तः वा कस्य ब्रह्मणोप्यंतो यस्मादिति कांतः। निजाय ७६ निजः सर्वेषां स्वकीयाय। सर्गाय ७७ सृजति जगदुत्सृजतीति सर्गः। पवित्राय ७८ पावयतीति पवित्रः। सर्ववाहनाय ७९ सर्वाणि शरीराणि वाहनानि यस्य स सर्ववाहनः। शृंगिणे ८० शृंगाणि संति यस्य सः शृंगी कैलासाद्रिरूपः। शृंगप्रियाय ८१ शृंगं मेरूमध्यशिखिरं प्रियं यस्य स शृंगप्रियः। बभ्रवे ८२ बभ्रुः पिंगलवर्णः राजराजाय ८३ राज्ञामपि राजा नियंतेत्यर्थः। निरामयाय ८४ निर्गतः आमयो भवरोगादिर्यस्मात्स निरामयः।

२. अभिरामाय ८५ अभिरमंते योगिनो यस्मिन्नित्यभिरामः। सुशरणाय ८६ शोभनानि मनोज्ञानि शरणानि गृहाणि यस्मात्स सुशरणः। निरामाय ८७ नितरां रमंते योगिनो यस्मिन्निति निरामः। सर्वसाधनाय ८८ सर्वाणि साधनानि यस्मात्स सर्वसाधनः। ललाटाक्षाय ८९ ललाटे अक्षि यस्य स ललाटाक्षः। विश्वदेहाय ९० विश्वं देहो यस्य स विश्वदेहः। हरिणाय ९१ हरिणः कुरंगरूपः। ब्रह्मवर्चसाय ९२ ब्रह्मवर्चो विद्यातपउद्भूतं तेजस्तदस्ति यस्य स ब्रह्मवर्चसः।

३. स्थावराणां पत्ये ९३ स्थावराणां वृक्षगुल्मादीनां पतिः पालकः। नियतेंद्रियवर्तनाय ९४ नियतेंद्रियाः वर्तंतेऽनेनेति नियतेद्रियवर्तनः। सिद्धार्थाय ९५ सिद्धः नित्यसिद्ध एव कंठगतविस्मृतचामीकरवदज्ञानापगमलभ्यः अर्थो मोक्षरूपो यस्मात्स सिद्धार्थः। सर्वभूतार्थाय ९६ सर्वभूतानामर्थाः धर्मादयो यस्मात्स सर्वभूतार्थः। अचिन्त्याय ९७ अचिंत्यः सर्वेषां चिंतयितुमप्यशक्यः। सत्याय ९८ सत्यो यथार्थरूपः। शुचिव्रताय ९९ शुचि व्रतं यस्य स शुचिव्रतः।

४. व्रताधिपाय १००० व्रतानां नक्तव्रतादीनामधिपः स्वामी ॥ इति दशमं शतकं समाप्तम् ॥ परं १ पृणातीति परं निर्गुणं ब्रह्म तद्रूपः। ब्रह्मणे २ बृंहयतीति ब्रह्म मायाशबलं तद्रूपः। मुक्तानां परमायै गतये ३ मुक्तानां मुक्तसंगानां परमा आत्यंतिकी गतिः स्थानरूपः। विमुक्ताय ४ विशेषेणाद्वैतानुभवेन मुक्ता यस्मादिति विमुक्तः। मुक्तकेशाय ५ मुक्तो वस्तुतः मायाबंधशून्यः कः ब्रह्मा तस्यापीशः सृष्ट्यादौ नियंता। श्रीमते ६ श्रीमान्नित्यश्रीयुक्तः। श्रीवर्धनाय ७ श्रियं स्वभक्तसंपत्तिं वर्धयतीति श्रीवर्धनः। जगते १००८

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यथाप्रधानं भगवानिति भक्त्या स्तुतो मया।
भक्तिमेवं पुरुस्कृत्य मया यज्ञपतिर्विभुः ।। ६९ ।।[1]

ततो ह्यनुज्ञां प्राप्यैवं स्तुतो भक्तिमतां गतिः ।
तस्माल्लब्ध्वा स्तवं शंभोर्नृपस्त्रैलोक्यविश्रुतः ।। ७० ।।[2]

अश्वमेधसहस्त्रस्य फलं प्राप्य महायशाः ।
गणाधिपत्यं संप्राप्तस्तंडिनस्तेजसा प्रभोः ।। ७१ ।।

यः पठेच्छृणुयाद्वापि श्रावयेद्ब्राह्मणानपि ।
अश्वमेघसहस्त्रस्य फलं प्राप्नोति वै द्विजः ।। ७२ ।।

ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ।
शरणागतघाती च मित्रविश्वासघातकः ।। ७३ ।।

मातृहा पितृहा चैव वीरहा भ्रूणहा तथा ।
संवत्सरं क्रमाज्जप्त्वा त्रिसंध्यं शंकराश्रमे ।। ७४ ।।

देवमिष्ट्वा त्रिसंध्यं च सर्वपापैः प्रमुच्यते ।। ७५ ।।

इति श्री लिङ्गमहापुराणे पूर्वभागे रुद्रसहस्त्रनामकथनं नाम
पंचषष्टितमोध्यायः ।।६५ ।।

जगत्सकलविश्वरूपः ।। इत्यष्टाधिकनामसहस्त्रं समाप्तम् ।

१. तंडिऋषिः अष्टाधिकनामसहस्त्रं त्रिधन्वने नृपायोक्त्वा स्वकृतस्तवप्रकारं निरूपयति—यथाप्रधानमिति । अत्र सहस्त्रनाम्नि शिवनाम पृथक् नोक्तं तदेव सर्वनाम्नां मुख्यं विशेष्यमिति कथयति—प्रधानं मुख्यं शिवनाम अनतिक्रम्येति यथाप्रधानं यज्ञपतिर्भगवान् विभुः शिवः इति पूर्वोक्तनामभिः भक्तिं पुरस्कृत्य ततः ब्रह्मणः सकाशात् एवं पूर्वोक्तप्रकारामनुज्ञां प्राप्य भक्तिमतां गतिः मया भक्त्या स्तुत इत्यग्रिमस्थैरन्वयः । तदुक्तं भारते—शिवमेभिः स्तुवन्देवं नामभिः पुष्टिवर्धनैः" इति । अनेन गुरूपदेशं गृहीत्वा स्तवनं कार्यमिति सूचितम् ।

२. तस्मात् तंडिऋषिसकाशान्नृपः शंभोः स्तवं लब्ध्वा तंडिनस्तेजसा अश्वमेघसहस्त्रस्य फलं प्राप्य शंभोः गणाधिपत्यं संप्राप्त इत्यग्रिमेणान्वयः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

VERSION-3

लिङ्गमहापुराणे

ऋषय ऊचुः ॥

कथं देवेन वै सूत देवदेवान्महेश्वरात् ॥
सुदर्शनाख्यं वै लब्धं वक्तुमर्हसि विष्णुना ॥१ ॥[१]

सूत उवाच ॥

देवानामसुरेन्द्राणामभवच्च सुदारुणः ।
सर्वेषामेव भूतानां विनाशकरणो महान् ॥ २ ॥[२]

ते देवाःशक्तिमुशलैः सायकैर्नतपर्वभिः ॥
प्रभिद्यमानाः कुंतैश्च दुद्रुवुर्भयविह्वलाः ॥ ३ ॥

पराजितास्तदा देवा देवदेवेश्वरं हरिम् ॥
प्रणेमुस्तं सुरेशानं शोकसंविग्नमानसाः ॥ ४ ॥

तान् समीक्ष्याथ भगवान् देवदेवेश्वरो हरिः ॥
प्रणिपत्य स्थितान्देवानिदं वचनमब्रवीत् ॥ ५ ॥

---

१. ऋषयो विष्णोश्चक्रलाभवृत्तमपृच्छन्-कथमिति ॥ १ ॥
२. देवानामसुरेन्द्राणामभवच्च सुदारुणः भयंकर संग्राम इति शेषः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वत्सा:किमिति वै देवाश्च्युतालंकारविक्रमा: ।।
समागता: ससंतापा वक्तुमर्हथ सुव्रता: ।। ६ ।।[1]

तस्य तद्वचनं श्रुत्वा तथाभूता: सुरोत्तमा: ।।
प्रणम्याहुर्यथावृत्तं देवदेवाय विष्णवे ।। ७ ।।

भगवन्देवदेवेश विष्णो जिष्णो जनार्दन ।।
दानवै: पीडिता:सर्वे वयं शरणमागता: ।। ८ ।।

त्वमेव देवदेवेश गतिर्न: पुरुषोत्तम ।।
त्वमेव परमात्मा हि त्वं पिता जगतामपि ।। ९ ।।

त्वमेव भर्ता हर्ता च भोक्ता दाता जनार्दन ।
हंतुमर्हसि तस्मात्त्वं दानवान्दानवार्दन ।।१० ।।

दैत्याश्च वैष्णवैर्ब्राह्मै रौद्रैर्याम्यै: सुदारुणै: ।।
कौबेरैश्चैव सौम्यैश्च नैर्ऋत्यैर्वारुणैर्दृढै: ।। ११ ।।

वायव्यैश्च तथाग्नेयैरैशानैर्वार्षिकै: शुभै: ।।
सौरै रौद्रैस्तथा भीमै: कंपनैर्जृंभणैर्दृढै: ।। १२ ।।[2]

अवध्या वरलाभात्ते सर्वे वारिजलोचन ।
सूर्यमंडलसंभूतं त्वदीयं चक्रमुद्यतम् ।। १३ ।।

कुंठितं हि दधीचेन च्यावनेन जगद्गुरो ।।
दंडं शार्ङ्गं तवास्त्रं च लब्धं दैत्यै: प्रसादत: ।। १४ ।।[3]

पुरा जलंधरं हंतुं निर्मितं त्रिपुरारिणा ।
रथांगं सुशितं घोरं तेन तान् हंतुमर्हसि ।। १५ ।।

---

१. अंलकारा: भूषणानि विक्रमाश्चालंकारविक्रमा: च्युता: गलिता: अलंकारविक्रमा येषां ते च्युतालंकारविक्रमा:। अभवदित्यन्वय: २-५

२. वार्षिकै:पार्जन्यैरित्यर्थ: ।।

३. दधीचेन तत्संज्ञकऋषिणेत्यर्थ:। दंडं ब्रह्मदण्डं शार्ङ्गं तत्संज्ञं तवायुधं च दैत्यै: प्रसादत:ब्रह्मप्रसादाल्लब्धमित्यन्वय:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तस्मात्तेन निहंतव्या नान्यैः शरशतैरपि ॥
ततो निशम्य तेषां वै वचनं वारिजेक्षणः ॥ १६ ॥

वाचस्पतिमुखानाह स हरिश्चक्रभृत् स्वयम् ॥

श्रीविष्णुरुवाच ॥

भो भो देवा महादेवं सर्वैर्देवैः सनातनैः ॥ १७ ॥

संप्राप्य सांप्रतं सर्वं करिष्यामि दिवौकसाम् ॥
देवा जलंधरं हंतुं निर्मितं हि पुरारिणा ॥१८ ॥

लब्ध्वा रथांगं तेनैव निहत्य च महासुरान् ॥
सर्वान्धुन्धुमुखान्दैत्यानष्टषष्टिशतान् सुरान् ॥१९ ॥

सबांधवान्क्षणादेव युष्मान् संतारयाम्यहम् ॥

सूत उवाच ॥

एवमुक्त्वा सुरश्रेष्ठान् सुरश्रेष्ठमनुस्मरन् ॥ २० ॥[1]

सुरश्रेष्ठास्तदा श्रेष्ठं पूजयामास शंकरम् ॥
लिंगं स्थाप्य यथान्यायं हिमवच्छिखरे शुभे ॥ २१ ॥

मेरुपर्वतसंकाशं निर्मितं विश्वकर्मणा ॥
त्वरिताख्येन रुद्रेण रौद्रेण च जनार्दनः ॥ २२ ॥ [2]

स्नाप्य संपूज्य गंधाद्यैर्ज्वालाकारं मनोरमम् ॥
तुष्टाव च तदा रुद्रं संपूज्याग्नौ प्रणम्य च ॥ २३ ॥

देवं नाम्नां सहस्रेण भवाद्येन यथाक्रमम् ॥
पूजयामास च शिवं प्रणवाद्यं नमोंतकम् ॥ २४ ॥[3]

---

१. सुरेश्रष्ठं शिवमित्यर्थः

२. रौद्रेण रुद्रसूक्तेनेत्यर्थः ॥

३. देवं शिवं भवाद्येन नाम्नां सहस्रेण यथाक्रमं क्रममनतिक्रम्येत्यर्थः। प्रणवादिनमोंतकं यथा स्यात्तथा पूजयामासेत्यन्वयः। अत एव सर्वसहस्रनामादिनामावलीषु प्रणवादिनमोंतपाठ एव शिष्टैरेतदतिदेशादाद्रियते नन्वतिदेशे हि प्रकृतिवद्विकृतिर्भवतीतिवच्छ्रौतं प्रमाणमपेक्षितमिति

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

देवं नाम्नां सहस्त्रेण भवाद्येन महेश्वरम् ॥
प्रतिनाम सपद्येन पूजयामास शंकरम् ॥ २५ ॥

अग्नौ च नामभिर्देवं भवाद्यैः समिदादिभिः ॥
स्वाहांतैर्विधिवद्धुत्वा प्रत्येकमयुतं प्रभुम् ॥ २६ ॥[1]

तुष्टाव च पुनः शंभुं भवाद्यैर्भवमीश्वरम् ॥

श्रीविष्णुरुवाच ।

भवःशिवो हरो रुद्रःपुरूषःपद्मलोचनः ॥ २७ ॥[2]

अर्थितव्यः सदाचारःसर्वशंभुर्महेश्वरः ॥
ईश्वरः स्थाणुरीशानःसहस्त्राक्षःसहस्त्रपात् ॥ २८ ॥[3]

चेत् "तस्माद्यच्छ्रेयान्करोति तत्पापीयान्करोति"इति श्रुतिप्रमाणं ज्ञेयम् ॥

१. विष्णुनैतत्सहस्रनामभिः पूजाहोमस्तुतिकरणादेष्वस्य मुख्यत्वं ज्ञेयम्। नाम्नां सहस्रं कथयंति—भव इत्यादिना । अस्य सहस्रनाम्नःश्रीशंकरो देवता विष्णुर्ऋषिरनुष्टुप् छंदः पूजादौ विनियोगो ज्ञेयः। अत्र केषांचिन्नाम्नां समानानुपूर्विकत्वेप्यर्थभेदान्न पौनरुक्त्यं ब्रह्म यथाऽनंतमपारं तद्वदेव शाब्दब्रह्म तदुक्तं भागवतैकादशस्कंधे "शाब्दं ब्रह्म सुदुर्बोधं मनोवाचामगोचरम्। अनंतपारं गंभीरं दुर्विगाह्यं समुद्रवत् ॥" इति। तथा च यावदर्थज्ञानलेखनेऽशक्येऽतः प्रसिद्धार्थप्रदर्शनेन नामानि व्याख्यायंते। अत्र नमोंतविधेरुक्तत्वात्तद्योगे नमःस्वस्तीत्यनेन विहितचतुर्थ्यंतरूपाणि अविदुषामपि स्फुटप्रतिपत्त्यर्थं प्रदर्श्यंते । अत्र विष्ण्वादिवाचकसर्वशब्दैःसर्वांतर्यामी शिव एव प्रतिपाद्यते । तथा च श्रुतिः"यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्"इति । एतदेवोक्तमादित्यपुराणे "स एवात्मा समस्तानां जंतूनां मनुजाधिप ॥ चैतन्यरूपो भगवान् महादेवःसहोमया ॥ एकोपि बहुधा भाति लीलया केवलः शिवः ॥ ब्रह्मविष्ण्वादिरूपेण देवदेवो महेश्वरः ॥"इति

२. अत्र सहस्रसंख्यानुरोधेन केचित्संयुक्तविशेष्यविशेषणभावाः नामसु प्रदर्श्यंते १ ॐ भवाय शिवाय नमः भवंति जगत्सर्गादयो यस्मादसौ भवस्तस्मै शिवाय सच्चिनंदरूपतुरीयायेत्यर्थः" शिवमद्वैतं तुरीयं मन्यंते" इति श्रुतेः। अत्रोक्तमहोबलरुद्रभाष्ये "वस्तुतःशिवशब्दार्थो ब्रह्माद्यैरपि तत्वतः॥ नैव ज्ञातस्तदर्थोतःस यो ज्ञातुं न शक्यते ॥ परं तु ।शिवशब्दार्थः शिवः सर्वोत्तमोत्तमः॥ जानाति तत्त्वतो यस्मात्स स्वतस्तत्त्ववित्तमः॥"इति। २ हराय रुद्राय नमः हरति जगत्संहारं करोतीति हरस्तस्मै रुज्जन्ममरणादिदुःखं द्रावयतीति रुद्र इत्यर्थः। ३ पुरुषाय पुरुषो विष्णुरूपः'सहस्रशीर्षा पुरुषः इति श्रुतेः४ पद्मलोचनाय पद्मानि लोचयति विकासयतीति पद्मलोचनः सूर्यरूपः॥

३. ५ अर्थितव्याय अर्थितुं सर्वारंभादौ प्रार्थितुं योग्योर्थितव्यो गजाननरूप इत्यर्थः। ६ सदाचाराय सदा सर्वकालम् आ अनुलक्षेण चारःसंचरणं यस्य स सदाचारः प्रधानप्रकृतिशिवारूप इत्यर्थः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वरीयान् वरदो वंद्यः शंकरः परमेश्वरः ॥
गंगाधरः शूलधरः परार्थैकप्रयोजनः ॥ २९ ॥[1]

सर्वज्ञः सर्वदेवादिर्गिरिधन्वा जटाधरः ॥
चन्द्रापीडश्चंद्रमौलिर्विद्वान्विश्वामरेश्वरः ॥ ३० ॥[2]

वेदांतसारसंदोहः कपाली नीललोहितः ॥
ध्यानाधारोऽपरिच्छेद्यो गौरीभर्ता गणेश्वरः ॥ ३१ ॥[3]

---

७ सर्वशंभुमहेश्वराय सर्वं शं भवति येभ्यस्ते सर्वशंभवो रुद्रास्तेषां महेश्वरःपूज्यः स्वामीत्यर्थः। ८ ईश्वराय ईश्वरः सकलविभवैराढ्य इत्यर्थः'ईश्वरो विभवैराढ्यः'इति विश्वः। ९ स्थाणवे स्थाणुर्गमनागमनशून्यः"वृक्ष इव स्तब्धो दिवि तिष्ठति"इति श्रुतेः १० ईशानाय ईशानःसकलविद्याप्रभुः"ईशानःसर्वविद्यानाम्"इति श्रुतेः ११ सहस्राक्षाय सहस्रपदे अपरिमितनयनचरण इत्यर्थः"सहस्रपात्"इति श्रुतेः॥

१. १२ वरीयसे। अतिशयेनोरुः वरीयान् अतिमहानित्यर्थः। उरुशब्दादतिशयेर्थे 'द्विवचनविभज्योपपदे तरबीयसुनौ इतीयसुनि प्रियस्थिरेत्यादिना' वरीत्यादेशः। १३ वरदाय वंद्याय। वरान् भक्ताभिलषितार्थान् ददातीति वरदस्तस्मै अत एव वंद्योऽभिवाद्य इत्यर्थः। १४ शंकराय। शं कल्याणं करोति तच्छीलः शंकर कृञो हेत्विति टः। १५ परमेश्वराय। परा मा येषां ते परमाःविष्ण्वादयस्तेषामीश्वरः स्वामीत्यर्थः। १६ गंगाधराय। गंगायाःभागीरथ्याःधरो धारकः इत्यर्थःपचाद्यच्। १७ शूलधराय शूलस्य तत्संज्ञकायुधस्य धरःशूलधर इत्यर्थः। १८ परार्थैकप्रयोजनाय। परार्थः स्वभक्तार्थ एव एकं प्रयोजनं यस्य स परार्थैकप्रयोजनः॥

२. १९ सर्वज्ञाय। सर्वं वस्तुजातं जानाति युगपत्पश्यतीति सर्वज्ञः। २० सर्वदेवादिगिरिधन्वने। सर्वदेवादिर्विष्णुस्तद्रूपो गिरिर्मेरुः धनुर्यस्य स सर्वदेवादिगिरिधन्वा धनुषश्चेति समासांतोऽनङ्मेरुः शिखरिणामहम्' इति भगवद्गीतोक्तेः। २१ जटाधराय। जटानां लग्नकचानां धरो जटाधरः। २२ चंद्रापीडाय। चद्रः आपीडःशिखाक्षिप्तं कुसुमं यस्य स चंद्रापीडः "यत्तिर्यक् क्षिप्तमुरसि शिखास्वापीडशेखरौ" इत्यमरः। २३ चंद्रमौलये। चंद्रः मौलौ मुकुटे यस्य स चंद्रमौलिः। २४ विदुषे। वेत्तीति विद्वान्सर्वज्ञ इत्यर्थः। २५ विश्वामरेश्वराय विश्वे सर्वे च ते अमराश्च विश्वामराः तेषामीश्वरः स्वामीत्यर्थः॥ ३० ॥

३. २६ वेदांतसारसंदोहाय। वेदांतसारस्य संदोहः प्रपूरणं यस्मात्स वेदांतसारसंदोहः। २७ कपालिने नीललोहिताय। कपालं कूर्मकपालं यस्यास्तीति कपाली तस्मै नीललोहिताय रुद्ररूपायेत्यर्थः। २८ ध्यानाधाराय। ध्यानं प्रत्ययैकतानता तस्याधारोऽधिकरणमित्यर्थः। तदुक्तं योगसूत्रे "तत्र प्रत्ययैकतानता ध्यानम्" इति। २९ अपरिच्छेद्याय। अपरिच्छेद्यो व्यापकत्वाद्देशकालपरिच्छेदानर्ह इत्यर्थः। ३० गौरीभर्त्रे। गौर्याः पार्वत्याः भर्ता पतिरित्यर्थः ३१ गणेश्वराय। गणस्य पंचविंशतितत्त्वगणस्य ईश्वरः स्वामीत्यर्थः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गः स्वर्गसाधनः ॥
ज्ञानगम्यो दृढप्रज्ञो देवादेवस्त्रिलोचनः ॥ ३२ ॥[1]

वामदेवो महादेवः पांडुःपरिद्रढो दृढः ॥
विश्वरूपो विरूपाक्षो वागीशः शुचिरंतरः ॥ ३३ ॥[2]

सर्वप्रणयसंवादी वृषांको वृषवाहनः ।
ईशःपिनाकी खट्वांगी चित्रवेषश्चिरंतनः ॥ ३४ ॥[3]

तमोहरो महायोगी गोप्ता ब्रह्मांगहृज्जटी ॥
कालकालः कृत्तिवासाः सुभगःप्रणवात्मकः ॥ ३५ ॥[4]

---

१. ३२ अष्टमूर्तिविश्वमूर्तये। अष्टावर्कादयो मूर्तयो यस्य सोष्टमूर्तिरत एव विश्वं तद्रूपं जगन्मूर्तिस्तनुर्यस्य सोष्टमूर्तिर्विश्वमूर्तिः। ३३ त्रिवर्गाय। त्रिवर्गो धर्मकामार्थरूपः। ३४ स्वर्गसाधनाय स्वर्गः साध्यतेनेनेति स्वर्गसाधनः ऋतुरूप इत्यर्थः। ३५ ज्ञानगम्याय ज्ञानादेव गम्यः प्राप्यो ज्ञानगम्यः कैवल्यरूपः'ज्ञानादेव तु कैवल्यम्"इतिश्रुतेः। ३६ दृढप्रज्ञाय। दृढा अचंचला प्रज्ञा बुद्धिर्यस्मादसौ दृढप्रज्ञः। ३७ देवदेवाय। देवानिंद्रादीन्देवयति क्रीडयतीति देवदेवः। ३८ त्रिलोचनाय। त्रीणि लोचनानि यस्य स त्रिलोचनः॥

२. ३९ वामदेवाय वामदेवस्तत्संज्ञकः "वामदेवाय नमः" इति श्रुतेः ४० महादेवाय महान्पूज्यश्चासौ देवश्च महादेवः।४१ पांडवे। पांडुःशुभ्रवर्णः।४२ परिदृढाय परितःसर्वतः दृढःबलवानित्यर्थः।४३ अदृढाय अःविष्णुर्दृढःबलवान् यस्मादसावदृढः।४४ विश्वरूपाय विश्वस्मिन् रूप्यते प्रशस्यत इति विश्वरूपः। ४५ विरूपाक्षाय। विविधानि रूपाणि येषां तानि सोमसूर्याग्निरूपाण्यक्षीणि यस्य स विरूपाक्षः बहुव्रीहौ सक्थ्यक्ष्णोरिति षच्। ४६ वागीशाय वाचामीशो वागीशः४७ शुचये शुचिः शुद्ध इत्यर्थः। ४८ अंतराय अंतरः सर्वावधिरूपः"अंतरम् आत्मांतर्धिविनात्मीयबहिर्मध्यावधिष्वपि"इति विश्वः॥

३. ४९ सर्वप्रणयसंवादिने सर्वप्रणयान् सकलनीतिशास्त्राणि संवदति तच्छीलःसर्वप्रणयसंवादी। ५० वृषांकाय वृषो नंदिकेश्वरः अंकश्चिह्नं यस्य स वृषांकः। ५१ वृषवाहनाय वृषो नन्दिकेश्वरः वाहनं यस्य स वृषवाहनः। ५२ ईशाय पिनाकिने ईशः सकलनियंता तस्मै पिनाकिने पिनाकसंज्ञकधनुर्विशिष्टायेत्यर्थः। ५३ खट्वांगिने खटवांगं तत्संज्ञकायुधमस्ति यस्य स खट्वांगी। ५४ चित्रवेषाय चित्रो विचित्रो वेषो यस्य स चित्रवेषः। ५५ चिरंतनाय चिरं चिरकालं तनोति जगद्विस्तारयतीति यद्वा चिरंभवः चिरंतनः॥

४. ५६ तमोहराय। तमसः अज्ञानस्य हरो नाशक इत्यर्थः। ५७ महायोगिने गोप्त्रे। महांश्चासौ योगी च महायोगी तस्मै अत एव गोप्त्रे रक्षणशीलायेत्यर्थः। ५८ ब्रह्मांगहृज्जटिने ब्रह्मांगं ब्रह्ममस्तकं हरतीति ब्रह्मांगहृत्स चासौ जटी च ब्रह्मांगहृज्जटी। ५९ कालकालाय कालस्य यमस्यापि कालो मृत्युरित्यर्थः। ६० कृत्तिवाससे। कृत्तिर्नृसिंहचर्म वासो वसनं यस्य स कृत्तिवासाः। ६१ सुभगाय। सुष्ठु भगं षड्गुणैश्वर्यं विष्णवादीनां यस्मादसौ सुभगः। ६२ प्रणवात्मकाय। प्रणवात्मकः ऊंकारस्वरूप इत्यर्थः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

उन्मत्तवेषश्चक्षुष्यो दुर्वासाः स्मरशासनः ॥
दृढायुधः स्कंदगुरुः परमेष्ठी परायणः ॥ ३६ ॥[1]

अनादिमध्यनिधनो गिरिशो गिरिबांधवः ॥
कुबेरबंधुः श्रीकंठो लोकवर्णोत्तमोत्तमः ॥ ३७ ॥[2]

सामान्यदेवः कोदंडी नीलकंठः परश्वधी ॥
विशालाक्षो मृगव्याधः सुरेशः सूर्यतापनः ॥ ३८ ॥[3]

धर्मकर्माक्षमः क्षेत्रं भगवान् भगनेत्रभित् ॥
उग्रः पशुपतिस्तार्क्ष्यःप्रियभक्तः प्रियंवदः ॥ ३९ ॥[4]

---

१. ६३ उन्मत्तवेषाय । उन्मत्तवद्वेषो यस्य स उन्मत्तवेषः अवधूतदत्तात्रेयस्वरूपः । ६४ चक्षुष्याय । चक्षुषि भवश्चक्षुष्यः अत्रिनयनोत्पन्नसोमरूपः । ६५ दुर्वाससे दुर्वासास्तत्संज्ञकऋषिरूप इत्यर्थः । ६६ स्मरशासनाय स्मरं मदनं शास्तीति स्मरशासनः । ६७ दृढायुधाय स्कंदगुरवे । दृढमायुधं यस्य स दृढायुधस्तस्मै अत एव स्कंदस्य देवसेनापतेर्गुरुरुपदेशक इत्यर्थः । ६६ ६८ परमेष्ठिने परायणाय । परमेष्ठी ब्रह्मरूपस्तस्मै अत एव परं सत्यलोकाख्यमयनं स्थानं यस्य स परायणः ॥

२. ६९ अनादिमध्यनिधनाय । नास्ति आदिमध्यनिधनं यस्य स अनादिमध्यनिधनः । ७० गिरिशाय गिरिबांधवाय । गिरौ हिमालये शेते इति गिरिशस्तस्मै गिरौ डः छंदसीति डः गिरिबांधवो गिरिजामातेत्यर्थः । ७१ कुबेरबंधवे श्रीकंठाय । कुबेरः बंधुर्मित्रं यस्य स कुबेरबंधुस्तस्मै अत एव श्रीः कंठे समीपे यस्य स श्रीकंठः । ७२ लोकवर्णोत्तमोत्तमाय । लोकवर्णोत्तमस्य ब्राह्मणस्य उत्तमः पूज्य इत्यर्थः । ॥ ३७ ॥

३. ७३ सामान्याः मध्यमाः देवाः यस्मादसौ सामान्यदेवो देवश्रेष्ठ इत्यर्थः । ७४ कोदंडिने । कोदंडं धनुर्यस्यास्तीति कोदंडी । ७५ नीलकंठाय । नीलः कृष्णवर्णः कंठो यस्य स नीलकंठः 'नमो नीलग्रीवाय' इति श्रुतेः । ७६ परश्वधिने परश्वधः परशुर्यस्यास्तीति परश्वधी ॥ ७७ विशालाक्षः । ७८ मृगव्याधाय । मृगं मृगरूपधारिणं ब्रह्माणं विध्यतीति मृगव्याधः । ७९ सुरेशाय । सुराणां देवानामीशः सुरेशः । ८० सूर्यतापनाय । सूर्यस्तापनो यस्मादसौ सूर्यतापनः ॥ ३८ ॥

४. ८१ धर्मकर्माक्षमाय धर्मयुक्तं कर्म धर्मकर्म तत् अक्षममप्रापकं यस्य स धर्मकर्माक्षमः 'न कर्मणा' इति श्रुतेः । ८२ क्षेत्राय भगवते । क्षेत्रं बीजनिर्वापस्थानं तस्मै भगवते विष्णुरूपायेत्यर्थः । ८३ भगनेत्रभिदे उग्राय । भगस्य तत्संज्ञकादित्यस्य नेत्रं भिनत्ति दक्षयज्ञे भिन्नं करोतीति भगनेत्रभित्तस्मै अत एव उग्रः क्रूररूप इत्यर्थः । ८४ पशुपतये । पशूनां ब्रह्मादिजीवानां पतिः पालक इत्यर्थः । ८५ तार्क्ष्यप्रियभक्ताय । तार्क्ष्यो गरुडः प्रियो यस्य स तार्क्ष्यो विष्णुर्भक्तो यस्य स तार्क्ष्यप्रियभक्तः । ८६ प्रियंवदाय प्रियं स्वरहस्यमपि वदतीति प्रियंवदः प्रियवशेति खच् अरुर्द्विषेति मुम् ॥ ३९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दांतोदयाकरो दक्षः कपर्दी कामशासनः ॥
श्मशाननिलयःसूक्ष्मःश्मशानस्थो महेश्वरः ॥ ४० ॥[१]

लोककर्ता भूतपतिर्महाकर्ता महौषधी ।
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यःपुरातनः ॥ ४१ ॥[२]

नीतिः सुनीतिः शुद्धात्मा सोमसोमरतःसुखी ॥
सोमपोमृतपः सोमो महानीतिर्महामतिः ॥ ४२ ॥[३]

अजातशत्रुरालोकः संभाव्यो हव्यवाहनः ॥
लोककारो वेदकारःसूत्रकारःसनातनः ॥ ४३ ॥[४]

---

१. ८७ दांतोदयाकराय । दांतानां जितेंद्रियाणामुदयो ज्ञानोदयस्तस्याकरः खनीभूतः । ८८ दक्षाय । दक्षःपटुरित्यर्थः'दक्षःपटौ हरवृषे' इति विश्वः । ८९ कपर्पिने कपर्दो जटाजूटोस्ति यस्य स कपर्दी । ९० कामशासनाय । कामं प्रकामं शासनं यस्य स कामशासनःस्वतंत्र इत्यर्थः । ९१ श्मशाननिलयाय सूक्ष्माय । श्मशानं सुषुम्नानाडी निलयः स्थानं यस्य तस्मै अत एव सूक्ष्मःसूक्ष्मरूप इत्यर्थः । सुषुम्नायाः श्मशानसंज्ञा हठदीपिकायामुक्ता ।९२ श्मशानस्थाय । श्मशाने काश्यां तिष्ठतीति श्मशानस्थः । ९३ महेश्वराय । महान्सर्वातिशायितश्चासौ ईश्वरश्च महेश्वरः ।

२. १४ लोककर्त्रे । लोकानां भूरादीनां कर्ता उत्पादक इत्यर्थः । १५ भूतपतये । भूतानां गगनादीनां पतिःस्वामीत्यर्थः । १६ महाकर्त्रे महानपरिच्छिन्नश्चासौ कर्ता च महाकर्ता सकलोत्पादक इत्यर्थः ९७ महौषधिने महौषधं तारकज्ञानं यस्यास्तीति महौषधी ९८ उत्तराय उत् ऊर्ध्वं संसारात्तारयतीति उत्तरःतृधातोरंतर्भावितण्यर्थात् ऋदोरप् ९९ गोपतये गवां छंदोधेनूनां पतिः पालक इत्यर्थः १०० गोप्त्रे गोपायतीति गोप्ता सकलरक्षक इत्यर्थः ॥ प्रथमशतकं समाप्तम् । १ ज्ञानगम्याय ज्ञानमात्मज्ञानं गम्यं प्राप्यं यस्मादसौ ज्ञानगम्यः । २ पुरातनाय पुराभवः पुरातनः पूर्वकालेपि विद्यमान इत्यर्थः ॥

३. ३ नीतये नीतिः सन्मार्गरूपः ४ सुनीतये शोभना नीतिर्यस्मादसौ सुनीतिः ५ शुद्धात्मने शुद्धः आत्मा अंतःकरणं यस्मादसौ शुद्धात्मा ६ सोमसोमरताय उमया सहितःसोमः सोमश्चंद्रः रतो यस्मिन्नसौ सोमरतश्च सोमसोमरतः ७ सुखिने सुखी नित्यसुखविशिष्टः ८ सोमपाय सोमं सोमवल्लीरसं सर्वयज्ञेषु हूयमानं पिबतीति सोमपः९ अमृतपाय अमृतं सुधां पिबतीत्यमृतपःआतोनुपसर्गे क इति कः१० सोमाय सोमो यज्ञीयसोमवल्लीरूपः । तथा च श्रुतिः"तृतीयस्यामितो दिवि सोम आसीत्तं गायत्र्यभ्यहरत्" इति । ११ महानीतये महती पूज्या नीतिर्यस्मादसौ महानीतिः १२ महामतये महती पूज्या मतिर्यस्मादसौ महामतिः ।

४. १३ अजातशत्रवे अजातोऽनुत्पन्नःशत्रुर्यस्य सोजात्रशत्रुः सर्वत्र सम इत्यर्थः १४ आलोकाय आलोकः प्रकाशरूप इत्यर्थः १५ संभाव्याय संभावयितुं सत्कर्तुं योग्यः संभाव्यः १६ हव्यवाहनाय हव्यवाहनो बह्निरूपः १७ लोककाराय लोकांश्चतुर्दशभुवनानि करोतीति लोककारः १८ वेदकाराय वेदानृगादीन् करोतीति वेदकारः१९ सूत्रकाराय सूत्राणि

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

महर्षिः कपिलाचार्यो विश्वदीप्तिस्त्रिलोचनः ॥
पिनाकपाणिर्भूर्देवः स्वस्तिदः स्वस्तिकृत्सदा ॥ ४४ ॥[१]

त्रिधामा सौभगः शर्वः सर्वज्ञः सर्वगोचरः ॥
ब्रह्मधृग्विश्वसृक्स्वर्गः कर्णिकारःप्रियः कविः ॥ ४५ ॥[२]

शाखो विशाखो गोशाखः शिवो नैकः क्रतुःसमः ॥
गंगाप्लवोदको भावः सकलस्थपतिस्थिरः ॥ ४६ ॥[३]

ब्रह्मसूत्रादीनि करोतिति सूत्रकारः २० सनातनाय तत्संज्ञकऋषिरूपायेत्यर्थः ॥

१. २१ महर्षये कपिलाचार्याय महर्षिःपूज्यऋषिरूपस्तस्मै अत एव कपिलस्तत्संज्ञकश्चासौ आचार्यःसांख्यगुरुस्तद्रूपः२२ विश्वदीप्तये विश्वस्य जगतः दीप्तिः प्रकाशो यस्मादसौ विश्वदीप्तिः २३ त्रिलोचनाय त्रिषु स्वर्गमृत्युपातालेषु लोचनानि यस्य स त्रिलोचनःत्रैलोक्यप्रेक्षक इत्यर्थः२४ पिनाकपाणिभूर्देवाय पिनाकं तत्संज्ञकधनुःपाणौ यस्य स पिनाकपाणिश्चासौ भूर्देवश्च तत्संज्ञकलोके क्रीडमान इत्यर्थः २५ स्वस्तिदाय स्वस्ति कल्याणं ददातीति स्वस्तिदः २६ सदा स्वस्तिकृते सदा सर्वकालं स्वस्ति मंगलं करोतीति स्वस्तिकृत् ॥

२. २७ त्रिधाम्ने त्रीणि ब्रह्मविष्णुरुद्ररूपाणि धामानि तेजांसि यस्मादसौ त्रिधामा २८ सौभगाय सौभं तत्संज्ञकयानं गमयति शाल्वराज्ञे प्रापयतीति सौभगः। इयं कथा भागवते विस्तृता"अन्यत्रापि दृश्यते" इति डः २९ शर्वसर्वज्ञाय शृणंति पातकिजनान् हिंसंति ते शर्वाःरौद्रगणाःपचाद्यच् सर्वज्ञाःयस्य स शर्वसर्वज्ञः३० सर्वगोचराय सर्वं गोचरं प्रत्यक्षं यस्य स सर्वगोचरः ३१ ब्रह्मधृग्विश्वसृक्स्वर्गाय ब्रह्म वेदं धृष्णुवंति ते ब्रह्मधृषो ब्रह्मवादिनस्तेषां विश्वसृक् स्वर्गो ब्रह्मलोको यस्मादसौ ब्रह्मधृग्विश्वसृक्स्वर्गः। ३२ कर्णिकाराय। कर्णिकारस्तत्संज्ञवृक्षरूपो वा उत्पलरूपः। 'कर्णिकारो द्रुमोत्पले 'इति विश्वः। ३३ प्रियाय। प्रिय आत्मरूपत्वात्सर्वप्रेष्ठ इत्यर्थः। ३४ कवये। कविरादिकविर्वाल्मीकिरूपः। 'कविः काव्यकरे शूरे कविर्वाल्मीकिशुक्रयोः'इति विश्वः॥

३. शाखाय विशाखाय। शाखाय तत्संज्ञाय विशाखाय स्कंदरूपायेत्यर्थः। ३६ गोशाखाय। गवां वेदवाणीनां शाखाः ऋगादिसंज्ञकभेदाः यस्मादसौ गोशाखः। ३७ शिवाय। शिवो मोक्षसुखरूपः'शिवं मोक्षे सुखे भद्रे' इति विश्वः। ३८ नैकाय। नास्ति एकोऽद्वितीयो यस्मादसौ नैकः।३९ क्रतवे।क्रतुरग्निष्टोमादिरूपः।४० समाय। समःसर्वेषां तुल्य इत्यर्थः। ४१ गंगाप्लवोदकाय। गंगा भागीरथी प्लववत्तारकमुदकं यस्याःसा प्लवोदका यस्मादसौ गंगाप्लवोदकः।४२ भावाय। भावयते स्वभक्तेभ्यो मोक्षं प्रापयतीति भावः।४३ सकलाय। कलया चंद्रकलया सहितःसकलःनित्यं चंद्रकलायुक्त इत्यर्थः। ४४ स्थपतिस्थिराय। स्थपतिःमायाकंचुकी चासौ स्थिरश्च स्थपतिस्थिरः'स्थपतिः कंचुकिन्यपि' इति विश्वः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विजितात्मा विधेयात्मा भूतवाहनसारथिः ॥
सगणो गणकार्यश्च सुकीर्तिश्छिन्नसंशयः ॥ ४७ ॥[१]

कामदेवः कामपालो भस्मोद्धूलितविग्रहः ॥
भस्मप्रियो भस्मशायी कामी कांतः कृतागमः ॥ ४८ ॥[२]

समायुक्तो निवृत्तात्मा धर्मयुक्तः सदाशिवः ॥
चतुर्मुखश्चतुर्बाहुर्दुरावासो दुरासदः ॥ ४९ ॥[३]

दुर्गमो दुर्लभो दुर्गः सर्वायुधविशारदः ॥
अध्यात्मयोगनिलयः सुतंतुस्तंतुवर्धनः ॥ ५० ॥[४]

---

१. ४५ विजितात्मने । विजितः स्वाधीनःआत्मा मनो यस्मात्स विजितात्मा । ४६ विधेयात्मने । विधेयो विधिप्रतिपाद्यःआत्मा स्वरूपं यस्य स विधेयात्मा 'न चक्षुषा पश्यति कश्चनैनम्' इति श्रुतेः। ४७ भूतवाहनसारथये। भूतानां जीवानां वाहनः कर्मफलप्रापकःभूतवाहनो ब्रह्मा सारथिर्यस्य स भूतवाहनसारथिः। ४८ सगणाय। गणैः प्रथमादिभिः सहितः सगणः। ४९ गणकार्याय। गणैःपंचविंशतितत्त्वगणैःकार्यं ब्रह्मांडं यस्य स गणकार्यः।५० सुकीर्तये। सुष्ठु शोभना कीर्तिर्भक्तानां यस्मात्स सुकीर्तिः। ५१ छिन्नसंशयाय। छिन्नाःनष्टाःभक्तानां संशयाःयस्मादसौ छिन्नसंशयः॥

२. ५२ कामदेवाय। कामो मदनःदेवो जगद्विजिगीषुर्यस्मादसौ कामदेवः। ५३ कामपालाय। कामं मदनं पालयतीति कामपालः। ५४ भस्मोद्धूलितविग्रहाय। भस्मना उद्धूलितः धूसरः विग्रहो यस्य स भस्मोद्धूलितविग्रहः। ५५ भस्मप्रियाय। भस्म प्रियं यस्य स भस्मप्रियः। ५६ भस्मशायिने। भस्मनि शेते तच्छीलः भस्मशायी। ५७ कामिने कांताय। कामी कामविशिष्टोऽत एव कांतः सुंदर इत्यर्थः। ५८ कृतागमाय। कृतः आगमः वेदो येन स कृतागमः॥

३. ५९ समायुक्ताय। समायुक्तो नित्यप्रकृतियुक्तःत्वा मया लक्ष्म्या सहितः समो विष्णुः तेन आयुक्तः सर्वतो युक्त इत्यर्थः। ६० निवृतात्मने। निवृत्तः आत्मा मनो यस्मादसौ निवृतात्मा 'अप्राप्य मनसा सह'इति श्रुतेः। ६१ धर्मयुक्ताय। धर्मेण युक्तो नित्यसंगत इत्यर्थः। ६२ सदाशिवाय। सदा सर्वकालं शिवं कल्याणं यस्मात्स सदाशिवः। ६३ चतुर्मुखाय चतुर्बाहवे चत्वारि मुखानि यस्य स चतुर्मुखस्तस्मै चत्वारो बाहवो यस्य स चतुर्बाहुर्ब्रह्मरूप इत्यर्थः। ६४ दुरावासाय। दुःखेनातिक्लेशेन आवास्यते योगिभिः समाधौ चित्ते स्थाप्यत इति दुरावासः। ६५ दुरासदाय। दुःखेनासतुं समीपं प्राप्तुमशक्यो दुरासदः।

४. ६६ दुर्गमाय दुर्लभाय । दुःखेन गम्यते ज्ञायत इति दुर्गमः तस्मै अत एव दुःखेनातिप्रयासेन लभ्यो दुर्लभः। ६७ दुर्गाय। दुःखेन गंतुमशक्यःदुर्गः। ६८ सर्वायुधविशारदाय। सर्वप्रहरणेषु विशारदाः निपुणाः जामदग्न्यादयो यस्मादसौ सर्वायुधविशारदः। ६९ अध्यात्मयोगनिलयाय। आत्मानमेव अधिकृत्येध्यात्मा स चासौ योगःअसंप्रज्ञातसमाधिः निलयं स्थानं यस्य सः अध्यात्मयोगनिलयः। ७० सुतंतवे। सुष्ठु तंतुःसंतानिर्यस्मादिति

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शुभांगो लोकसारंगो जगदीशोऽमृताशनः ॥
भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः ॥ ५१ ॥[1]

हिरण्यरेतास्तरणिर्मरीचिर्महिमालयः ॥
महाह्रदो महागर्भः सिद्धवृंदारवंदितः ॥ ५२ ॥[2]

व्याघ्रचर्मधरो व्याली महाभूतो महानिधिः ।
अमृतांगोऽमृतवपुः पंचयज्ञः प्रभंजनः ॥ ५३ ॥[3]

पंचविंशतितत्त्वज्ञः पारिजातः परावरः ॥
सुलभः सुव्रतः शूरो वाङ्मयैकनिधिर्निधिः ॥ ५४ ॥[4]

सुतंतुः । ७१ तंतुवर्धनाय । तंतुमविच्छिन्नसंततिं वर्धयतीति तंतुवर्धनः ।

१. ७२ शुभांगाय । शुभान्यंगानि शरीराणि यस्मादसौ शुभांगः । ७३ लोकसारंगाय । लोकानां सारंगो लोकसारंगः भ्रमरवद्भक्तिरसग्राहक इत्यर्थः । यद्वा लोकाः सारंगा पशुपक्षिवत्क्रीडनकाः यस्य स लोकसारंगः । ७४ जगदीशाय । जगतामीशो नियंतेत्यर्थः । ७५ अमृताशनाय । अमृतं यज्ञशेषमशनं यस्य सोऽमृताशनः 'अमृतं यज्ञशेषे स्यात्' इति विश्वः । ७६ भस्मशुद्धिकराय । भस्मना शुद्धिर्भस्मशुद्धिस्तस्याःकर उत्पादक इत्यर्थः । ७७ मेरवे । मेरुःकनकाद्रिरूपः । ७८ ओजस्विने शुद्धविग्रहाय । ओजः स्वात्मबलं न त्वन्नादिबलं यस्यास्तीति ओजस्वी अस्मायामेधेति विनिः । अत एव शुद्धःविग्रहो यस्य स शुद्धविग्रहः ।

२. ७९ हिरण्यरेतसे हिरण्यं रेतो यस्य स हिरण्यरेताः । ८० तरणये मरीचये तरंति संसारं भक्ता अनेनेति तरणिस्तस्मै मरीचये सूर्यरूपायेत्यर्थः । ८१ महिमालयाय महिमस्तत्संज्ञकसिद्धेरालयःस्थानभूतः । ८२ महाह्रदाय महानक्षोभ्यः ह्रदो योगिनां ज्ञानसमुद्रो यस्मादसौ महाह्रदः । ८३ महागर्भाय महान्महत्तत्त्वं गर्भो यस्य स महागर्भः । ८४ सिद्धवृंदारवंदिताय सिद्धाः सिद्धगणाः वृंदाराः देवाश्च तैर्वंदितः स्तुत इत्यर्थः ।

३. ८५व्याघ्रचर्मधराय व्याघ्रचर्मणः धरो धारकः । ८६ व्यालिने व्यालाः वासुक्यादिसर्पा भूषणभूता यस्य संति स व्याली । ८७ महाभूताय महान् विराट् भूतःउत्पन्नो यस्मादसौ महाभूतः यो ब्रह्माणं विदधाति पूर्वम् इति श्रुतेः८८ महानिधये महांतोऽक्षयाः निधयः शंखादयो यस्मादसौ महानिधिः८९ अमृतं मृतिशून्यमंगं यस्मादसावमृतांगः९० अमृतवत्सुवर्णवद्वपुः शरीरं यस्य सोऽमृतवपुः 'अमृतं वै हिरण्यम् इति श्रुतेः ।' ९१ पंचयज्ञाय पंच देवयज्ञादयो नित्ययागा यस्य स पंचयज्ञः । ९२ प्रभंजनाय प्रकर्षेण भंजयति स्वभक्तमायावरणं नाशयतीति प्रभंजनः ॥

४. ९३ पंचविंशतितत्वज्ञाय पंचविंशतितत्वानि ज्ञापयति स्वभक्तेभ्यः बोधयतीति पंचविंशतितत्त्वज्ञः । 'अंतर्भावितण्यर्थात् ज्ञाधातोरातोनुपसर्गे इति कः' । ९४ पारिजाताय पारिजातस्तत्संज्ञककल्पद्रुमरूपः । ९५ परावराय परं ब्रह्म अवरं जगदुभयरूपः । ९६ सुलभाय सुखेन लब्धुं भक्तजनैः प्राप्तुं शक्यःसुलभः । ९७ सुव्रताय शूराय सुष्ठु व्रतं नियमाचरणं यस्य स सुव्रतस्तस्मै शूराय सूर्यरूपायैत्यर्थः । 'शूरःचरे भटे सूर्ये' इति विश्वः९८ वाङ्मयैकनिधये

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः ॥
आश्रमः क्षपणः क्षामो ज्ञानवानचलाचलः ॥ ५५ ॥[१]

प्रणणभूतो दुर्ज्ञेयःसुपर्णो वायुवाहनः ॥
धनुर्धरो धनुर्वेदो गुणराशिर्गुणाकरः ॥ ५६ ॥[२]

अनंतदृष्टिरानंदो दंडो दमयिता दमः ॥
अभिवाद्यो महाचार्यो विश्वकर्मा विशारदः ॥ ५७ ॥[३]

वीतरागो विनीतात्मा तपस्वी भूतभावनः ॥
उन्मत्तवेषः प्रच्छन्नो जितकामो जितप्रियः ॥ ५८ ॥[४]

वाङ्मयस्य शब्दशास्त्रस्येकोऽद्वितीयः निधिः स्यानभूतः। तदुक्तं शिक्षायां "येनाक्षरसमाम्नायमधिगम्य महेश्वरात्। कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः"इति। निधये ९९ नितरां धीयते योगिभिश्चित्ते स्थाप्यत इति निधिः'उपसर्गे घोःकिः'इति किः।

१. २०० वर्णाश्रमगुरवे वर्णानां ब्राह्मणादीनामाश्रमाणां ब्रह्मचर्यादीनां गुरुर्जनक इत्यर्थः। इति द्वितीयशतकं समाप्तम् ॥ १ वर्णिने वर्णी ब्रह्मचारिरूपः'वर्णिने वर्णी ब्रह्मचारिणि'इति विश्वः। २ शत्रुजिच्छत्रुतापनाय। शत्रून्स्वभक्तशत्रून् जयतीति शत्रुजित्स चासौ शत्रुतापनः शत्रुतापनः शत्रुसंतापकर इत्यर्थः। ३ आश्रमाय। आश्रम आश्रमसदृशः जन्ममरणायासनिवर्तकत्वात्सकलविश्रांतिस्थानभूत इत्यर्थः। ४ क्षपणाय। क्षपयतीति क्षपणःस्वभक्तपापक्षयकारकः इत्यर्थः ५ क्षामाय क्षामःकृशरूपः६ ज्ञानवते ज्ञानवान्नित्यज्ञानयुक्तः ७ अचलाचलाय अचलाःस्थिराःअचलाःपर्वताःयस्मादसौ अचलाचलः।

२. ८ प्रमाणभूताय प्रमाणानि प्रत्यक्षादीनि भूतान्युत्पन्नानि यस्मादसौ प्रमाणभूतः। ९ दुर्ज्ञेयाय दुःखेनातिप्रयासेन ज्ञातुं योग्यो दुर्ज्ञेयः। १० सुपर्णाय सुष्ठु सौवर्णे पर्णे पक्षौ यस्य स सुपर्णःगरुडरूपः। ११ वायुवाहनाय वायवःवाहने रथे सोपानभूताःयस्य स वायुवाहनः। १२ धनुर्धराय धनुर्वेदाय धनुषःवेदो यस्मात्स धनुर्वेदः। १३ गुणराशये गुणानां षोडशाध्यायोक्तयोगादिगुणानां राशयः संघाः यस्मात्स गुणराशिः। १४ गुणाकराय गुणानां योगादीनामाकरःखनीभूत इत्यर्थः॥ ५६ ॥

३. १५ अनंतदृष्टये अनंताः असंख्याः दृष्टयो यस्य सोऽनंतदृष्टिः। १६ आनंदाय आनंद आनंदरूपः"आनंदं ब्रह्म"इति श्रुतेः। १७ दंडाय दमयित्रे दंडो दंडरूपः तस्मै अतएव दमयिता सकलदुष्टदमकारक इत्यर्थः। 'दंडो दमयतामस्मि' इति भगवद्गीतोक्तेः। १८ दमाय दम इंद्रियनिग्रहस्तद्रूपः। १९ अभिवाद्याय अभिवाद्यःसर्वस्तुत्य इत्यर्थः। २० महाचार्याय महांत आचार्या गुरवो यस्मात्स महाचार्यः। २१ विश्वकर्मणे विश्वं जगत्कर्म यस्य स विश्वकर्मा। २२ विशारदाय। विशिष्टा शारदा सरस्वती यस्मात्स विशारदः।

४. २३ वीतरागाय वीतःगतःरागो विषयप्रीतिर्भक्तानां यस्मात्स वीतरागः। २४ विनीतात्मने विनीतो नम्रःआत्मा स्वभावो यस्मात्स विनीतात्मा। २५ तपस्विने तपोऽस्ति यस्मिन् स तपस्वी।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कल्याणप्रकृतिः कल्पः सर्वलोकप्रजापतिः ।।
तपस्वी तारको धीमान् प्रधानः प्रभुरव्ययः ।। ५९ ।।[1]

लोकपालोऽन्तर्हितात्मा कल्पादिः कमलेक्षणः ।।
वेदशास्त्रार्थतत्वज्ञो नियमो नियमाश्रयः ।। ६० ।।[2]

चंद्रः सूर्यः शनिः केतुर्विरामो विद्रुमच्छविः ।।
भक्तिगम्यःपरं ब्रह्म मृगबाणार्पणोऽनघः ।। ६१ ।।[3]

---

२६ भूतभावनाय भूतानि भावयति उत्पादयतीति भूतभावनः। २७ उन्मत्तवेषाय प्रच्छन्नाय उन्मत्तवद्वेषो यस्य स उन्मत्तवेषस्तस्मै अत एव प्रच्छन्नः गूढरूपः। २८ जितकामाय जितः कामो मदनो येन स जितकामः। २९ अजितप्रियाय अजितो विष्णुः प्रियो यस्य सोजितप्रियः।

१. ३० कल्याणप्रकृतये कल्याणी प्रकृतिर्यस्य स कल्याणप्रकृतिः। ३१ कल्पाय. कल्पःसर्वप्रथमः'कल्पःस्यात्प्रथमे न्याये शास्त्रब्राह्मदिने विधौ'इति विश्वः। ३२ सर्वलोकप्रजापतये। सर्वलोकेषु चतुर्दशभुवनेषु प्रजास्तासां पतिःपालक इत्यर्थः। ३३. तपस्विने तारकाय। तप एव स्वं यस्यास्तीति तपस्वी तस्मै अत एव तारको भवसमुद्रोत्तारक इत्यर्थः। ३४ धीमते। धीर्धारणावती बुद्धिर्नित्यमस्येति धीमान्। ३५ प्रधानप्रभवे। प्रधानस्य प्रकृतेः प्रभुःस्वामीत्यर्थः। ३६ अव्ययाय। न व्येतीत्यव्ययः नाशशून्य इत्यर्थः।

२. ३७ लोकपालाय। लोकान्पालयतीति लोकपालः। ३८ अंतर्हितात्मने। अंतर्हितो मायातिरोहितः आत्मा स्वरूपं यस्य सोंतर्हितात्मा। ३९ कल्पादये। कल्पस्य शास्त्रस्य आदिः कारणं। तदुक्तं शारीरके "शास्त्रयोनित्वात्"इति। ४० कमलेक्षणाय। कमला श्रीःईक्षणाद्यस्य स कमलेक्षणः। ४१ वेदशास्त्रार्थतत्त्वज्ञाय। वेदाश्च शास्त्राणि च वेदशास्त्राणि तेषामर्थतत्वज्ञास्तत्त्ववेत्तारो मुनयो यस्मात्स वेदशास्त्रार्थतत्त्वज्ञः। ४२ नियमाय। नितरां यमस्तत्संज्ञकप्रथमं योगांगं यस्मात्स नियमः। ४३ नियमाश्रयाय। नियमादिंद्रियनिग्रहादाश्रयो यस्य स नियमाश्रयः।

३. ग्रहाणामपि तद्रूपत्वात्तद्वाचकषण्णामानि कथयति—४४ चंद्राय। चंदयति आह्लादयतीति चंद्रःतत्संज्ञकग्रहरूपः। ४५ सूर्याय। सुवति जगत्प्रेरयतीति सूर्यस्तद्रूपः। ४६ शनये। शनिस्तत्संज्ञकग्रहणरूपः। ४७ केतवे। केतुर्धूमकेतुरूपः। ४८ विरामाय। विशेषेण रम्यतेऽनेनेति विरामः अतिसुंदरबुधरूप इत्यर्थः। ४९ विद्रुमच्छवये। विद्रुमवत् प्रबालवच्छविः कांतिर्यस्येति विद्रुमच्छविःभौमरूपः गुरुशुक्रनामान्यग्रे वक्ष्यंते। ५० भक्तिगम्याय। भक्त्या परमप्रीत्या गम्यःप्राप्तुं योग्य इत्यर्थः। ५१ परं ब्रह्म मृगबाणार्पणाय। परंब्रह्मरूपो यो मृगः अन्वेष्यस्तस्मिन् बाणस्य मनोरूपस्य अर्पणं यस्मात्स परंब्रह्ममृगबाणार्पणः। तदुक्तमेकत्र "प्रणवो धनुः शरो ह्यात्मा ब्रह्म लक्षणमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्" इति। ५२ अनघाय। नास्ति अघं पापं यस्मात्सोऽनघः। तदुक्तं भागवते "यद्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हंति तत्"इति।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अद्रिराजालयःकांतः परमात्मा जगद्गुरुः ॥
सर्वकर्माचलस्त्वष्टा मंगल्यो मंगलावृतः ॥ ६२ ॥[१]

महातपा दीर्घतपाः स्थविष्ठः स्थविरो ध्रुवः ॥
अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥ ६३ ॥[२]

संवत्सरकरो मंत्रःप्रत्ययः सर्वदर्शनः ॥
अजः सर्वेश्वरःस्निग्धो महारेता महाबलः ॥ ६४ ॥[३]

योगी योग्यो महारेताः सिद्धः सर्वादिरग्निदः ॥
वसुर्वसमुनाः सत्यःसर्वपापहरो हरः ॥ ६५ ॥[४]

---

१. ५३ अद्रिराजालयाय । अद्रिराजेषु मेर्वादिषु आलयानि यस्य सोऽद्रिराजालयः । ५४ कांताय । कःब्रह्मा अंते सारथिभूतःसमीपे यस्य स कांतः । ५५ परमात्मने । परमः सर्वोत्कृष्टश्चासावात्मा च परमात्मा सर्वव्यापकत्वात्सर्वत्र विद्यमान इत्यर्थः। तदुक्तं 'यच्चास्य संततो भावस्तस्मादात्मेति कथ्यते'इति। ५६ जगद्गुरवे जगतीं गुरुर्हितोपदेशक इत्यर्थः। ५७ सर्वकर्माचलाय । सर्वकर्म पूजादिकमचलमक्षयं यस्मात्स सर्वकर्माचलः । ५८ त्वष्ट्रे । त्वक्षति सूर्यमपि तनूकरोतीति त्वष्टा विश्वकर्मरूपः । ५९ मंगल्याय मंगलावृताय । मंगलाय हितो मंगल्यस्तस्मै अत एव मंगलेन आवृतो वृत इत्यर्थः ।

२. ६० महातपसे । महत्सर्वातिशयितं तपो यस्य स महातपाः। ६१ दीर्घतपसे। दीर्घमजरामरत्वाद्बहुकालं तपो यस्य स दीर्घतपाः। ६२ स्थविष्ठाय। अतिशयेन स्थूलः स्थविष्ठः स्थूलदूरेत्यादिना साधुः। ६३ स्थविराय। स्थविरो वृद्धरूपः। ६४ ध्रुवाय। ध्रुवोऽचंचल इत्यर्थः। ६५ अह्ने। अहर्दिवसरूपः। ६६ संवत्सराय। संवत्सरस्तत्संज्ञकालरूपः। ६७ व्याप्तये। व्याप्तिः सर्वहेतुसमानाधिकरणाभावा-प्रतियोगिरूपः सर्वत्र विद्यमान इत्यर्थः। ६८ प्रमाणाय। प्रमाणं मर्यादारूपः'प्रमाणं नित्यमर्यादासत्यवादिप्रमातृषु'इति विश्वः। ६९ परमाय। परा मुक्तिरूपा मा लक्ष्मीर्यस्य स परमः। ७० तपसे। तप ऋतादिरूपः'ऋतं तपःसत्यं तपः'इति श्रुतेः।

३. ७१ संवत्सरकराय। संवत्सराणां प्रभवादीनां करः उत्पादक इत्यर्थः। ७२ मंत्राय प्रत्ययाय । मंत्रो गुप्तसंभाषणीयस्तस्मै प्रत्ययाय अनुभवरूपायेत्यर्थः। ७३ सर्वदर्शनाय। सर्वं दृश्यते यस्मिन्नसौ सर्वदर्शनः। ७४ अजाय। न जायत इत्यजः नित्यसिद्ध इत्यर्थः। ७५ सर्वेश्वराय। सर्वेषामीश्वरः सर्वेश्वरः। ७६ स्निग्धाय। स्निग्धो भक्तस्नेहयुक्तः। ७७ महारेतसे महाबलाय। महदस्कन्नत्वात्पूज्यं रेतो यस्य स महारेतास्तस्मै 'ऊर्ध्वरेतं विरूपाक्षम्'इति श्रुतेः। अत एव महदतिशयितं बलं यस्य स महाबलः।

४. ७८ योगिने। योगी नित्ययोगविशिष्टः। ७९ योग्याय। योगाय प्रभवतीति योग्यः। ८० महारेतसे। महत्सुवर्णरूपत्वात्पूज्यं रेतो यस्य स महारेताः। ८१ सिद्धाय। सिद्धो नित्यनिष्पन्नरूपः। ८२ सर्वादये। सर्वस्य आदिःप्रारंभो यस्मात्स सर्वादिः। ८३ अग्निदाय। अग्निं ज्ञानाग्निं ददातीत्यग्निदः। तदुक्तं भगवद्गीतायां "ज्ञानाग्निः सर्वकर्माणि

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अमृतः शाश्वतः शांतो बाणहस्तः प्रतापवान् ॥
कमंडलुधरो धन्वी वेदांगो वेदविन्मुनिः ॥ ६६ ॥[1]

भ्राजिष्णुर्भोजनं भोक्ता लोकनेता दुराधरः ॥
अतींद्रियो महामायः सर्वावासश्चतुष्पथः ॥ ६७ ॥[2]

कालयोगी महानादो महोत्साहो महाबलः ।
महाबुद्धिर्महावीर्यो भूतचारी पुरंदरः ॥ ६८ ॥[3]

भस्मसात्कुरुतेऽर्जुन" इति । ८४ वसवे । वसतीति वसुःसर्वभूतावास इत्यर्थः । ८५ वसुमनसे वसु प्रशस्यं मनो यस्मात्स वसुमनाः ८६ सत्यसर्वपापहराय । सत्यश्चासौ सर्वपापहरश्च सत्यसर्वपापहरः । ८७ हराय । ह अद्भुतं राति ददातीति हरः ।

१. ८८ अमृताय शाश्वताय । अमृतो मोक्षरूपस्तस्मै अतएव शाश्वतो नित्यः । ८९ शांताय । शांतो निःस्पृहत्वात्सुखरूपः ९० वाणहस्ताय प्रतापवते वाणस्त्रिपुरांतकशरः हस्ते यस्य स वाणहस्तस्तस्मै अतएव प्रतापवान् शौर्यविशिष्टः । ९१ कमंडलुधराय । कमंडलोः करकस्य धरो धारक इत्यर्थः । ९२ धन्विने । धन्वी पिनाकधन्वविशिष्टः । ९३ वेदांगाय । वेदरूपाण्यंगानि यस्य स वेदांगः 'तस्य यजुरेव शिरः' इति श्रुतेः । ९४ वेदविदे । वेदानां वित् ज्ञानं यस्मात्स वेदवित् । "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुतेः । ९५ मुनये । मननशीलो मुनिर्यतिरूपः "मुनिर्यतींगुदीबुद्धपिप्पलागस्तिकिंशुके" इति विश्वः ।

२. ९६ भ्राजिष्णवे । भ्राजति दीप्यते तच्छीलःभ्राजिष्णुः । ९७ भोजनाय भोक्त्रे ।भुज्यते तद्भोजनम् अन्नं तद्रूपस्तस्मै भोक्त्रे अभ्यवहारकर्त्रे इत्यर्थः । ९८ लोकनेत्रे । लोकानां नेता नियंतेत्यर्थः । ९९ दुराधराय । दुःखेनापि आधर्तुं स्वांके स्थापयितुमशक्यो दुराधरः । ३०० अतीन्द्रियाय इंद्रियाणि अतिक्रांतोतींद्रियःइंद्रियागोचर इत्यर्थः ॥ इति तृतीयशतकं समाप्तम् ।. १ महामायाय । महती दुष्पारा माया यस्य स महामायः । २ सर्वावासाय । सर्वस्य विश्वस्यावासःस्थानभूतः सर्वावासः । ३ चतुष्पथाय । चत्वारःपंथानो धर्मादयो यस्मात्स चतुष्पथः ।

३. ४ कालयोगिने कालं मृत्युं स्वकार्ये योजयति तच्छीलःकालयोगी संपृच्छतेति घिनुण् 'मृत्युर्धावति पंचमः' इति श्रुतेः । ५ महानादाय । महान्पूज्यः नादः अनाहतध्वनिर्यस्मात्स महानादः । ६ महोत्साहाय । महान् पूज्यःउत्साहो यस्य स महोत्साहः । ७ महाबलाय । 'महत् बलं यस्मात्स महाबलः । ८ महाबुद्धये महती पूज्या बुद्धिर्यस्मात्स महाबुद्धिः । ९ महावीर्याय । महद्वीर्यं यस्मात्स महावीर्यः । १० भूतचारिणे । भूतेषु सर्वप्राणिषु चरति भूतचारी । ११ पुरंदराय । पुराणि त्रिपुराणि दारयतीति पुरंदरः 'वाचंयमपुरंदरौ च'इति निपातनात्पूःशब्दस्यामंतत्वम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥
अनिर्देश्यवपुः श्रीमान् सर्वहार्यमितो गतिः ॥ ६९ ॥[1]

बहुश्रुतो बहुमयो नियतात्मा भवोद्भवः ॥
ओजस्तेजो द्युतिकरो नर्तकःसर्वकामकः ॥ ७० ॥[2]

नृत्यप्रियो नृत्यनृत्यः प्रकाशात्मा प्रतापनः ॥
बुद्धस्पष्टाक्षरो मंत्रः सन्मानःसारसंप्लवः ॥ ७१ ॥[3]

युगादिकृद्युगावर्तो गंभीरो वृषवाहनः ॥
इष्टो विशिष्टःशिष्टेष्टः शुरभःशरभो धनुः ॥ ७२ ॥[4]

---

१. १२ निशाचराय। निशायां कालरात्र्यां चरति क्रीडत इति निशाचरः। इयं कथा योगवासिष्ठादौ विस्तृता। १३ प्रेतचारिमहाशक्तये। प्रेतेन शववाहनेन चरति तच्छीलः। प्रेतचारिणी सा चासौ महाशक्तिश्च प्रेतचारिमहाशक्तिःचामुण्डारूप इत्यर्थः। 'पुंवत्कर्मधारय' इति पुंवत्। तदुक्तं सप्तशत्यां 'चामुंडा शववाहना'इति। १४ महाद्युतये। महती सर्वातिशयिता द्युतिर्दीप्तिर्यस्य स महाद्युतिः। तदुक्तं ब्रह्मोत्तरखंडे 'सूर्यकोटिप्रतीकाशम्'इति. १५ अनिर्देश्यवपुषे। अनिर्देश्यं वक्तुमप्यनर्हं वपुर्यस्य सोनिर्देश्यवपुः तदुक्तं महिम्नि 'अतीतःपंथानं तव च महिमा वाङ्मनसयोः' इति। १६ श्रीमते। श्रीमान्नित्यश्रीयुक्तः। १७ सर्वहार्यमिताय। सर्वं हरति तच्छीलः सर्वहारी महाकालस्तेनाप्यमितोऽपरिमित इत्यर्थः। १८ गतये। गतिः सन्मार्गरूपः'गतिर्मार्गे दशायां च ज्ञाने यात्राभ्युपाययोः' इति विश्वः।

२. १९ बहुश्रुताय। बहु श्रुतं शास्त्रं यस्मात्स बहुश्रुतः। २० बहुमयाय। बहु अपारं मयःसुखं यस्मात्स बहुमयः। २१ नियतात्मने। नियतानां नियतमनसामात्मा। सततं गम्यमान इत्यर्थः। २२ भवोद्भवाय। भवस्य संसारस्योद्भवः प्रादुर्भावो यस्मात्स भवोद्भवः। २३ ओजस्तेजोद्युतिकराय। ओजो बलं तेजःशौर्यं द्युतिर्दीप्तिस्तासां कर ओजस्तेजोद्युतिकरः। नर्तकाय २४ नर्तयतीति नर्तकःजगत्सूत्रधार इत्यर्थः। नृतिधातोः ष्वुन्। २५ सर्वकामकाय। सर्वो विश्वरूपःकामोभिलाषो यस्य स सर्वकामकः'सोकामयत' इति श्रुतेः। 'कामःस्मरेभिलाषे च' इति विश्वः।

३. २६ नृत्यप्रियाय। नृत्यं नर्तनं प्रियं यस्य स नृत्यप्रियः। नृत्यनृत्याय २७ नृत्यं नृत्यान्नर्तनाद्यस्य स नृत्यनृत्यः। नृत्यप्रवर्तक इत्यर्थः। २८ प्रकाशात्मने प्रतापनाय। प्रकाशःप्रदीप्तः आत्मा देहो यस्य स प्रकाशात्मा तस्मै अतएव प्रतापनो निदाघेन संतापकारकसूर्यरूपः। २९ बुद्धस्पष्टाक्षराय। स्पष्टं स्वतःप्रकाशं च तदक्षरं च स्पष्टाक्षरं ब्रह्म बुद्धं ज्ञातं स्पष्टाक्षरं सनकादिभिर्यस्मात्स बुद्धस्पष्टाक्षरः। ३० मंत्राय। मननात्त्रायत इति मंत्रः गायत्र्यादिरूप इत्यर्थः। ३१ सन्मानाय। सतां मानःप्रमाणभूत इत्यर्थः। ३२ सारसंप्लवाय। सम्यक् प्लवः संप्लवः सारो वरश्चासौ संप्लवश्च सारसंप्लवः दुष्पारभवांबुधिपोतरूप इत्यर्थः। 'सारो बले स्थिरांश च न्याय्ये क्लीवं वरे त्रिषु' इत्यमरः।

४. ३३ युगादिकृद्युगावर्ताय। युगादेर्युगादिकालस्य कृत्कर्ता चासौ युगानि कृतादीन्यावर्तन इति

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अपां निधिरधिष्ठानं विजयो जयकालवित् ॥
प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥ ७३ ॥[1]

विरोचनः सुरगणो विद्येशो विबुधाश्रयः ॥
बालरूपो बलोन्माथी विवर्तो गहनो गुरूः ॥ ७४ ॥[2]

करणं कारणं कर्ता सर्वबंधविमोचनः ॥
विद्वत्तमो वीतभयो विश्वभर्ता निशाकरः ॥ ७५ ॥[3]

युगावर्तः ३४ गंभीराय । गंभीरोऽतलस्पर्शो विष्णुनाप्यदृष्टतल इत्यर्थः । ३५ वृषवाहनाय वृषो धर्मःवाहनं यस्य सः वृषवाहनः "स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः" इत्यमरः । ३६ इष्टाय । इष्टः परमानंदात्मत्वेन सर्वप्रिय इत्यर्थः 'आत्मनःकामाय सर्वं परिकल्प्यते' इति श्रुतेः । ३७ विशिष्टाय शिष्टेष्टाय । विशिष्टः सर्वश्रेष्ठोऽत एव शिष्टानां विदुषामिष्टःप्रियो वा शिष्टैरिष्टः पूजितः । ३८ शरभाय । शरभस्तत्संज्ञकपक्षिरूपः । ३९ शरभाय धनुषे । शरं भजतीति शरभस्तस्मै अतएव धनुषे धनूरूपायेत्यर्थः ।

१. ४० अपां निधये । अपां गंगोदकानां निधीयंतेस्मिन्निति निधिः स्थानभूतः उपसर्गे घोःकिरिति किः । ४१ अधिष्ठानविजयाय । अधिष्ठानस्य लिंगशरीरस्य विजयो नाशो यस्मात्सोधिष्ठानविजयः । ४२ जयकालविदे । जयकालस्य वित् ज्ञानं यस्मात्स जयकालवित् । ४३ प्रतिष्ठिताय । प्रतिष्ठा जगत्स्थितिः संजाता यस्य स प्रतिष्ठितः । ४४ प्रमाणज्ञाय । प्रमाणं ब्रह्मांडादिपरिमाणं जानातीति प्रमाणज्ञः । ४५ हिरण्यकवचाय । हिरण्यस्य कवचं यस्य स हिरण्यकवचो हिरण्यगर्भरूपः । ४६ हरये हरति स्मृतिमात्रेण पातक मपनयतीति हरिः ।

२. ४७ विरोचनाय । विशेषण सर्वातिशयेन रोचत इति विरोचनः । ४८ सुरगणाय । सुराः देवाःगणाःपार्षदाःयस्य स सुरगणः । ४९ विद्येशाय विबुधाश्रयाय । विद्यायाः ईशःनियंता तस्मै अत एव विवुधानां ज्ञानिनामाश्रयो विवुधाश्रयः स ५० बालरूपाय । बालवद्रूपं स्वरूपं यस्य स बालरूपः । इयं कथा भारते द्रोपपर्वणि "पुराणि दग्धवंतं तं देवी याता प्रवीक्षितुम्" "बालमंकगतं कृत्वा स्वयं पंचशिखं पुनः"इत्यादिना । ५१ बलोन्माथिने. बलान्यसुरसैन्यान्युन्मंथति तच्छीलो बलोन्माथी । ८२ विवर्ताय । विशेषेण वर्तयति जगद्भ्रमं करोतीति विवर्तः । ५३ गहनाय गुरवे । गहनः स्वतो दुर्बोधस्तस्मै गुरवे हितोपदेशकरूपायेत्यर्थः ।

३. ५४ करणाय । जगदुत्पत्तौ प्रकृष्टतमं कारणं करणं मनस्तद्रूपः । ५५ कारणाय । कारणो निमित्तकारणबुद्धिरूपः । ५६ कर्त्रे । करोतीति सकलोत्पादकाहंकाररूपः । ५७ सर्वबंधविमोचनाय । विमुच्यते अनेनेति विमोचनः । सर्वबंधेभ्यो विमोचनः परमात्मरूपः । ५८ विद्वत्तमाय वीतभयाय । विद्वत्सु श्रेष्ठो विद्वत्तमस्तस्मै अतएव भीतं भयं यस्मात्स वीतभयः । ५९ विश्वभर्त्रे विश्वं विभर्ति तच्छीलो विश्वभर्ता विश्वपोषकःइत्यर्थः । ताच्छील्ये तृन् । ६० निशाकराय । निशां प्रलयरूपां रात्रिं करोति तच्छीलो निशाकरः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ।
दुंदुभो ललितो विश्वो भवात्मात्मनि संस्थितः ॥ ७६ ॥[1]

वीरेश्वरो वीरभद्रो वीरहा वीरभृद्विराट् ॥
वीरचूडामणिर्वेत्ता तीव्रनादो नदीधरः ॥ ७७ ॥[2]

आज्ञाधारस्त्रिशूली च शिपिविष्टः शिवालयः ।
बालखिल्यो महाचापस्तिग्मांशुर्निधिरव्ययः ॥ ७८ ॥[3]

अभिरामः सुशरणः सुब्रह्मण्यः सुधापतिः ।
मघवान्कौशिको गोमान् विश्रामः सर्वशासनः ॥ ७९ ॥[4]

---

१. ६१ व्यवसायाय । विशेषेण अवसायस्तत्वनिश्चयो यस्मात्स व्यवसायः । ६२ व्यवस्थानाय । विशेषेणावस्थानं पुनरावृत्तिशून्यं यस्मात्स व्यवस्थानः । ६३ स्थानदाय स्थानानि इंद्रादिपदानि ददातीति स्थानदः । ६४ जगदादिजाय । जगतामादिजो महान्यस्मात्स जगदादिजः । ६५ दुन्दुभाय दंदुभिर्यस्यास्तीति दुंदुभो नरेन्द्ररूपः'नराणां च नरेंद्रोहम्'इति भगवद्गीतोक्तेः । ६६ ललिताय । ललितःसर्वसुंदररूपः । ६७ विश्वस्मै । विश्वो जगद्रूप इत्यर्थः । ६८ भवात्मात्मनिसंस्थिताय । भवात्मनां पांचभौतिकदेहानामात्मनि जीवे संस्थितोंतर्यामिरूपेण विद्यमानः ।

२. ६९ वीरेश्वराय वीरभद्राय । वीराणां शूराणामीश्वरो वीरेश्वरस्तस्मै वीरभद्राय तत्संज्ञकगणेश्वररूपायेत्यर्थः । ७० वीरघ्ने । वीरान् हंतीति वीरहा । ७१ वीरभृद्विराजे वीरान्बिभ्रति ते वीरभृतस्तेषां विराट् सार्वभौम इत्यर्थः । ७२ वीरचूडामणये । वीराणां चूडामणिःशिरोरत्नभूतः'चूडामणिःशिरोरत्नम्' इत्यमरः । ७३ वेत्रे । वेत्ता सर्वज्ञ इत्यर्थः । ७४ तीव्रनादाय । तीव्रोऽतिशयितःनादो यस्य स तीव्रनादः । ७५ नदीधराय । नदीनां धरो नदीधरः सागररूपः ॥ ७७ ॥

३. ७६ आज्ञाधाराय । आज्ञा धारा अविच्छिन्ना यस्य स आज्ञाधारः । ७७ त्रिशूलिने । त्रिशूलमस्यास्तीति त्रिशूली । ७८ शिपिविष्टाय । शिपयो रश्मयस्तेषु प्रविष्टः । तदुक्तं विष्णुसहस्रनामभाष्ये 'शिपयो रश्मयो मताः । तत्र प्रवेशाद्विश्वेशः शिपिविष्ट इहोच्यते' इति । ७९ शिवालयाय । शिवायाः पार्वत्याः आलयः स्थानभूतः । ८० बालखिल्याय । बालखिल्यस्तत्संज्ञकर्ऋषिरूपः । ८१ महाचापाय महद्विदेहराजपूज्यं चापं धनुर्यस्य स महाचापः । ८२ तिग्मांशवे तिग्मास्तीक्ष्णाः अंशवः किरणाः यस्य स तिग्मांशुः सूर्यरूपः । ८३ निधये अव्ययाय । निधिः पद्मादिरूपस्तस्मै अत एवाव्ययाय नाशशून्यायेत्यर्थः ॥ ७८ ॥

४. ८४ अभिरामाय । अभि सर्वतः रमंते योगिनो यस्मिन्नत्यभिरामः । ८५ सुशरणाय । शोभनश्चासौ शरणो रक्षिता च सुशरणः सर्वभयनिवारक इत्यर्थः । ८६ सुब्रह्मण्यः । 'तपो वेदाश्च सत्यं च ज्ञानं च ब्रह्मसंज्ञितम्' तेभ्यःसुतरां हितः सुब्रह्मण्यः । ८७ सुधापतये । सुधायाः पतिः स्वामीत्यर्थः । ८८ मघवते कौशिकाय । मघवते शक्ररूपायात एव कौशिकस्तत्संज्ञः 'अहिल्यायैजारकौशिकब्राह्मणे' इति श्रुतेः । 'कौशिको गुग्गुलशक्रयोः' इति विश्वः । ८९

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ललाटाक्षो विश्वदेहः सारः संसारचक्रभृत्।
अमोघदंडी मध्यस्थो हिरण्यो ब्रह्मवर्चसी ॥ ८० ॥[1]

परमार्थः परमयः शंवरो व्याघ्रकोऽनलः।
रुचिर्वररुचिर्वंद्यो वाचस्पतिरहर्पतिः ॥ ८१ ॥[2]

रविर्विरोचनः स्कंधः शास्ता वैवस्वतो जनः।
युक्तिरुन्नतकीर्तिश्च शांतरागः पराजयः ॥ ८२ ॥[3]

गोमते। गौर्विश्वरूपास्ति यस्य स गोमान्। इयं कथा अस्मिन्नेव ईशानकल्पवृत्तांते उक्ता। ९० विश्रामाय। विगतं श्रामं जन्ममरणादिश्रमसमूहो यस्मात्स विश्रामः तस्य समूह इत्यण्। ९१ सर्वशासनाय। सर्वस्मिन् शासनं यस्य च सर्वशासनः ॥ ७९ ॥

१. ९२ ललाटाक्षाय। ललाटे अक्षि नेत्रं यस्य स ललाटाक्षः। ९३ विश्वदेहाय। विश्वं जगद्देहो यस्य स विश्वदेहः। ९४ साराय। सारः प्रलयेपि विद्यमानत्वान्मुख्यस्थिरांशरूपः। ९५ संसारचक्रभृते संसारचक्रमखिलप्रपंचगणं बिभर्ति पुष्णातीति संसारचक्रभृत् 'चक्रो गणे चक्रवाके' इति विश्वः। ९६ अमोघदंडिने। अमोघदंडोऽस्ति यस्य सोऽमोघदंडी। ९७ मध्यस्थाय मध्ये न्याये तिष्ठतीति मध्यस्थः सर्वसमत्वादुदासीन इत्यर्थः 'मध्यं न्यायेऽवकाशे च' इति विश्वः। ९८ हिरण्याय। हिरण्यः स्वर्णरूपः 'हिरण्यं तेजसि स्वर्णे' इति विश्वः। ९९ ब्रह्मवर्चसिने। ब्रह्मवर्चस्तपोदीप्तिर्यस्यास्तीति ब्रह्मवर्चसी ॥ ८० ॥

२. ४०० परमार्थाय परमो मोक्षरूपः अर्थो यस्मात्स परमार्थः। इति चतुर्थशतकं समाप्तम्। १ परमयसे। परं दुःखातीतं च तन्मयः सुखं परमयः आत्यंतिकसुखरूप इत्यर्थः। २ शंवराय। शं कल्याणं वरं यस्मात्स बवयोरभेदाच्छंवरो वा जलरूपः 'शंवरं जलम्' इत्यमरः। ३ व्याघ्रकाय। व्याघ्रस्य तत्संज्ञकदैत्यस्य कः शमनो नाशक इत्यर्थः। 'को ब्रह्मात्मानिलार्केषु शमने सर्वनाम्नि च' इति विश्वः ४ अनलाय अनलोग्निरूपः। ५ रुचये। रुचिर्दीप्तिरूपः। ६ वररुचये। वरा श्रेष्ठा रुचिर्दीप्तिर्यस्य वा यस्मात्स वररुचिः। ७ वंद्याय। वंद्यः सर्वेषां स्तवार्ह इत्यर्थः। ८ वाचस्पतये वाचो विद्यायाः पतिर्वाचस्पतिः। 'ईशानः सर्वविद्यानाम्' इति श्रुतेः। ९ अहर्पतये। अहो दिवसस्य पतिः अहर्पतिः अहरादीनामिति रेफः ॥ ८१ ॥

३. १० रवये विरोचनाय रवये सूर्यरूपायात एव विशेषेण रोचयति ब्रह्मांडं दीपयतीति विरोचनः। ११ स्कंधाय। स्कंधःसमूहरूपः 'स्कंधो बाहुमूलसमूहयोः' इति विश्वः। १२ शास्त्रे वैवस्वताय शास्तीति शास्ता तस्मै वैवस्वताय यमरूपायेत्यर्थः 'यमः संयमतामहम्' इति भगवद्गीतोक्तेः। १३ अजानाय। नास्ति जनः प्रादुर्भावो यस्य सोऽजनः 'जनी प्रादुर्भावे' अस्माड्डः। १४ युक्तये। युक्तिर्योजनं समाधिरूपः 'युक्तिर्न्याये च योजने' इति विश्वः। १५ उन्नत कीर्तये। उन्नता अत्युच्चा कीर्तिर्यस्मात्स उन्नतकीर्तिः १६। शांतरागाय। शांतानां त्यक्तेषणानां रागः प्रीतिर्यस्य वा यस्मिन्स शांतरागः। १७ पराजयाय। पराजयति सर्वानभिभवतीति पराजयः ॥ ८२ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कैलासपतिकामारिः सविता रविलोचनः ।
विद्वत्तमो वीतभयो विश्वहर्ता निवारितः ॥ ८३ ॥[1]

नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ।
दूरश्रवा विश्वसहो ध्येयो दुःस्वप्ननाशनः ॥ ८४ ॥[2]

उत्तारको दुष्कृतिहा दुर्धर्षो दुःसहोऽभयः ।
अनादिर्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः ॥ ८५ ॥[3]

विश्वगोप्ता विश्वभर्ता सुधीरो रुचिरांगदः ।
जननो जनजन्मादिः प्रीतिमान्नीतिमान्नयः ॥ ८६ ॥[4]

---

१. १८ कैलासपतिकामारये । कैलासस्य तत्संज्ञकपर्वतस्य पतिश्चासौ कामारिश्च मदननाशक इत्यर्थः। १९ सवित्रे । सूतेसौ सविता जगत्प्रसूतिरित्यर्थः। २० रविलोचनाय । रविः सूर्यः लोचनं यस्य स रविलोचनः। २१ विद्वत्तमाय । ताम्यतीति तमः विदुषां तमः कांक्षक इत्यर्थः। २२ वीतभयाय । वीतं व्याप्तं भयं यस्य स वीतभयः वी गति व्याप्तीत्यादिधात्वर्थनिर्देशात् । २३ विश्वहर्त्रे अनिवारिताय। विश्वं हरति संहरतीति विश्वहर्ता तस्मै अनिवारितः केनाप्यवारित इत्यर्थः॥ ८३ ॥

२. २४ नित्याय। नित्योऽव्यय इत्यर्थः। २५ नियतकल्याणाय। नियतमखंडितं कल्याणं यस्मात्स नियतकल्याणः। २६ पुण्यश्रवणकीर्तनाय। पुण्ये श्रवण कीर्तने यस्य स पुण्यश्रवणकीर्तनः। २७ दूरश्रवसे। दूरे दूरदेशेपि श्रवः श्रवणं यस्मात्स दूरश्रवाः २८ विश्वसहायः। विश्वं सहति आमर्षतीति विश्वसहः। २९ ध्येयाय। ध्यातुं चिंतितुं योग्यो ध्येयः। ३० दुःस्वप्ननाशनाय। दुःस्वप्नानि नाशयति स्मृतिमात्रेण निष्फलानि करोतीति दुःस्वप्ननाशनः॥ ८४ ॥

३. ३१ उत्तारकाय। उत्तारयति स्वभक्तान् भयसमुद्रपारं नयतीत्युत्तारकः। ३२ दुष्कृतिघ्ने। दुष्कृतीन् पातकिजनान् हंतीति दुष्कृतिहा। ३३ दुर्धर्षाय। दुःखेनापि धर्षितुमशक्यो दुर्धर्षः। ३४ दुःसहाय। दुःखेनापि असुरादिभिरसहो दुःसहः। ३५ अभयाय। नास्ति भयं यस्मात्सोऽभयः। ३६ अनादये नास्ति आदिर्यस्य सोनादिः ३७ भुवे भूः पृथिवीरूपः। ३८ भुवो लक्ष्म्यै। भुवः पृथिव्याः लक्ष्मीः शोभारुपः। ३९ किरीटित्रिदशाधिपाय। किरीटोस्यास्तीति किरीटी स चासौ त्रिदशाधिपश्च किरीटित्रिदशाधिपः मुख्यदेवस्वामीत्यर्थः॥ ८५ ॥

४. ४० विश्वगोप्त्रे। विश्वस्य जगतो गोप्ता रक्षक इत्यर्थः। ४१ विश्वभर्त्रे विश्वस्य जगतो भर्ता पोषकः। ४२ सुधीराय। सुतरां धीरो निर्भयः सुधीरः। ४३ रुचिरांगदाय रुचिराणि रमणीयान्यंगदानि बाहुभूषणानि यस्य स रुचिरांगदः। ४४ जननाय। जनयति जगत्प्रादुर्भावं करोतीति जननः नंद्यादित्वाल्ल्युः। ४५ जनजन्मादये। जनानां जन्मादि सर्गादि यस्मात्स जनजन्मादिः 'यतो वा इमानि भूतानि जायंते' इति श्रुतेः। ४६ प्रीतिमते। प्रीतिमान्नित्यनीतियुक्तः। ४७ नीतिमते। नीतिमान्नित्यनीतियुक्तः। ४८ नयाय। नयो

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विशिष्टः काश्यपो भानुर्भीमो भीमपराक्रमः ।
प्रणवः सप्तधाचारो महाकायो महाधनुः ॥ ८७ ॥[1]

जन्माधिपो महादेवः सकलागमपारगः ।
तत्त्वातत्त्वविवेकात्मा विभूष्णुर्भूतिभूषणः ॥ ८८ ॥[2]

ऋषिर्ब्राह्मणविज्जिष्णुर्जन्ममृत्युजरातिगः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञांतोऽमोघविक्रमः ॥ ८९ ॥[3]

महेंद्रो दुर्भरः सेनी यज्ञांगो यज्ञवाहनः ।
पंचब्रह्मसमुत्पत्तिर्विश्वेशो विमलोदयः ॥ ९० ॥[4]

न्यायरूपः 'नयो नीतौ द्यूतभेदे न्याये पितरि च स्मृतः' इति विश्वः ॥ ८६ ॥

१. ४९ विशिष्टाय विशेषेण शिष्टः प्रलयकालेपि विद्यमान इत्यर्थः । ५० 'काश्यपाय । कश्यपस्य तत्संज्ञकऋषेरपत्यं पुमान् काश्यपः । ५१ भानवे । भातीति भानुः सूर्यरूपः । ५२ भीमाय । विभेत्यस्मादिति भीमः । ५३ भीमपराक्रमाय । भीमो भयंकरः पराक्रमो यस्मात्स भीमपराक्रमः । ५४ प्रणवाय । प्रणामयतीति प्रणवः ओंकाररूपः । तदुक्तं शिवाथर्वशिरसि 'अथ कस्मादुच्यते प्रणवो यस्मादुच्चार्यमाण एवर्चो यजूंषि सामान्यथर्वगिरश्च यज्ञे ब्रह्म ब्राह्मणेभ्यः प्रणामयति तस्मादुच्यते प्रणवः' इति । ५५ सप्तधाचाराय । सप्तधा आवहादिसप्तवायुप्रकारेण चारः गमनं यस्मिन् स सप्तधाचारः । ५६ महाकायाय महाधनुषे । महानपरिमितः कायः शरीरं यस्य स महाकायोत एव महदपरिमितं धनुर्यस्य स महाधनुः ॥ ८७ ॥

२. ५७ जन्माधिपाय । जन्मनः उत्पत्तेरधिपो जन्माधिपः ५८ महादेवाय । महांतः पूज्याः देवा यस्मात्स महादेवः । ५९ सकलागमपारगाय सकलागमानां सर्ववेदानां पारगोन्तवेत्ता सकलागमपारगः । ६० तत्त्वातत्त्वविवेकात्मने । तत्त्वातत्त्वविवेकज्ञानविचारः आत्मा स्वरूपं यस्य स तत्त्वातत्त्वविवेकात्मा । ६१ विभूष्णवे । विशेषेण भवति सर्वत्र विद्यमानस्तच्छीलो विभूष्णुः चाद्भुव इति ताच्छील्ये स्नुः । ६२ भूतिभूषणाय भूतिरणिमाद्यैश्वर्यं भूषणं यस्य स भूतिभूषणः 'विभूतिर्भूति रैश्वर्यमणिमादिकमष्टधा' इत्यमरः ॥ ८८ ॥

३. ६३ ऋषये ऋषिरतींद्रियदर्शकः 'रुद्रो महर्षिः' इति श्रुतेः । ६४ ब्राह्मणविज्जिष्णवे ब्राह्मणानां वित् ज्ञानं जिष्णुर्जयशीलं यस्माद्वा यस्य स ब्राह्मणविज्जिष्णुः । ६५ जन्ममृत्युजरातिगाय । जन्ममृत्युजराः अतिगच्छतीति जन्ममृत्युजरातिगः । ६६ यज्ञाय यज्ञपतये । यज्ञोग्निष्टोमादिरूपस्तस्मै यज्ञपतये यज्ञस्वामिन इत्यर्थः । ६७ यज्वने । यजतीति यज्वा सकलयजमानरूपः । ६८ यज्ञांताय । यज्ञानामतः समाप्तिर्यस्मात्स यज्ञांतः । ६९ अमोघविक्रमाय । अमोघो निष्फलः विक्रमो यस्य सोऽमोघविक्रमः ॥ ८९ ॥

४. ७० महेंद्राय । महांश्चासौ इंद्रः परमेश्वरश्च महेंद्रः । ७१ दुर्भराय दुःखेनापि भर्तुं चित्ते धारयितुमशक्यो दुर्भरः ७२ सेनिने । सेना प्रमथादिसैन्यं यस्यास्तीति सेनी व्रीह्यादित्वादिनिः । ७३ यज्ञांगाय यज्ञवाहनाय यज्ञः अंगानि यस्य स यज्ञांगस्तस्मै यज्ञः वाहनं प्रापको यस्य स

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आत्मयोनिरनाद्यंतो षड्विंशत्सप्तलोकधृक् ।
गायत्रीवल्लभः प्रांशुर्विश्वावासः प्रभाकरः ॥ ९१ ॥[1]

शिशुर्गिरिरतः सम्राट्सुषेणः सुरशत्रुहा ।
अमोघोरिष्टमथनो मुकुंदो विगतज्वरः ॥ ९२ ॥[2]

स्वयंज्योतिरनुज्योतिरात्मज्योतिरचंचलः ।
पिंगलः कपिलश्मश्रुः शास्त्रनेत्रस्त्रयीतनुः ॥ ९३ ॥[3]

यज्ञवाहनः। ७४ पंचब्रह्मसमुत्पत्तये। पंचब्रह्मणां सद्योजातादीनां समुत्पत्तिर्यस्मात्स पंचब्रह्मसमुत्पत्तिः ७५ विश्वेशाय विश्वस्येशो नियंतेत्यर्थः ७६ विमलोदयाय। विमलो निष्कलंकः उदयो यस्मात्स विमलोदयः॥ ९० ॥

१. ७७ आत्मयोनये। आत्मैव योनिः कारणं यस्य स आत्मयोनिः निष्कारण इत्यर्थः। ७८ अनाद्यंताय। न स्त आद्यंतौ यस्य सः अनाद्यंतः। ७९ षड्विंशत्सप्तलोकधृषे। षड्विंशत्सांख्यतत्त्वानि सप्तलोकांश्च धृष्णोतीति षड्विंशत्सप्तलोकधृक्। ८० गायत्रीवल्लभाय। गायत्र्याः वल्लभः प्रिय इत्यर्थः। ८१ प्रांशवे। प्रकृष्टाः अंशवः सुषुम्नादयः किरणाः यस्य स प्रांशुः। ८२ विश्वावासाय। विश्वमावसति अभिव्याप्य तिष्ठतीति विश्वावासः। ८३ प्रभाकराय प्रभां प्रकृष्टदीप्तिं करोति तच्छीलः प्रभाकरः॥ ९१ ॥

२. ८४ शिशवे। शिशुर्बालरूपः इयं कथा पार्वतीस्वयंवरे अस्मिन्नेवाग्रे उक्ता। ८५ गिरिरसाय। गिरिषु मंदरादिषु रसः प्रीतियुक्त इत्यर्थः। ८६ सम्राट्सुषेणाय सम्राजः सुषेणाः शोभनसेनायुक्ताः यस्मात्स सम्राट्सुषेणः सुषमादिषु चेति षत्वम् ८७ सुरशत्रुघ्ने। सुरशत्रून्पूर्वदेवादीन् हंतीति सुरशत्रुहा। ८८ अमोघाय। न मोघो व्यर्थसंकल्पो यस्य सोऽमोघः सत्यसंकल्प इत्यर्थः। ८९ अरिष्टमथनाय। अरिष्टानि स्वभक्तसंकटानि मंथति विलोडयतीत्यरिष्टमथनः। ९० मुकुंदाय। मुकुंदो मुक्तिदः पृषोदरादित्वात्साधुरिति विष्णुसहस्रनामभाष्ये उक्तम्। ९१ विगतज्वराय। विगतः प्रनष्टः ज्वरः संसारतापो यस्मात्स विगतज्वरः॥ ९२ ॥

३. ९२ स्वयंज्योतिषे। स्वयमात्मनैव ज्योतिः प्रकाशक इत्यर्थः। ९३ अनुज्योतिषे। अनु अनुलक्ष्येण ज्योतींषि नक्षत्रादीनि यस्य सोऽनुज्योतिः। ९४ आत्मज्योतिषे। आत्मा देहः ज्योतिश्चैतन्यरूपी यस्य स आत्मज्योतिः। ९५ अचंचलाय। न चंचलोऽचंचलः कूटस्थ इत्यर्थः। ९६ पिंगलाय। पिंगलः कडारः कपिलः कडारवर्णः 'कडारःकपिलः पिंगपिशंगौ कद्रुपिंगलौ' इत्यमरः। 'सितपीतहरिद्रक्तः कडारस्तृणवह्निवत्' इति शब्दार्णवः। ९७ कपिलश्मश्रुणे। कपिलानि तद्वर्णानि श्मश्रूणि मुखकेशाः यस्य स कपिलश्मश्रुः। ९८ शास्त्रनेत्रत्रयीतनवे। त्रयी वेदत्रयी तनुः शरीरं यस्य स त्रयीतनुः शास्त्रे न्यायव्याकरणे नेत्रे लोचनभूते यस्य स शास्त्रनेत्रश्चासौ त्रयीतनुश्च शास्त्रनेत्रत्रयीतनुः। तदुक्तं 'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इति। वस्तुतः शास्त्रे पूर्वोत्तरमीमांसारूपे इत्यर्थः॥ ९३ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ज्ञानस्कंधो महाज्ञानी निरुत्पत्तिरुपप्लवः ।
भगो विवस्वानादित्यो योगाचार्यो बृहस्पतिः ॥ ९४ ॥[1]

उदारकीर्तिरुद्योगी सद्योगी सदसन्मयः ।
नक्षत्रमाली राकेशः साधिष्ठानः षडाश्रयः ॥ ९५ ॥[2]

पवित्रपाणिः पापारिर्मणिपूरो मनोगतिः ।
हृत्पुंडरीकमासीनः शुक्लः शांतो वृषाकपिः ॥ ९६ ॥[3]
विष्णुर्ग्रहपतिः कृष्णः समर्थोऽनर्थनाशनः ।
अधर्मशत्रुरक्षय्यः पुरुहूतः पुरुष्टुतः ॥ ९७ ॥[4]

---

१. ९९ ज्ञानस्कंधाय । ज्ञानस्य स्कंधः समूहरूपो ज्ञानस्कंधः । ५०० महाज्ञानिने । महदपरिच्छिन्नं ज्ञानं यस्यास्तीतिमहाज्ञानी ॥ इति पंचमं शतकं समाप्तम् ॥ १ निरुत्पत्तये निर्गता उत्पत्तिर्यस्य स निरुत्पत्तिः उत्पत्तिशून्य इत्यर्थः । २ उपप्लवाय । उपप्लवो राहुरूपः 'उपप्लवः सैंहिकेयः' इति विश्वः । ३ भगाय । भगः षड्गुणैश्वर्यरूपः । ४ विवस्वते आदित्याय । विवसो रश्मयः संति यस्य स विवस्वान् तस्मै आदित्याय अदितिपुत्ररूपायेत्यर्थः । ५ योगाचार्याय । योगानां युक्तीनामाचार्यो गुरुः योगाचार्यः शुक्ररूपः 'योगः पूर्वार्थसंप्राप्तौ संगतिज्ञानयुक्तिषु' इति विश्वः । ६ बृहस्पतये । बृहस्पतिः सुराचार्यरूपः ॥ ९४ ॥

२. ७ उदारकीर्तये । उदारा श्रोतृणां सर्वार्थदा कीर्तिर्यस्य स उदारकीर्तिः । ८ उद्योगिने । उत्सर्वोत्कृष्टःयोगो यस्यास्तीति उद्योगी । ९ सद्योगिने । सद्ब्रह्म योजयति तच्छीलः सद्योगी संपृचेति घिनुण् । १० सदसन्मयाय । सद्ब्रह्म असन्मायिकं जगदुभयावयवः सदसन्मयः । ११ नक्षत्रमालिने राकेशाय । नक्षत्रैर्मालते शोभते तच्छीलो नक्षत्रमाली तस्मै राकेशाय चंद्ररूपायेत्यर्थः । १२ साधिष्ठानाय । अधिष्ठानेन प्रकृत्या सहितः साधिष्ठानः । १३ षडाश्रयाय षण्णां कामादीनामाश्रयः षडाश्रयः ॥ ९५ ॥

३. १४ पवित्रपाणये । पवित्राः पाणयो यस्य स पवित्रपाणिः १५ पापारये । पापानामरिर्नाशक इत्यर्थः । १६ मणिपूराय । मणीनां पूरः प्रवाहो यस्मात्स मणिपुरः । १७ मनोगतये । मनस एव गतिर्गमनं यस्मिन्स मनोगतिरन्यैंद्रियाग्राह्य इत्यर्थः । १८ हृत्पुंडरीकमासीनाय । हृत्पुंडरीकं स्वभक्तहृत्कमलमासीनः स्थित इत्यर्थः । १९ शुक्लाय । शुक्लः श्वेतवर्णः । २० शांताय वृषाकपये । शांत उपशमयुक्तस्तस्मै अत एव वर्षति कामान्सेचतीति वृषो धर्मस्तं न कंपयति न चालयतीति वृषाकपिः 'कपि किंचिच्चलने' अस्मादहिकंप्योर्नलोपश्चेत्यौणादिक इः ॥ ९६ ॥

४. २१ विष्णवे । वेवेष्टि जगद्व्याप्नोतीति विष्णुः । २२ ग्रहपतये । ग्रहाणां सोमादिग्रहाणां पतिः स्वामीत्यर्थः । २३ कृष्णाय । कृषति पापं विलिखतीति कृष्णस्तत्संज्ञकावताररूपः । २४ समर्थाय । सम्यक् संपूर्णः अर्थो यस्य वा यस्मात्स समर्थः । २५ अर्थनाशनाय । अर्थो याच्ञा नश्यत्यनेनेत्यर्थनाशनः । २६ अधर्मशत्रवे । अधर्मस्य शत्रुर्नाशकः इत्यर्थः । २७ अक्षय्याय न क्षय्योऽक्षय्यः क्षयाशक्य इत्यर्थः । २८ पुरुहूताय पुरुष्टुताय । पुरु प्रचुरं हुतं यज्ञेष्वाह्वानं यस्य स पुरुहूतस्तस्मै पुरु बहुलं स्तुतं वेदेषु स्तवनं यस्य स पुरुष्टुतः इंद्ररूप इत्यर्थः ॥ ९७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ब्रह्मगर्भो बृहद्‌गर्भो धर्मधेनुर्धनागमः ।
जगद्धितैषिसुगतः कुमारः कुशलागमः ॥ ९८ ॥[१]

हिरण्यवर्णो ज्योतिष्मान्नानाभूतधरो ध्वनिः ।
अरोगो नियमाध्यक्षो विश्वामित्रो द्विजोत्तमः ॥ ९९ ॥[२]

बृहज्ज्योतिः सुधामा च महाज्योतिरनुत्तमः ।
मातामहो मातरिश्वा नभस्वान्नागहारधृक् ॥ १०० ॥[३]

पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः ।
निरावरणधर्मज्ञो विरिंचो विष्टरश्रवाः ॥ १०१ ॥[४]

---

१. २९ ब्रह्मगर्भाय । ब्रह्मा गर्भो यस्य स ब्रह्मगर्भः । ३० बृहद्गर्भाय । बृहद्ब्रह्मांडरूपः गर्भो यस्य स बृहद्गर्भः । ३१ धर्मधेनवे । धर्मः धेनुः नवप्रसूतगोसदृशो यस्मात्स धर्मधेनुः 'धेनुः स्यान्नवसूतिका' इत्यमरः । ३२ धनागमाय धनस्य आगमस्तृप्तिपर्यंतं प्राप्तिर्यस्मात्स धनागमः । तदुक्तं 'धनं चातृप्तिपर्यतं शिवपूजाविधेः फलम्' इति । ३३ जगद्धितैषिसुगताय । जगद्धितमिच्छन्ति ते जगद्धितैषिणस्तेषां सुष्ठुसुखेन गतं गमनं यस्मिन् स जगद्धितैषिसुगतः । ३४ कुमाराय । कुमारयति जगद्रूपेण क्रीडत इति कुमारः । ३५ कुशलागमाय । कुशलस्य कल्याणस्यागमः प्राप्तिर्यस्मात्स कुशलागमः ॥ ९८ ॥

२. ३६ हिरण्यवर्णाय । हिरण्यवत् सुवर्णवद्वर्णो यस्य स हिरण्यवर्णः । ३७ ज्योतिष्मते ज्योतिष्मान्नित्यकांतियुक्त इत्यर्थः । ३८ नानाभूतधराय । नानाभूतानामनंतजीवानां धरो धारक इत्यर्थः । ३९ ध्वनये । ध्वनिरनाहतध्वनिरूपः । ४० अरोगाय । नास्ति रोगो यस्मात्सोऽरोगः । ४१ नियमाध्यक्षाय । नियमानामध्यक्षः प्रभुरित्यर्थः । ४२ विश्वामित्राय द्विजोत्तमाय । विश्वामित्रस्तत्संज्ञस्तस्मै द्विजोत्तमाय ब्राह्मणश्रेष्ठायेत्यर्थः । । ९९ ॥

३. ४३ बृहज्ज्योतिषे बृहत्सूर्यरूपं ज्योतिर्यस्मात्स बृहज्ज्योतिः । ४४ सुधाम्ने सुष्ठु धाम तेजो यस्य स सुधामा । ४५ महाज्योतिषे । महदपरिच्छिन्नं ज्योतिस्तेजोरूपः । ४६ अनुत्तमाय । नास्ति उत्तमो यस्मात्सोऽनुत्तमः । ४७ मातामहाय । मातुः जगज्जनन्याः मायायाः पिता जनको मातामहः । ४८ मातरिश्वने । मातरि अंतरिक्षे श्वयति वर्धते इति मातरिश्वा वायुरूपः 'मातरीति सप्तमीप्रतिरूपकमव्यय' ममरव्याख्यायामुक्तम् । ४९ नभस्वते । नभोंतरिक्षमपि यस्मिन्नस्तीति नभस्वान् । ५० नागहारधृषे । नागहारं धृष्णोति प्रगल्भं करोतीति नागहारधृक् नागहारस्य निर्भयधारक इत्यर्थः ॥ १०० ॥

४. ५१ पुलस्त्याय । पुलस्त्यस्तत्संज्ञकऋषिरूपः । ५२ पुलहाय । पुलहस्तदृषिरूपः । ५३ अगस्त्याय । अगस्त्योगस्त्यमुनिरूपः । ५४ जातूकर्ण्याय । जातूकर्ण्यस्तत्संज्ञकमुनिरूपः । ५५ पराशराय । पराशरस्तत्संज्ञकऋषिरूपः । ५६ निरावरणधर्मज्ञाय । निर्गतमावरणं यस्मात्तादृशधर्मं मोक्षधर्मं जानातीति निरावरणधर्मज्ञः । ५७ विरिंचाय । विशेषेण रचयतीति विरिंचो ब्रह्मरूपः पृषोदरादित्वात्साधुरित्यमरव्याख्यायामुक्तम् । ५८ विष्टरश्रवसे । विष्टरे अश्वत्थवृक्षे श्रूयत इति विष्टरश्रवाः "वृक्षः कारस्करो गच्छः पलाशी विष्टरः स्थिरः" इति

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आत्मभूरनिरुद्धोत्रिज्ञानमूर्तिर्महायशाः ॥
लोकचूडामणिर्वीरः चंडसत्यपराक्रमः ॥ १०२ ॥[1]

व्यालकल्पो महाकल्पो महावृक्षः कलाधरः ।
अलंकरिष्णुस्त्वचलो रोचिष्णुर्विक्रमोत्तमः ॥ १०३ ॥[2]

आशुशब्दपतिर्वेगी प्लवनः शिखिसारथिः ।
असंसृष्टोऽतिथिः शक्रः प्रमाथी पापनाशनः ॥ १०४ ॥[3]

त्रिकांडशेषः। श्नुधातोरौणादिक असुन् विष्णुरूप इत्यर्थः ॥ १०१ ॥

१. ५९ आत्मभुवे । आत्मनि मनस्येव भवतीत्यात्मभूः प्रद्युम्नरूपः 'शंवरारिर्मनसिजः' इत्यमरः। ६० अनिरुद्धाय । न निरुद्धोऽनिरुद्धः वाणासुरान्मोचितः। इयं कथा भागवते विस्तृता । ६१ अत्रिज्ञानमूर्तये । अत्रिश्चासौ ज्ञानमूर्तिश्चात्रिज्ञानमूर्तिः। ६२ महायशसे । महत्सर्वपूज्यं यशो यस्य स महायशाः। ६३ लोकचूडामणये । लोकेषु चूडामणिः शिरोरत्नरूपः। ६४ वीराय वीरोऽपराजित इत्यर्थः। ६५ चंडसत्यपराक्रमाय । चंडस्तत्संज्ञकगणः सत्यपराक्रमो यस्मात्स चंडसत्यपराक्रमः ॥ १०२ ॥

२. ६६ व्यालकल्पाय व्यालानां सर्पाणां कल्पः प्रथमो वासुकिरूपः 'सर्पाणामस्मि वासुकिः' इति भगवद्गीतोक्तेः। ६७ महाकल्पाय । महान्पूज्यः कल्पो न्यायो यस्मात्स महाकल्पः। ६८ महावृक्षाय महान् वृक्षः संसारपिप्पलो यस्मात्स महावृक्षः। तदुक्तं भगवद्गीतायाम् "ऊर्ध्व-मूलमधः शाखमश्वत्थं प्राहुरव्ययम्" इति। ६९ कलाधराय। कलायाश्चंद्रकलायाः धरः कलाधरः। ७० अलंकरिष्णवे । अलं पर्याप्तं सर्वं स्वभक्तेभ्यः करोति तच्छीलोऽलंकरिष्णुः अलंकृञेतीष्णुच् । ७१ अचलाय । न चलोऽचलः हिमालयरूपः 'स्थावराणां हिमालयः' इति भगवद्गीतोक्तेः। ७२ रोचिष्णवे। रुचं दीप्तिं साधु करोतीति रोचिष्णुः आक्वेस्तच्छीलतद्धर्मतत्साधुकारिष्वित्युक्तत्वात् । ७३ विक्रमोत्तमाय। विक्रमः उत्तमः सर्वश्रेष्ठो यस्य स विक्रमोत्तमः ॥ ३ ॥

३. ७४ आशुशब्दपतये। आशु सत्वरं शब्दपतयः शब्दस्वामिनो यस्मात्स आशुशब्दपतिः "आशुब्रीहौ च सत्वरे" इति विश्वः। ७५ वेगिने । वेगः स्वभक्तकार्यकरणत्वरास्ति यस्य स वेगी। ७६ प्लवनाय। प्लवंते संसारसागरं तरंत्यनेनेति प्लवनः। ७७ शिखिसारथये। शिखिनः वह्नेः सारथिः सहायः शिखिसारथिः। वायुरूप इत्यर्थः। ७८ असंसृष्टाय। न संसृष्टोऽसंसृष्टः मायासंयुक्त इत्यर्थः। ७९ अतिथये। नास्ति तिथिः यस्य सोतिथिस्तत्स्वरूपः। तंदुक्तं मार्कण्डेये "अज्ञातकुलनामानं तत्काले समुपस्थितम्। शोभनाशोभनाकारं तं मन्येत प्रजापतिम्" इति। अस्मिंस्त्वेकोनत्रिंशे 'देयं सर्वं शिवायार्ये शिव एवातिथिः स्वयम्' इति। ८० शक्राय प्रमाथिने। शक्नोतीति शक्रस्तस्मै प्रमथनशीलोऽसुरसैन्यविलोडनशीलः प्रमाथी इंद्ररूपः इत्यर्थः ८१ पापनाशनाय। पापं नश्यत्यनेनेति पापनाशनः ॥ १०४ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः ।
जर्यो जराधिशमनो लोहितश्च तनूनपात् ॥ १०५ ॥[1]

पृषदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा ।
निदाघस्तपनो मेघः पक्षः परपुरंजयः ॥ १०६ ॥[2]

मुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ।
वसंतो माधवो ग्रीष्मो नभस्यो बीजवाहनः ॥ १०७ ॥[3]

---

१. ८२ वसुश्रवसे । वसु मधुरं श्रवः श्रवणं यस्य स वसुश्रवाः 'वसु स्मृतं स्यान्मधुरेन्यवच्च 'इति विश्वः । ८३ कव्यवाहाय । कव्यं श्राद्धीयं हविर्वहति प्रापयतीति कव्यवाहस्तत्संज्ञकः वह्निरूपः ८४ प्रतप्ताय । प्रकृष्टं तप्तं तपो यस्य स प्रतप्तः ८५ विश्वभोजनाय । विश्वं भोजनं यस्य स विश्वभोजनः । ८६ जर्याय । जरितुं योग्यो जर्यः । अन्नरूप इत्यर्थः । ८७ जराधिशमनाय । जरा वार्धक्यमाधिर्मानसी पीडा ते शमयति नाशयतीति जराधिशमनः । ८८ लोहिताय । लोहितो रक्तवर्ण इत्यर्थः । ८९ ननूनपाते । तनूं स्वशरीरमपि न पाति स्वभक्तेभ्यः प्रयच्छतीति तनूनपात् 'न भ्राण्नपान्नवेद' इति निपातनान्नञः प्रकृतिभावः ॥ १०५ ॥

२. ९० पृषदश्वाय । पृषतां मधुकणानाम् अश्वः इवाश्वसदृशः वाहकः पृषदश्वः वायुरूप इत्यर्थः । ९१ नभसे । नहति जगद्बध्नातीति नभोंतरिक्षरूपः'णह बंधने' अस्मान्नहोर्दिवि भश्चेत्यमुन् । ९२ योनये । योनिर्जगदाकररूपः 'योनिः स्यादाकरे भगे' इति विश्वः । ९३ सुप्रतीकाय । सुष्ठु प्रतीकाः अवयवाः यस्य स सुप्रतीकः 'प्रतीकोऽवयवे प्रोक्तः' इति विश्वः । ९४ तमिस्रघ्ने । तमिस्रमज्ञानं हंतीति तमिस्रहाः । ९५ निदाघाय तपनाय । नितरां दह्यतेऽत्रेति निदाघस्तस्मै तपनो ग्रीष्मर्तुरूप इत्यर्थः अत्र न्यंक्वादित्वात्कुत्वम् । ९६ मेघाय पक्षाय । मेहते सेचतीति मेघस्तस्मै पक्षाय पर्वतपक्षभवायेत्यर्थः । तदुक्तमस्मिन् चतुःपंचाशते 'काष्ठा वाहाश्च वैरिंच्याः पक्षाश्चैव पृथग्विधाः' इत्यादिना । ९७ परपुरंजयाय । परपुराणि स्वभक्तशत्रुपुराणि जयतीति परपुरंजयः अत्र संज्ञायां भृतृवृजीति खच् ॥ १०६ ॥

३. ९८ मुखानिलाय । मुखे अनिलो वायुर्यस्मात्स मुखानिलः यत्सत्तया सर्वमुखेषु प्राणवायुसंचार इत्यर्थः । ९९ सुनिष्पन्नाय सु शोभनं निष्पन्नं यस्मात्स सुनिष्पन्नः सर्वशोभनजनक इत्यर्थः । ६०० सुरभये सुष्ठु रभंते हृष्यंति यस्मिन्नसौ सुरभिः 'रभ राभस्ये' इन् औणादिकः ॥ इति षष्ठशतकं समाप्तम् ॥ १ शिशिरात्मकाय । शिशिरस्तत्संज्ञकऋतुरात्मा स्वरूपं यस्य स शिशिरात्मकः । २ वसंताय माधवाय । वसंतस्तत्संज्ञकऋतुरूपस्तस्मै मधु मकरंदोस्त्यस्मिन्निति माधवः । ३ ग्रीष्माय । ग्रसतीति ग्रीष्मः सर्वरसशोषकस्तत्संज्ञकऋतुरूपः । ४ नभस्याय नमः । नभसि श्रावणे भवतीति नभस्यो वर्षाऋतुरूपः । ५ बीजवाहनाय । बीजानि धान्यानि वहति प्रापयतीति बीजवाहनः शरद्धेमंतऋतुरूप इत्यर्थः ॥ १०७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अंगिरामुनिरात्रेयो विमलो विश्ववाहनः ।
पावनः पुरुजिच्छक्रस्त्रिविद्यो नरवाहनः ॥ १०८ ॥[1]

मनो बुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः ।
तेजोनिधिर्ज्ञाननिधिर्विपाको विघ्नकारकः ॥ १०९ ॥[2]

अधरोऽनुत्तरो ज्ञेयो ज्येष्ठो निःश्रेयसालयः ।
शैलो नगस्तनुर्दोहो दानवारिररिंदमः ॥ ११० ॥[3]

चारुधीर्जनकश्चारुर्विशल्यो लोकशल्यकृत् ।
चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः ॥ १११ ॥[4]

---

१. ६ अंगिरसे । अंगिरास्तसंज्ञकमुनिरूपः । ७ मुनये आत्रेयाय । मुनये मननशीलाय तस्मै आत्रेयाय अत्रिऋषिपुत्ररूपायेत्यर्थः । ८ विमलाय । विगतः मलो यस्मात्स विमलः शुद्ध इत्यर्थः । ९ विश्ववाहनाय । विश्वं जगद्वहति नैरंतर्येण प्राप्नोति यस्मिन्निति विश्ववाहनः । १० पावनाय । पावयतीति पावनः सकलपातकनाशकर इत्यर्थः । ११ पुरुजिते । पुरुन्बहूनपि जयतीति पुरुजित् । १२ शक्राय । शक्नोतीति शक्रः सर्वं कर्तुमकर्तुं समर्थ इत्यर्थः । १३ त्रिविद्याय । त्रिगुणा विद्याप्रकृतिर्यस्य स त्रिविद्यः १४ नरवाहनाय । नराः वाहनं यस्य स नरवाहनः कुबेररूपः ॥ १०८ ॥

२. १५ मनोबुद्धये । मनसा बुद्धिर्मनोबुद्धिः मनःसंयुक्तबुद्धिरूप इत्यर्थः १६ अहंकाराय । अहम् अहमिति प्रत्ययं करोतीति अहंकारः अहमिति विभक्तिप्रतिरूपकमव्ययमसर-व्याख्यायामुक्तम् । १७ क्षेत्रज्ञाय । क्षेत्रं लिंगशरीरं जानातीति क्षेत्रज्ञो जीवरूपः । १८ क्षेत्रपालकाय । क्षेत्राणि सिद्धस्थानानि पालयतीति क्षेत्रपालकः 'क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः" इति विश्वः । १९ तेजोनिधये । तेजांसि नितरां धीयंते यस्मिन्निति ते-जोनिधिः । २० ज्ञाननिधये । ज्ञानानां निधिः स्थानभूतः । २१ विपाकाय विशेषण पाको यस्मात्स विपाकः सकलकर्मफलप्रद इत्यर्थः । २२ विघ्नकारकाय । विघ्नान्यसुरसत्कर्मविघ्नानि करोतीति विघ्नकारकः गणेशरूपः ॥ १०९ ॥

३. २३ अधराय । नास्ति धरो यस्य सोऽधरः सर्वाधार इत्यर्थः । २४ अनुत्तराय । नास्ति उत्तरो यस्मात्सोनुत्तरः सर्वोपरिवर्तमानः । २५ ज्ञेयाय । ज्ञातुं सुकृतिभिर्वेत्तुं योग्यो ज्ञेयः । २६ ज्येष्ठाय । ज्येष्ठः सर्वेभ्यो वयोधिकः । २७ निःश्रेयसालयाय । नितरां श्रेयो निःश्रेयसं मोक्षस्तस्यालयः स्थानरूप इत्यर्थः । २८ शैलाय । शिलायां भवः शैलः नार्मदादिलिंगरूपः । २९ नगाय । नगः श्रीशैलादिपर्वतरूपः । तदुक्तं 'श्रीशैलशिखरं दृष्ट्वा पुनर्जन्म न विद्यते 'इति । ३० तनवे । तनुरत्यंतसूक्ष्मरूपो योगिनामप्यदृश्यः । ३१ दोहाय । दोग्धि सर्वं प्रपूरयतीति दोहः । ३२ दानवारये । दानवानां दनुजानामरिर्नाशकर इत्यर्थः । ३३ अरिंदमाय । अरीन् स्वभक्तशत्रून् दमयतीत्यरिंदमः संज्ञायामिति दमः खच् ॥ ११० ॥

४. ३४ चारुधिये जनकाय । चार्वी सूक्ष्मा धीर्बुद्धिर्यस्य स चारुधीस्तस्मै जनकाय विदेहनृपरूपायेत्यर्थः । ३५ चारुविशल्याय । चारवः सूक्ष्मधियो विशल्याः विगतदुःखा

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आम्नायोथ समाम्नायस्तीर्थदेवशिवालयः ।
बहुरूपो महारूपः सर्वरूपश्चराचरः ॥ ११२ ॥[१]

न्यायनिर्वाहको न्यायो न्यायगम्यो निरंजनः ।
सहस्रमूर्धा देवेन्द्रः सर्वशस्त्रप्रभंजनः ॥ ११३ ॥[२]

मुंडो विरूपो विकृतो दंडी दांतो गुणोत्तमः ।
पिंगलाक्षोथ हर्यक्षो नीलग्रीवो निरामयः ॥ ११४ ॥[३]

सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकभृत् ।
पद्मासनः परंज्योतिः परावरपरंफलः ॥ ११५ ॥[४]

यस्मात्स चारुविशल्यः । ३६ लोकशल्यकृते । लोकयंति ते लोकाः पृथक्दृष्टयस्तेषां शल्यं दुःखं करोतीति लोकशल्यकृत् । ३७ चतुर्वेदाय । चत्वार ऋगादयः वेदाः यस्मात्स चतुर्वेदः । तदुक्तं 'यस्य निःश्वसितं वेदाः' इति । ३८ चतुर्भावाय चत्वारो धर्मादयो यस्मात्स चतुर्भावः । ३९ चतुराय चतुरप्रियाय । चतुरः कुशलस्तस्मै अत एव चतुराः प्रियाः यस्य स चतुरप्रियः ॥ १११ ॥

१. ४० आम्नायः । आम्नायो वेदरूपः । ४१ समाम्नायः । समस्तुल्यः आम्नायो वेदो येन स समाम्नायः 'वेदस्यापि प्रमाणभूतः । यद्वा सर्वप्रमाणत्वेन सम्यगाम्नायो वेदो यस्मात्स समाम्नायः । ४२ तीर्थदेवशिवालयाय । तीर्थान्यवतारऋषिजुष्टाम्भांसि तेषु दीव्यंति मोदंति ते तीर्थदेवास्तेषां शिवस्य कल्याणस्यालयः स्थानभूतः । ४३ बहुरूपाय । बहून्यसंख्यानि रूपाणि यस्य स बहुरूपः । ४४ महारूपाय । महांति पूज्यानि रूपाणि यस्य स महारूपः । ४५ सर्वरूपाय । सर्वं विश्वं रूपं यस्य स सर्वरूपः । ४६ चराचराय । चरा अस्थिरा लक्ष्मीरचरा स्थिरा यस्मिन् स चराचरः ॥ ११२ ॥

२. ४७ न्यायनिर्वाहकाय । न्यायस्य सत्यस्य निर्वाहको न्यायनिर्वाहकः ॥ ४८ न्यायाय । न्यायो नीतिरूपः । ४९ न्यायगम्यः । न्यायेन नीत्या गम्यते ज्ञायत इति न्यायगम्यः । ५० निरंजनाय । निर्गतमंजनं मायातिमिरं यस्मात्स निरंजनः । ५१ सहस्रमूर्ध्ने । सहस्रसंख्या मूर्धानः शीर्षाणि यस्य स सहस्रमूर्धा । ५२ देवेंद्राय । देवानामिंद्रः परमेश्वर इत्यर्थः । ५३ सर्वशस्त्रप्रभंजनाय । सर्वशस्त्राणि प्रकर्षेण भंजयति नाशयतीति सर्वशस्त्रप्रभंजनः ॥ ११३ ॥

३. ५४ मुंडाय । मुंडो व्रतलुंचितकेशरूपः । ५५ विरूपाय । विशिष्टं सर्वश्रेष्ठं रूपं यस्य स विरूपः । ५६ विकृताय । विशिष्टं कृतं कर्म यस्य स विकृतः । ५७ दंडिने दंडः कालदंडोस्ति यस्य स दंडी । ५८ दांताय । दांतो जितेन्द्रिय इत्यर्थः । ५९ गुणोत्तमाय गुणा उत्तमा यस्मात्स गुणोत्तमः । ६० पिंगलाक्षाय । पिंगलानि पिंगवर्णान्यक्षीणि यस्य स पिंगलाक्षः । ६१ हर्यक्षाय । हरेर्विष्णोरक्षि नेत्रं समर्पितं यस्मिन्स हर्यक्षः । ६२ नीलग्रीवाय । नीला नीलवर्णा ग्रीवा यस्य स नीलग्रीवः । ६३ निरामयाय । निर्गता आमयाः सर्वरोगाः यस्मात्स निरामयः 'भिषक्तमं त्वां भिषजां शृणोमि' इति श्रुतेः ॥ ११४ ॥

४. ६४ सहस्रबाहवे सर्वेशाय । सहस्रसंख्याः बाहवो यस्य स सहस्रबाहुस्तस्मै सर्वेषां

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ।
परावरज्ञो बीजेशः सुमुखः सुमहास्वनः ॥ ११६ ॥[1]

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुरमहाश्रयः ॥ ११७ ॥[2]

देवादिदेवो देवर्षिदेवासुरवरप्रदः ।
देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः ॥ ११८ ॥[3]

सर्वदेवमयोचिंत्यो देवतात्मात्मसंभवः ।
ईड्योऽनीशः सुरव्याघ्रो देवसिंहो दिवाकरः ॥ ११९ ॥[4]

निखिलजीवानामीशो नियंतेत्यर्थः । ६५ शरण्याय । शरणेषु साधुः शरण्यः ६६ सर्वलोकभृते । सर्वलोकान् भूरादीन्बिभर्ति धारयतीति सर्वलोकभृत् । ६७ पद्मासनाय । पद्मं हृत्कमलमासनं यस्य स पद्मासनः । ६८ परंज्योतिषे । परं सर्वोत्कृष्टं ज्योतिः तेजो यस्य स परंज्योतिः । ६९ परावरपरंफलाय अवरम् ऐहिकं परं पारलौकिकं च परावरम् । अभ्यर्हितत्वात्परशब्दस्य पूर्वनिपातस्तस्मात्परं मोक्षाख्यं परं फलं यस्मात्स परावरपरंफलः ॥ ११५ ॥

१. ७० पद्मगर्भाय । पद्मं भुवनकोशाख्यं गर्भो वीर्यजं यस्य स पद्मगर्भः । ७१ महागर्भाय । महान्पूज्यः गर्भः विराड्रूपो यस्य स महागर्भः । ७२ विश्वगर्भाय । विश्वं जगद्गर्भो यस्य स विश्वगर्भः । ७३ विचक्षणाय । विशेषेण चष्टेऽनेनेति विचक्षणः । तदुक्तम् 'मूकं करोति वाचालम्' इति । ७४ परावरज्ञाय । परोवरं भविष्यद्वर्तमानं जानातीति परावरज्ञः । ७५ बीजेशाय । बीजं संसारकारणभूतोहंकारस्तस्येशो नियंतेत्यर्थः । ७६ सुमुखाय सुमहास्वनाय । सुष्ठु मुखं यस्य स सुमुखो गजाननरूपस्तस्मै सुशोभनो महास्वनो यस्य स सुमहास्वनः ॥ ११६ ॥

२. ७७ देवासुरगुरवे देवाय । देवाः इंद्रादयः असुराः हिरण्यकशिप्वादयस्तेषां गुरुर्हितोपदेशकस्तस्मै देवाय क्रीडमानायेत्यर्थः । ७८ देवासुरनमस्कृताय । देवासुरैरपि नमस्कृतो देवासुरनमस्कृतः । ७९ देवासुरमहामात्राय । देवासुररूपौ मत्तगजसदृशदूतौ । तेषां महामात्रो नियंतेत्यर्थः । ८० देवासुरमहाश्रयाय । देवासुराणां महानाश्रयो यस्य स देवासुरमहाश्रयः ॥ ११७ ॥

३. ८१ देवादिदेवाय । देवानामादयः कारणाः देवादयो देवाः ब्रह्मविष्णुमहेश्वराः यस्मात्स देवादिदेवः । ८२ देवर्षिदेवासुरवरप्रदाय । देवानां ऋषिरतींद्रियदर्शकश्चासौ देवासुराणां वरानभिलषितार्थान् प्रकर्षेण ददातीति देवर्षिर्देवासुरवरप्रदः । ८३ देवासुरेश्वराय । देवासुराः ईश्वराः यस्मात्स देवासुरेश्वरः । ८४ दिव्याय दिवि भवो दिव्यः निर्विकार इत्यर्थः ८५ देवासुरमहेश्वराय । देवासुराणां महेश्वरः पूज्यः स्वामीत्यर्थः ॥ ११८ ॥

४. ८६ सर्वदेवमयाय । सर्वदेवमयः सर्वदेवावयव इत्यर्थः । ८७ अचिंत्याय । अस्य विष्णोरपि चिंत्यः अचिंत्यः । ८८ देवतात्मने देवताः गौर्यादयः आत्मा स्वरूपं यस्य स देवतात्मा । ८९ आत्मसंभवाय । आत्मनां जीवानां संभवो यस्मात्स आत्मसंभवः । ९० ईड्याय । ईडितुं स्तोतुं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विबुधाग्रवरश्रेष्ठः सर्वदेवोत्तमोत्तमः'।
शिवज्ञानरतः श्रीमान् शिखिश्रीपर्वतप्रियः ॥ १२० ॥[1]

जयस्तंभो विशिष्टंभो नरसिंहनिपातनः।
ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ॥ १२१ ॥[2]

नंदी नंदीश्वरो नग्नो नग्नव्रतधरः शुचिः।
लिंगाध्यक्षः सुराध्यक्षो युगाध्यक्षो युगावहः ॥ १२२ ॥[3]

स्ववशः सवशः स्वर्गः स्वरः स्वरमयस्वनः।
बीजाध्यक्षो बीजकर्ता धनकृद्धर्मवर्धनः ॥ १२३ ॥[4]

योग्य ईड्यः सर्वस्तुल्य इत्यर्थः। ९१ अनीशाय। न ईशो यस्य सोऽनीशः। ९२ सुरव्याघ्राय। सुरेषु व्याघ्र इव सुरव्याघ्रः। ९३ देवसिंहाय। देवेषु सिंह इव देवसिंहः। ९४ दिवाकराय। दिवा दिवसं करोतीति दिवाकरः दिवाविभेति कृत्रष्टः॥ ११९ ॥

१. ९५ विबुधाग्रवरश्रेष्ठाय। विबुधाग्र इंद्रस्तस्माद्वराः प्रजापतयस्तेभ्योपि श्रेष्ठो विबुधाग्रवरश्रेष्ठः ९६ सर्वदेवोत्तमोत्तमाय। सर्वदेवेषूत्तमः ब्रह्मादयस्तेष्वप्युत्तमः सर्वदेवोत्तमोत्तमः। ९७ शिवज्ञानरताय। शिवास्तद्रूपा ज्ञानरता यस्मात्स शिवज्ञानरतः। ९८ श्रीमते। श्रीस्त्रिवर्गसंपत्तिर्नित्यं यस्मिन्स श्रीमान् 'श्रीर्लक्ष्म्यां त्रिवर्गसंपत्तौ' इति विश्वः। ९९ शिखिश्रीपर्वतप्रियाय। शिखा चूडास्ति यस्य स शिखी शिखिने स्कंदकुमारार्थं श्रीपर्वतः प्रियो यस्य स शिखिश्रीपर्वतप्रियः। इयं कथा ज्योतिर्लिंगवर्णने शिवपुराणे उक्ता 'शिखा शिखायां चूडायाम्' इति विश्वः॥ १२० ॥

२. ७०० जयस्तंभाय। जयस्य स्तंभ आधारभूत इत्यर्थः। इति सप्तमं शतकं समाप्तम्। १ विशिष्टंभाय। विशिष्टं सर्वोत्कृष्टमंभः गंगोदकं यस्मिन्स विशिष्टंभः। शकंध्वादित्वात्पररूपम्। २ नरसिंहनिपातनाय। नरसिंहं तत्संज्ञकावतारं निपातयति शरभरूपेण नाशयतीति नरसिंहनिपातनः। ३ ब्रह्मचारिणे। ब्रह्मणि चरति तच्छीलो ब्रह्मचारी। ४ लोकचारिणे। लोकेषु भूरादिषु चरति तच्छीलो लोकचारी। ५ धर्मचारिणे। धर्मं चरति तच्छीलो धर्मचारी। ६ धनाधिपाय। धनानामधिपः। सकलधनस्वामीत्यर्थः।। १२१ ॥

३. ७ नंदिने। नंदी शैलादिरूपः। ८ नंदीश्वराय। नंदिनः ईश्वरो नंदीश्वरः। ९ नग्नाय। नग्नो दिगंबररूपः। १० नग्नव्रतधराय। नग्नाः विगतवाससोऽवधूताः व्रतधराः यस्य स नग्नव्रतधरः। ११ शुचये। शुचिरनुपहतः। 'शुचिः शुद्धेनुपहते' इति विश्वः। १२ लिंगाध्यक्षाय। लिंगे बाणादिलिंगरूपे अध्यक्षं प्रत्यक्षं यस्य स लिंगाध्यक्षः। १३ सुराध्यक्षाय। सुराणां देवानामध्यक्षः प्रभुरित्यर्थः। १४ युगाध्यक्षाय। युगानां कृतादीनामध्यक्षः प्रभुरित्यर्थः। १५ युगावहाय। युगानां कृतादीनामावहस्तत्काले प्रापक इत्यर्थः। १२२ ॥

४. १६ स्ववशाय। स्वस्यैव वशः स्ववशः इतरानधीन इत्यर्थः। १७ सवशाय। वशेन इंद्रियनिग्रहेण सहितः सवशः। १८ स्वर्गस्वराय। स्वर्गे तत्संज्ञकलोके स्वरो नासासमीरणो

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दंभोऽदंभो महादंभः सर्वभूतमहेश्वरः ।
श्मशाननिलयस्तिष्यः सेतुरप्रतिमाकृतिः ॥ १२४ ॥[1]

लोकोत्तरस्फुटालोकस्त्र्यंबको नागभूषणः ।
अंधकारिर्मखद्वेषी विष्णुकंधरपातनः ॥ १२५ ॥[2]

वीतदोषोऽक्षयगुणो दक्षारिः पूषदंतहृत् ।
धूर्जटिः खंडपरशुः सकलो निष्कलोऽनघः ॥ १२६ ॥[3]

यस्य स स्वर्गस्वरः। 'स्वरो नासासमीरणे' इति विश्वः। १९ स्वरमयस्वनाय। स्वरमयः षड्जादिसप्तस्वरावयवः स्वतः शब्दो यस्मात्स स्वरमयस्वनः। तदुक्तं छंदः सूत्रे 'स्वराः षड्जऋषभगांधारमध्यमपंचमधैवतनिषादाः' इति। २० बीजाध्यक्षाय। बीजस्य शुक्रस्याध्यक्षः प्रभुरित्यर्थः। २१ बीजकर्त्रे। बीजं शुक्रं करोत्युपादयतीति बीजकर्ता। २२ धनकृद्धर्मवर्धनाय। धनं करोतीति धनकृत्स चासौ धर्मवर्धनश्च धनकृद्धर्मवर्धनः॥ १२३ ॥

१. २३ दंभाय। दंभो भक्तपरीक्षार्थं कैतवरूपः 'दंभस्तु कैतवे कल्के' इति विश्वः। २४ अदंभाय। नास्ति दंभं कैतवं यस्मिन्सोऽदंभः। १५ महादंभाय। महत्पूज्यं दंभं कैतवमपि यस्य स महादंभः। २६ सर्वभूतमहेश्वराय। सर्वभूतानां महेश्वरः सर्वभूतमहेश्वरः। २७ श्मशाननिलयाय। श्मशानः सकलशवाधिष्ठानो महाप्रलयस्तस्यापि नितरां लयो नाशो यस्मात्स श्मशाननिलयः। २८ तिष्याय। तिष्यः पृथिवीरूपः 'तिष्यः पुष्ये कलौ धात्र्याम्' इति विश्वः। २९ सेतवे। सेतुर्भवांबुधौ मार्गरूपः। ३० अप्रतिमाकृतये। अप्रतिमा उपमाशून्या आकृतिः स्वरूपं यस्य सोऽप्रतिमाकृतिः॥ १२४ ॥

२. ३१ लोकोत्तरस्फुटालोकाय। लोक्यत इति लोकस्तस्मादुत्तरोऽचक्षुर्ग्राह्यः स्फुटो विकसमानः आलोक आत्मप्रकाशो यस्य स लोकोत्तरस्फुटालोकः। ३२ त्र्यंबकाय। त्रीण्यंबकानि नेत्राणि यस्य स त्र्यंबकः। ३३ नागभूषणाय। नागाः शेषादयः भूषणानि यस्य स नागभूषणः। ३४ अंधकारये। अंध्कस्य तत्संज्ञकहिरण्याक्ष पुत्रदैत्यस्यारिर्नाशिक इत्यर्थः। ३५ मखद्वेषिणे। मखद्वेषो दक्षयज्ञद्वेषोस्ति यस्य स मखद्वेषी। ३६ विष्णुकंधरपातनाय। विष्णोः कंधरां ग्रीवां पातयतीति विष्णुकंधरपातनः॥ १२५ ॥

३. ३७ वीतदोषाय। वीताः गताः दोषा वैषम्यनैर्घृण्यादयो यस्मात्स वीतदोषः। ३८ अक्षयगुणाय। अक्षयाः नाशशून्याः गुणाः योगादिषोडशाध्यायोक्ता द्वात्रिंशद्गुणाः यस्मिन्सोऽक्षयगुणः। ३९ दक्षारये। दक्षस्य दक्षप्रजापतेररिः शत्रुरित्यर्थः। पूषदंतहृते। ४० पूषदंतान् हरतीति पूषदंतहृत्। ४१ धूर्जटये। धूः सर्वश्रेष्ठा जटिः केशसंघातो यस्य स धूर्जटिः 'जट—संघाते' तस्मात्सर्वधातुभ्य औणादिक इच्। ४२ खंडपरशवे। खंडयतीति खंडः सर्वच्छेदकः परशुर्यस्य स खंडपग्शुः। ४३ सकलाय। कलया चंद्रकलया सहितः सकलः। ४४ निष्कलाय। निष्कलः शुद्ध इत्यर्थः। ४५ अनघाय। नास्त्यघं पातकं यस्मिन्सोऽनघः॥ १२६ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आधारः सकलाधारः पांडुराभो मृडो नटः ।
पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ॥ १२७ ॥[1]

सामगेयः प्रियकरः पुण्यकीर्तिरनामयः ।
मनोजवस्तीर्थकरो जटिलो जीवितेश्वरः ॥ १२८ ॥[2]

जीवितांतकरो नित्यो वसुरेता वसुप्रियः ।
सद्गतिः संस्कृतिः सक्तः कालकंठः कलाधरः ॥ १२९ ॥[3]

मानी मान्यो महाकालः सद्भूतिः सत्परायणः ।
चंद्रसंजीवनः शास्ता लोकगूढोमराधिपः ॥ १३० ॥[4]

---

१. ४६ आधाराय । आ सर्वमभिव्याप्य धारो धरणं यस्य स आधारः । ४७ सकलाधाराय सकला आधारा यस्मात्स सकलाधारः । ४८ पांडुराभाय । पांडुरा श्वेता आभा कांतिर्यस्य स पांडुराभः । ४९ मृडाय । मृडयति सर्वान् सुखयतीति मृडः । ५० नटाय । नटश्चित्ररूपः । ५१ पूर्णाय । पूर्ण ऐश्वर्यादिसकलशक्तिसंपन्न इत्यर्थः । ५२ पूरयित्रे । पूरयतीति पूरयिता स्वभक्ताभिलाषपूरकः ५३ पुण्याय । पुण्यः स्मृतिमात्रेण कल्मषनाशकः । ५४ सुकुमाराय । सुशोभनः कुमारः स्कंदो यस्य स सुकुमारः । ५५ सुलोचनाय । सुष्ठु लोचनानि नेत्राणि यस्य स सुलोचनः ॥ १२७ ॥

२. ५६ सामगेयाय । सामभिर्गेयो गातुं योग्य इत्यर्थः । ५७ प्रियकराय । प्रियं करोति तच्छीलः प्रियकरः । ५८ पुण्यकीर्तये । पुण्यो पापनाशिका कीर्तिर्यस्य स पुण्यकीर्तिः । ५९ अनामयाय । नामभिः शब्दैर्याति प्राप्नोतीति नामयः न नामयोऽनामयः शक्त्या शब्दाप्रतिपाद्यः 'यतो वाचो निवर्तंते' इति श्रुतेः । अत्र सुपीति योगविभागात्कः । ६० मनोजवाय । मनसः अजवो यस्मिन् स मनोजवः 'अप्राप्य मनसा सह' इति श्रुतेः । ६१ तीर्थकराय । तीर्थानि पुष्कराद्यानि करोतीति तीर्थकरस्तीर्थहेतुरित्यर्थः । ६२ जटिलाय । जटिलो जटाविशिष्टः । ६३ जीवितेश्वराय । जीवितस्यायुष्यस्य ईश्वरः स्वामीत्यर्थः ॥ १२८ ॥

३. ६४ जीवितांतकराय । जीवितस्यांतकरो नाशहेतुः । ६५ नित्याय । नितरां त्यजति भवबंधं दूरीकरोतीति नित्यः त्यजधातोरन्यत्रापि दृश्यत इति डः । ६६ वसुरेतसे । वसु सुवर्णं रेतो यस्य स वसुरेताः । ६७ वसुप्रियाय । वसुर्धनाधिपः प्रियो यस्य स वसुप्रियः । 'वसुर्मयूखाग्निधनाधिपेषु' इति विश्वः । ६८ सद्गतये । सती अव्यभिचारिणी गतिर्यस्मात्स सद्गतिः । ६९ सत्कृतये । सती प्रशस्ता कृतिर्यस्य स सत्कृतिः । ७० सक्ताय सक्तोंबिकासंसक्तः । ७१ कालकंठाय । कालो महाकालः कंठे समीपे यस्य स कालकंठः । ७२ कलाधराय । कलानां चतुःषष्टिकलानां धरो धारक इत्यर्थः ॥ १२९ ॥

४. ७३ मानिने । मानोस्तीति मानी नित्यसन्मानविशिष्टः । ७४ मान्याय । मानयितुं स्वकल्याणार्थमत्यंतसत्कारं कर्तुं योग्यो मान्यः । तदुक्तं भागवते प्रह्लादेन "नैवात्मनः प्रभुरसौ निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते । यद्यज्जनो भगवते विदधीत मानं तच्चात्मनः प्रतिमुखस्य यथा मुखश्रीः ॥" इति । ७५ महाकालाय । महानपरिमितः कालो यस्य स

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

लोकबंधुर्लोकनाथः कृतज्ञः कृतिभूषणः ।
अनपाय्यक्षरः कांतः सर्वशास्त्रभृतां वरः ॥ १३१ ॥[1]

तेजोमयो द्युतिधरो लोकमायोग्रणीरणुः ।
शुचिस्मितः प्रसन्नात्मा दुर्जयो दुरतिक्रमः ॥ १३२ ॥[2]

ज्योतिर्मयो निराकारो जगन्नाथो जलेश्वरः ।
तुंबवीणी महाकायो विशोकः शोकनाशनः ॥ १३३ ॥[3]

त्रिलोकात्मा त्रिलोकेशः शुद्धः शुद्धी रथाक्षजः ।
अव्यक्तलक्षणो व्यक्तो व्यक्ताव्यक्तो विशांपतिः ॥ १३४ ॥[4]

महाकालः । ७६ सद्भूतये सती प्रशस्ता भूतिर्यस्मात्स सद्भूतिः । ७७ सत्परायणाय । सतां परायणः परमस्थानरूपः । ७८ चंद्रसंजीवनाय । चन्द्रस्य संजीवनः क्षयरोगनिवारक इत्यर्थः । ७९ शास्त्रे लोकगूढाय । शास्ता सकलानुशासकस्तस्मै लोकानां जनानां गूढोऽप्रत्यक्ष इत्यर्थः । ८० अमराधिपाय । अमराणां देवानामधिपः स्वामीत्यर्थः ॥ १३० ॥

१. ८१ लोकबंधवे । लोकानां जीवानां बंधुरिव भ्रातृसदृशो लोकबंधुः । ८२ लोकनाथाय । लोकानां चतुर्दशभुवनानां नाथ ईश्वरः । ८३ कृतज्ञाय कृतिभूषणाय । कृतं सत्कर्म जानातीति कृतज्ञस्तस्मै अत एव कृतिः स्वभक्तयत्नः भूष्यतेनेनेति कृतिभूषणः । ८४ अनपाय्यक्षराय । नास्त्यपायो नाशो येषां तान्यनपायीनि अक्षराणि यस्य सोनपाय्यक्षरः वेदरूप इत्यर्थः । ८५ कांताय कस्य शमनस्याप्यंतो नाशो यस्मात्स कांतः 'को ब्रह्मात्मानिलार्केषु शमने च' इति विश्वः । ८६ सर्वशास्त्रभृतांवराय सर्वशास्त्राणि बिभ्रति पोषयंति ते सर्वशास्त्रभृतस्तेषां मध्ये वरः श्रेष्ठ इत्यर्थः ॥ १३१ ॥

२. ८७ तेजोमयाय द्युतिधराय तेजोमयस्तेजःप्रचुरस्तस्मै अत एव द्युतेः कांतेः धरो धारक इत्यर्थः । ८८ लोकमायाय । लोकाः माया यस्य स लोकमायः । ८९ अग्रण्ये अग्रं सर्वश्रेष्ठस्थानं नयति स्वभक्तेभ्यःप्रापयतीत्यग्रणीः । ९० अणवे । अणुःपरमसूक्ष्मरूपः । ९१ शुचिस्मिताय । शुचि शुद्धं स्मितं हास्यं यस्य स शुचिस्मितः । ९२ प्रसन्नात्मने । प्रसन्नः आत्मा स्वभावो यस्य स प्रसन्नात्मा । ९३ दुर्जयाय दुःखेनापि जेतुमशक्यो दुर्जयः । ९४ दुरतिक्रमाय । दुःखेनापि क्रमितुमशक्यो दुरतिक्रमः ॥ १३२ ॥

३. ९५ ज्योतिर्मयाय । ज्योतिर्मयो ज्योतिर्लिंगरूपः । ९६ निराकाराय । निर्गतः आकारो यस्मात्स निराकारः निर्गुणरूपः । ९७ जगन्नाथाय जगतां निखिलविश्वानां नाथो जगन्नाथः । ९८ जलेश्वराय । जलानां सकलोदकानामीश्वरो जलेश्वरः । ९९ तुम्ववीणिने । तुंबफलद्वययुक्तः वीणास्ति यस्य स तुंबवीणी अत एव सा लोके रुद्रवीणेत्युच्यते । ८०० महाकायाय महान्पूज्यः कायो मूर्तिर्यस्य स महाकायः 'कायः कदैवते मूर्तौ' इति विश्वः ॥ इति अष्टमं शतकं समाप्तम् ॥ १ विशोकाय । विगतः शोको यस्मात्स विशोकः । २ शोकनाशनाय । शोकं भक्तशोकं नाशयतीति शोकनाशनः ॥ १३३ ॥

४. ३ त्रिलोकात्मने । त्रिलोकाः त्रैलोक्यमात्मा देहो यस्य स त्रिलोकात्मा ४ त्रिलोकेशाय ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वरशीलो वरतुलो मानो मानधनो मयः ।
ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्यमः ॥ १३५ ॥[1]

वेधा धाता विधाता च अत्ता हर्ता चतुर्मुखः ।
कैलासशिखरावासी सर्वावासी सतां गतिः ॥ १३६ ॥[2]

हिरण्यगर्भो हरिणः पुरुषः पूर्वजः पिता ।
भूतालयो भूतपतिर्भूतिदो भुवनेश्वरः ॥ १३७ ॥[3]

त्रिलोकानामीशस्त्रिलोकेशः । ५ शुद्धाय । शुद्धो निष्कल्मष इत्यर्थः । ६ शुद्धये । शुद्धिः शौचरूपः । ७ रथाक्षजाय । रथाक्षं सुदर्शनचक्रं जनयतीति रथाक्षजः 'अक्षः कर्षे तुषे चक्रे' इति विश्वः । ८ अव्यक्तलक्षणाय । अव्यक्तान्यस्पष्टानि लक्षणानि यस्य सोऽव्यक्तलक्षणः । ९ अव्यक्ताय । अः विष्णुर्व्यक्तो यस्मात्सोव्यक्तः । २० विशांपत्ये । विशां सकलप्रजानां पतिः पालक इत्यर्थः ॥ १३४ ॥

१. ११ वरशीलाय । वरं सर्वश्रेष्ठं शीलं सद्वृत्तं यस्मात्स वरशीलः । १२ वरतुलाय । वरं सर्वश्रेष्ठं तुलगुन्मानं यस्य स वरतुलः । १३ मानाय । मानः सकलप्रमाणभूतः । १४ मानधनाय मयाय । मानेन तन्मानेन धनं यस्मात्स मानधनस्तस्मै अत एव मयः सुखरूपः । १५ ब्रह्मणे । ब्रह्मा पितामहरूप इत्यर्थः । १६ विष्णवे प्रजापालाय । विष्णु र्व्यापकस्तस्मै प्रजाः पालयतीति प्रजापालो रक्षकमूर्तिरित्यर्थः । १७८ हंसाय । हंति अज्ञानं नाशयतीति हंसः परमात्मरूपः 'हंसो विहंगभेदे स्यादर्के विष्णौ हयातरे । योगि मंत्रादिभेदेषु परमात्मनि मत्सरे" इति विश्वः । 'भवेद्वर्णागमाद्धंसः' इत्युक्तेः । १८ हंसगतये । हंसानां योगिनां गतिर्यस्मिन् स हंसगतिः । १९ यमाय यमस्तत्संज्ञकप्रथमयोगांगरूपः । तथा च पातंजलसूत्रम् 'अहिंसासत्यास्तेय-ब्रह्मचर्यापरिग्रहा यमाः' इति ॥ १३५ ॥

२. २० वेधसे विशेषेण दधातीति वेधाः सकलाधारभूतः वेधादेशोऽसि प्रत्यय औणादिकोऽमरव्याख्यायामुक्तः । २१ धात्रे । दधाति जगत्पुष्णातीति धाता । २२ विधात्रे । विशेषेण दधाति ब्रह्मांडं पुष्णातीति विधाता । २३ अत्रे हर्त्रे । अत्ति जगद्भक्षयतीत्यत्ता तस्मै अत एव हरति जगत्संहारं करोतीति हर्ता । २४ चतुर्मुखाय चत्वारि मुखानि यस्य स चतुर्मुखो ब्रह्मरूपः । २५ कैलासशिखरावासिने । कैलासशिखरे आवसति तच्छीलः कैलासशिखरावासी । २६ सर्वावासिने । सर्वत्रावसति तच्छीलः सर्वावासी । २७ सतां गतये । सतां साधूनां गतिः मार्गरूपः ॥ १३६ ॥

३. २८ हिरण्यगर्भाय हिरण्यं गर्भः वीर्यजं यस्य स हिरण्यगर्भः । २९ हरिणाय । हरिणः पांडुरवर्णः 'हरिणः पांडुरः पांडुः' इत्यमरः । ३० पुरुषाय पुरुषस्तसंज्ञकस्तदुक्तमुपरिभागे "पुरुषं शंकरं प्राहुर्गौरीं च प्रकृतिं द्विजाः" इति । ३१ पूर्वजाय पित्रे पूर्वं सकलादौ जायते प्रादुर्भवतीति पूर्वजस्तस्मै पित्रे सकलजनकायेत्यर्थः । ३२ भूतालयाय । भूतं भूतसंज्ञकवनमालयः स्थानं यस्य स भूतालयः । इयं कथा पूर्वमुक्ता । ३३ भूतपतये । भूतानां गगनादीनां पतिः पालक इत्यर्थः । ३४ भूतिदाय । भूतिमैश्वर्यं ददातीति भूतिदः । ३५ भुवनेश्वराय भुवनानामीश्वरः स्वामिनो यस्मात्स भुवनेश्वरः ॥ १३७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

संयोगी योगविद्ब्रह्मा ब्रह्मण्यो ब्राह्मणप्रियः ।
देवप्रियो देवनाथो देवज्ञो देवचिंतकः ॥ १३८ ॥[1]

विषमाक्षः कलाध्यक्षो वृषांको वृषवर्धनः ।
निर्मदो निरहंकारो निर्मोहो निरुपद्रवः ॥ १३९ ॥[2]

दर्पहा दर्पितो दृप्तः सर्वर्तुपरिवर्तकः ।
सप्तजिह्वः सहस्रार्चिः स्निग्धः प्रकृतिदक्षिणः ॥ १४० ॥[3]

भूतभव्यभवन्नाथः प्रभवो भ्रांतिनाशनः ।
अर्थोनर्थो महाकोशः परकार्यैकपंडितः ॥ १४१ ॥[4]

---

१. ३६ संयोगिने। सम्यक् योजयति तच्छीलः संयोगी यथायथं कर्मफलप्रापकः। ३७ योगविद्ब्रह्मणे। योगवित्सकलोपायज्ञःब्रह्मा यस्मात्स योगविद्ब्रह्मा ३८ ब्राह्मण्याय। ब्रह्मणे तपसे हितो ब्रह्मण्यः। ३९ ब्राह्मणप्रियाय। ब्राह्मणाः प्रियाः यस्य स ब्राह्मणप्रियः। ४० देवप्रियाय। देवाः प्रिया यस्य स देवप्रियः। ४१ देवनाथाय। देवानां नाथः स्वामीत्यर्थः। ४२ देवज्ञाय। देवाः ज्ञाः ज्ञानिनो यस्मात्स देवज्ञः 'ज्ञा अवबोधने' अस्मादिगुपधेति कः। ४३ देवचिंतकाय देवा अपि चिंतका यस्य स देवचिंतकः॥ १३८ ॥

२. ४४ विषमाक्षाय। विषमाणि त्रीण्यक्षीणि यस्य स विषमाक्षः बहुव्रीहिः अच् समासांतः। ४५ कलाध्यक्षाय। कलानां चतुःषष्टिकलानामध्यक्षः प्रभुरित्यर्थः ४६ वृषांकाय। वृषो धर्म एव अंकः भूषणं यस्य स वृषांकः 'अंकश्चित्रयुद्धे च भूषणे' इति विश्वः। ४७ वृषवर्धनाय। वृषो धर्मः वर्धत्यनेनेति वृषवर्धनः। ४८ निर्मदाय निरहंकाराय। निर्गतः मदो यस्मात्स निर्मदस्तस्मै अत एव निर्गतः अहंकारो यस्मात्स निरहंकारः। ४९ निर्मोहाय। निर्गतः मोहो वैचित्यं यस्मात्स निर्मोहः। ५० निरुपद्रवाय। निर्गतः उपद्रवो यस्मात्स निरुपद्रवः॥ १३९ ॥

३. ५१ दर्पघ्ने। दर्पमुत्सेकं सर्वेषां हंतीति दर्पहा। ५२ दर्पिताय। दर्पो हर्षः संजातो यस्य स दर्पितो नित्यतुष्ट इत्यर्थः। ५३ दृप्ताय दृप्तः स्वात्मामृतास्वादेन नित्यहृषित इत्यर्थः। ५४ सर्वर्तुपरिवर्तकाय। सर्वर्तून् वसंतादीन्परिवर्तयति भ्रामयतीति सर्वर्तुपरिवर्तकः। ५५ सप्तजिह्वाय। सप्त तत्संख्याका जिह्वाः यस्य स सप्तजिह्वः' सप्त ते अग्ने समिधः सप्तजिह्वः' इति श्रुतेः। ५६ सहस्रार्चिषे। सहस्रमसंख्याताः अर्चिषो दीप्तयो यस्य स सहस्रार्चिः। ५७ स्निग्धाय। स्निग्धो दयार्द्र इत्यर्थः। ५८ प्रकृतिदक्षिणाय। प्रकृत्या स्वभावेन दक्षिणः सरलः प्रकृतिदक्षिणः 'दक्षिणः सरलोपि च' इति त्रिकांडशेषः॥ १४० ॥

४. ५९ भूतभव्यभवन्नाथाय। भूतं पूर्वोत्पन्नं भव्यं भविष्यद्भवद्वर्तमानं च तेषां नाथः स्वामीत्यर्थः। ६० प्रभवाय। प्रकर्षेण भवः संसारो यस्मात्स प्रभवः। ६१ भ्रांतिनाशनाय। भ्रांति देहादावात्मबुद्धिं नाशयतीति भ्रांतिनाशनः। ६२ अर्थाय अर्थ्यत इत्यर्थः सर्वप्रार्थ्य इत्यर्थः। ६३ अनर्थाय। नास्त्यर्थः प्रयोजनं यस्य सोऽनर्थः आप्तकाम इत्यर्थः। ६४ महाकोशाय। महानपरिमितः कोशो धनं यस्मात्स महाकोशः। ६५ परकार्यैकपंडिताय। परं च तत्कार्यं च परकार्यं मोक्षाख्यं तस्मिन्सोऽद्वितीयः पंडितः परकार्यैक पंडितः॥ १४१ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निष्कंटकः कृतानंदो निर्व्याजो व्याजमर्दनः ।
सत्त्ववान् सात्त्विकः सत्यकीर्तिस्तंभकृतागमः ॥ १४२ ॥[1]

अकंपितो गुणग्राही नैकात्मा नैककर्मकृत् ।
सुप्रीतः सुमुखः सूक्ष्मः सुकरो दक्षिणोऽनलः ॥ १४३ ॥[2]

स्कंधः स्कंधधरो धुर्यः प्रकटः प्रीतिवर्धनः ।
अपराजितः सर्वसहो विदग्धः सर्ववाहनः ॥ १४४ ॥[3]

अधृतः स्वधृतः साध्यः पूर्तमूर्तिर्यशोधरः ।
वराहश्रृंगधृग्वायुर्बलवानेकनायकः ॥ १४५ ॥[4]

---

१. ६६ निष्कंटकाय । निर्गताः कण्टकाः कामादिशत्रवो यस्मात्स निष्कंटकः 'कण्टकः क्षुद्रशत्रौ च' इति विश्वः । ६७कृतानंदाय । कृतोऽच्छिन्नः आनंदो यस्मात्स कृतानन्दः 'कृतं तु वेष्टितोऽच्छिन्ने' इति विश्वः । ६८ निर्व्याजाय निर्गतं व्याजं कपटं यस्मात्स निर्व्याजः । ६९ व्याजमर्दनाय । व्याजं मिषं मर्दयतीति व्याजमर्दनः । ७० सत्त्ववते । सत्त्वं शौर्यवीर्यादिकं नित्यं यस्मिन्नसौ सत्त्ववान् । ७१ सात्त्विकाय । सात्त्विकः सत्त्वगुणप्रधानः । ७२ सत्यकीर्तिस्तंभकृतागमाय । सत्यकीर्तिस्तंभकृतः आगमो वेदो येन स सत्यकीर्तिस्तंभकृतागमः ॥ १४२ ॥

२. ७३ अकंपिताय । न कंपितोऽकंपितः निश्चल इत्यर्थः । ७४ गुणग्राहिणे । गुणान्स्वभक्तगुणान् गृह्णाति तच्छीलो गुणग्राही । ७५ नैकात्मने नैककर्मकृते । न एकः आत्मा स्वरूपं यस्य स नैकात्मा सकलजीवरूपस्तस्मै अत एव नैककर्माणि करोतीति नैककर्मकृत् । अत्र न शब्देन सुप्सुपेति समासः । ७६ सुप्रीताय । सु शोभनं प्रीतं प्रसादो यस्य स सुप्रीतः । तदुक्तं सीमंतिन्या ब्रह्मोत्तरखंडे "तुष्टे च पार्वतीनाथे किमसाध्यं शरीरिणाम्" इति । ७७ सुमुखाय सुष्ठु मुखं संसारनिःसरणं यस्मात्स सुमुखः 'मुखं निःसरणे वक्त्रे' इति विश्वः । ७८ सूक्ष्माय । सूक्ष्मः सर्वगतः 'सर्वगतं' इति श्रुतेः । ७९ सुकराय । सुष्ठु वरदत्वेन शोभनः करो हस्तो यस्य स सुकरः । ८० दक्षिणाय । दक्षिणः सव्यमार्गरूपः 'दक्षिणः सरलावामपरच्छंदानुवर्तिषु' इति विश्वः । ८१ अनलाय । नास्त्यलो भूषणं यस्य सोऽनलः स्वयमेव भूषणभूत इत्यर्थः ॥ १४३ ॥

३. ८२ स्कंधाय । स्कंधस्तत्त्वप्रकांडरूपः' 'स्कंधः प्रकांडे' इति विश्वः । ८३ स्कंधधराय । स्कंधानां तत्त्वप्रकांडानां धरो धारक इत्यर्थः । ८४ धुर्याय । धुरं समस्तभूतजन्मादिलक्षणां वहतीति धुर्यः । ८५ प्रकटाय । प्रकटः सूर्यादिरूपेण सर्वप्रत्यक्ष इत्यर्थः । 'उतैनं गोपा अदृशन्नदृशन्नुदहार्य' इति श्रुतेः । ८६ प्रीतिवर्धनाय । प्रीतिरपारमहिमत्वाद्भक्तप्रेम वर्धतेऽस्मिन्निति प्रीतिवर्धनः । ८७ अपराजिताय । न पराजितोऽपराजितः पराभवशून्यः । ८८ सर्वसहाय । सर्वं वस्तुजातं सहतीति सर्वसहः । ८९ विदग्धाय । विशिष्टं निर्मूलं दग्धं यस्मात्स विदग्धः । तदुक्तं गीतायां "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन" इति । ९० सर्ववाहनाय । सर्वं वाह्यते प्राप्यतेनेनेति सर्ववाहनः ॥ १४४ ॥

४. ९१ अधृताय । न धृतोऽधृतः अनन्याधार इत्यर्थः । ९२ स्वधृताय । स्वेनात्मनैव धृतः स्वधृतः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

श्रुतिप्रकाशः श्रुतिमानेकबंधुरनेकधृक् ।
श्रीवल्लभशिवारंभः शांतभद्रः समंजसः ॥ १४६ ॥[1]

भूशयो भूतिकृद्भूतिर्भूषणो भूतवाहनः ।
अकायो भक्तकायस्थः कालज्ञानी कलावपुः ॥ १४७ ॥[2]

सत्यव्रतमहात्यागी निष्ठाशांतिपरायणः ।
परार्थवृत्तिर्वरदो विविक्तः श्रुतिसागरः ॥ १४८ ॥[3]

'स्वं ज्ञाता वात्मधनयोः' इति विश्वः । ९३ साध्याय । साधितुं योग्यः साध्यः । ९४ पूर्तमूर्तये पूर्तवापीकूपादिकरणं मूर्तिः स्वरूपं यस्य स पूर्तमूर्तिः । ९५ यशोधराय । यशसः धरो यशोधरः । ९६ वराहश्रृंगधृषे । वराहश्रृंगं यज्ञवराहदंष्ट्रां धृष्णोतीति वराहश्रृंगधृक् । ९७ वायवे वाति गच्छतीति वायुस्तद्रूपः । ९८ बलवते बलं सामर्थ्यं नित्यं विद्यते यस्य स बलवान् । ९९ एकनायकाय । एकोऽद्वितीयो नायकः श्रेष्ठ इत्यर्थः । 'नायको नेतरि श्रेष्ठे' इति विश्वः ॥ १४५ ॥

१. ९०० । श्रुतिप्रकाशाय । श्रुतिभिः प्रकाशो यस्य स श्रुतिप्रकाशः 'औपनिषदं पुरुषं पृच्छामि' इति श्रुतेः ॥ इति नवमं शतकं समाप्तम् ॥ १ श्रुतिमते । श्रुतिर्वेदोस्ति नित्यं यस्य स श्रुतिमान् । २ एकबंधवे । एकोऽद्वितीयो बंधुरेकबंधुः प्रत्युपकारानपेक्षोपकारीत्यर्थः । ३ अनेकधृषे । अनेकानसंख्यस्वभक्तान्धृष्णोति प्रगल्भान्करोतीत्यनेकधृक् 'ञिधृषा प्रागल्भ्ये' अस्मात्क्विप् । ४ श्रीवल्लभशिवारंभाय । श्रीवल्लभस्य विष्णोः शिवारंभः कल्याणप्रारंभो यस्मात्स श्रीवल्लभशिवारंभः । ५ शांतभद्राय । शांतानां भद्रं यस्मात्स शांतभद्रः । ६ समंजसाय । सम्यगनक्ति यथार्थं जानातीति समंजसः ॥ १४६ ॥

२. ७ भूशयाय । भूः भूमिः शयः शय्या यस्य भूशयः 'शयः शय्यादिपाणिषु' इति विश्वः । ८ भूतिकृद्भूतये । भूतिकृतां सकलैश्वर्यप्रदानामपि भूतिरैश्वर्यं यस्मात्स भूतिकृद्भूतिः । ९ भूषणाय । भूष्यते सकलमलंक्रियतेनेनेति भूषणः । १० भूतवाहनाय । भूतानि वाहनानि यस्य स भूतवाहनः । ११ अकायाय । नास्ति कायः शरीरं यस्य सोऽकायः । १२ भक्तकायस्थः । भक्तकायेषु स्वभक्तहृत्कमलेषु तिष्ठतीति भक्तकायस्थः । १३ कालज्ञानिने । कालज्ञानं नित्यमस्यास्तीति कालज्ञानी । १४ कलावपुषे । कलावत्तरीवद्वपुर्यस्य स कलावपुः चिंतनमात्रेण संसारार्णवतारक इत्यर्थः । 'कला च रजसि स्त्रीणां तरीकपटयोः' इति विश्वः ॥ १४७ ॥

३. १५ सत्यव्रतमहात्यागिने । त्यागोस्ति यस्य स त्यागी महाभागी त्यागी च महात्यागी सत्यव्रतानामदांभिकानां महात्यागी सत्यव्रतमहात्यागी । १६ निष्ठाशांतिपरायणाय । निष्ठा मरणपर्यंतं शांतिर्निष्ठाशांतिः परायणं परमस्थानं यस्य स निष्ठाशांतिपरायणः । १७ परार्थवृत्तये । परार्था मोक्षार्था वृत्तिर्विवरणं यस्य स परार्थवृत्ति 'वृत्तिर्विवरणे जीव्ये' इति विश्वः । १८ वरदाय । वरानावरकमायाविलासान् द्यति खंडयतीति वरदः । १९ विविक्ताय । विविक्तो जडविश्वात्पृथक्स्थित इत्यर्थः । २० श्रुतिसागराय । श्रुतीनां सागरः समुद्रवदपारः ॥ १४८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अनिर्विण्णो गुणग्राही कलंकांकः कलंकहा।
स्वभावरुद्रो मध्यस्थः शत्रुघ्नो मध्यनाशकः ॥ १४९ ॥[1]

शिखंडी कवची शूली चंडी मुंडी च कुंडली।
मेखली कवची खड्गी मायी संसारसारथिः ॥ १५० ॥[2]

अमृत्युः सर्वदृक् सिंहस्तेजोराशिर्महामणिः।
असंख्येयोप्रमेयात्मा वीर्यवान् कार्यकोविदः ॥ १५१ ॥[3]

वेद्यो वेदार्थविद्गोप्ता सर्वाचारो मुनीश्वरः।
अनुत्तमो दुराधर्षो मधुरः प्रियदर्शनः ॥ १५२ ॥[4]

---

१. २१ अनिर्विण्णाय। न निर्विण्णोऽनिर्विण्णः जगत्सर्गादौ नित्यसर्गादौ नित्योद्यत इत्यर्थः। २२ गुणग्राहिणे। गुणैः सर्वप्रदत्वादिभिः गृह्णाति भक्तचेतांस्याकर्षति तच्छीलो गुणग्राही। २३ कलंकांकाय। कलंकः अंकश्चिह्नं यस्य स कलंकांकश्चंद्ररूपः। २४ कलंकघ्ने। कलंकमपवादं हंतीति कलंकहा 'कलंकोऽङ्केऽपवादे च' इति विश्वः। २५ स्वभावरुद्राय। रोदयतीति रुत् अज्ञानं द्रावयतीति रुद्रः स्वभावः रुद्रो यस्य स स्वभावरुद्रः। २६ मध्यस्थाय। मध्ये ब्रह्मविष्णुमध्यभागे तिष्ठतीति मध्यस्थः। २७ शत्रुघ्नाय। शत्रूनंधकादीनपि हंति परमगतिं प्रापयतीति शत्रुघ्नः। २८ मध्यनाशकाय मध्येन मध्यभवरुद्रेन नाशयति जगत्संहारं करोतीति मध्यनाशकः ॥ १४९ ॥

२. २९ शिखंडिने। शिखंडश्चूडोस्ति यस्य स शिखंडी 'शिखंडो चूडबर्हयोः' इति विश्वः। ३० कवचिने। कवचं सुवर्णतनुत्रमस्यास्तीति कवची। ३१ शूलिने। शूलिने शूलं तत्संज्ञकायुधमस्यास्तीति शूली। ३२ चंडिने चंडस्तत्संज्ञकगणोस्ति यस्य स चंडी। ३३ मुंडिने। मुंडो मूर्धमुंडितगणोस्ति यस्य स मुंडी। ३४ कुंडलिने कुंडले सर्पकुंडले स्तः यस्य स कुंडली। तदुक्तं शिवगीतायाम् कंबलाश्वतरौ शंभोः कर्णकुंडलतां गतौ' इति। ३५ मेखलिने। मेखला कटिसूत्रं यस्यास्तीति मेखली। ३६ कवचिने। कवचः पटहोस्ति यस्य स कवची 'कवचो गर्दभांडे स्यात्सन्नाहे पटहेपि च।' इति विश्वः। ३७ खड्गिने। खड्गश्चंद्रहाससंज्ञोस्ति यस्य स खड्गी। ३८ मायिने संसारसारथये। मायास्ति यस्य स मायी तस्मै अत एव संसारस्य सारथिः सहाय इत्यर्थः ॥ १५० ॥

३. ३९ अमृत्यवे सर्वदृशे। नास्ति मृत्युर्यस्य सोऽमृत्युस्तस्मै अत एव सर्वं पश्यतीति सर्वदृक्। ४० सिंहाय हिनस्तीति सिंहः पृषोदरादित्वात्साधुः। ४१ तेजोराशये महामणये। तेजसां राशिस्तेजोराशिस्तस्मै महान् पूज्यो यो मणिः कौस्तुभादिस्तद्रूपः। ४२ असंख्येयाय। संख्यातुं योग्यः संख्येयो न संख्येयोऽसंख्येयोऽपार इत्यर्थः। ४३ अप्रमेयात्मने। अप्रमेयः प्रमातुमशक्य आत्मा देहो यस्य सोप्रमेयात्मा। ४४ वीर्यवते। वीर्यं प्रभावोस्ति नित्यं यस्य स वीर्यवान्। ४५ कार्यकोविदाय। कार्येषु सकलकार्येषु कोविदो निपुण इत्यर्थः ॥ १५१ ॥

४. ४६ वेद्याय। वेत्तुं मुमुक्षुभिर्ज्ञातुं योग्यो वेद्यः। ४७ वेदार्थविद्गोप्त्रे ॥ वेदार्थविदां गोप्ता रक्षक इत्यर्थः। ४८ सर्वाचारः सर्वः आचारो यस्मात् स सर्वाचारः४९ मुनीश्वराय।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सुरेशः शरणं सर्वः शब्दब्रह्मसतांगतिः ।
कालभक्षः कलंकारिः कंकणीकृतवासुकिः ॥ १५३ ॥[1]

महेष्वासो महीभर्ता निष्कलंको विश्रृंखलः ।
द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः ॥ ५४ ॥[2]

निवृत्तः संवृतः शिल्पो व्यूढोरस्को महाभुजः ।
एकज्योतिर्निरातंको नरो नारायणप्रियः ॥ १५५ ॥[3]

मुनीनामीश्वरो मुनीश्वरः५० अनुत्तमाय नौतीति नुत् अतिशयेन नुदिति नुत्तमः नास्ति नुत्तमो वा अः विष्णुः नुत्तमो यस्य सोनुत्तमः । ५१ दुराधर्षाय । दुःखेनापि आधर्षितुमशक्यो दुराधर्षः । ५२ मधुराय । मधु क्षौद्रं राति ददातीति मधुरः । 'मधुक्षौद्रे जले क्षीरे मेघपुष्परसे मधु' इति विश्वः । ५३ प्रियदर्शनाय । प्रियः सर्वश्रेष्ठ आत्मा दृश्यतेनेनेति प्रियदर्शनः ॥ १५२ ॥

१. ५४ सुरेशाय । सुरा ईशा यस्मात्स सुरेशः 'भीषोदेति सूर्यः' इति श्रुतेः । ५५ शरणाय शरणं सकलरक्षितेत्यर्थः । ५६ सर्वस्मै । सर्वो विश्वरुप इत्यर्थः । ५७ शब्दब्रह्म सतांगतये शब्दरूपं ब्रह्म शब्दब्रह्म शब्दब्रह्मणि संति ते शब्दब्रह्मसंतस्तेषां गति र्मार्गरूपः । ५८ कालभक्षाय । कालेन कालरूपेण भक्षतीति कालभक्षः । ५९ कलंकारये । कलंकस्य चित्तादिमलस्यारिर्नाशकः । ६० कंकणीकृतवासुकये । न कंकणमकंकणम् अकंकणं कङ्कणं यथा स्यात्तथा कृतः कंकणीकृतः वासुकिस्तत्संज्ञकसर्पराजो येन स कंकणीकृतवासुकिः ॥ १५३ ॥

२. ६१ महेष्वासाय । महांतावक्षयौ इष्वासौ इषुधी यस्य स महेश्वासः । ६२ महीभर्त्रे । मह्याः जगत्या अपि भर्ता धारक इत्यर्थः । ६३ निष्कलंकाय । निर्गतः कलंकोऽविद्यामलो यस्मात्स निष्कलंकः 'कलंकोंकेऽपवादे च कालायसमलेपि च' इति विश्वः । ६४ विश्रृंखलाय । विशिष्टा श्रृंखला मायाबंधो यस्मात्स विश्रृंखलः 'श्रृंखला पुंस्कटीवस्त्रे बंधेपि निगडेपि च' इति विश्वः । ६५ द्युमणये तरणये । दिवः मणिः रत्नरूपो द्युमणिस्तस्मै तरणये सूर्यरूपायेत्यर्थः । 'द्युमणिस्तरणिर्मित्रः' इत्यमरः । ६६ धन्याय । धन्यः कृतकृत्य इत्यर्थः । ६७ सिद्धिदाय । सिद्धीरणिमादीर्ददातीति सिद्धिदः । ६८ सिद्धिसाधनाय । सिद्धीनां साधनः यस्मात्स सिद्धिसाधनः ॥ १५४ ॥

३. ६९ निवृत्ताय । नितरां वृत्तं प्रसवबंधो यस्मात्स निवृत्तः 'वृत्तं प्रसवबंधे स्यात्' इति विश्वः । ७० संवृत्ताय । संवृत्तोऽच्छादिकयाऽविद्यया वेष्टित इत्यर्थः । ७१ शिल्पाय । शिल्पमनेकब्रह्मांडकौशलमस्यास्तीति शिल्पः । ७२ व्यूढोरस्काय । व्यूढं विस्तीर्णमुरो यस्य स व्यूढोरस्कः । ७३ महाभुजाय । महांतः दीर्घाः भुजा यस्य स महाभुजः । ७४ एकज्योतिषे । एकमद्वितीयं ज्योतिश्चिद्रूपं यस्य स एकज्योतिः । ७५ निरातंकाय । निर्गता आतंका रोगा यस्मात्स निरातंकः ७६ नराय नारायण प्रियाय । नरस्तत्संज्ञकधर्मपुत्ररूपस्तस्मै नारायणस्य तत्संज्ञकज्येष्ठभ्रातुः प्रियो नारायणप्रियः ॥ १५५ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निर्लेपो निष्प्रपंचात्मा निर्व्यग्रो व्यग्रनाशनः ।
स्तव्यस्तवप्रियः स्तोता व्यासमूर्तिरनाकुलः ॥ १५६ ॥[१]

निरवद्यपदोपायो विद्याराशिरविक्रमः ।
प्रशांतबुद्धिरक्षुद्रः क्षुद्रहा नित्यसुंदरः ॥ १५७ ॥[२]

धैर्याग्र्यधुर्यो धात्रीशः शाकल्यः शर्वरीपतिः ।
परमार्थगुरुर्द्दृष्टिर्गुरुराश्रितवत्सलः ॥ १५८ ॥[३]

रसो रसज्ञः सर्वज्ञः सर्वसत्त्वावलंबनः ।
सूतउवाच ।
एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजम् ॥ १५९ ॥[४]

---

१. ७७ निर्लेपाय । निर्गतः लेपः कर्मसंबंधो यस्य स निर्लेपः । ७८ निष्प्रपंचात्मने । निर्गतः प्रपंचः पंचभूतसमुदायो यस्मात्स निष्प्रपंचः आत्मा देहो यस्य स निष्प्रपंचात्मा । ७९ निर्व्यग्राय । निर्गता व्यग्राः कर्माक्षिप्तांतःकरणाः यस्मात्स निर्व्यग्रः। ८० व्यग्रनाशनाय । व्यग्रान्काम्यकर्मासक्तांतःकरणान्नाशयति मृत्युना मारयतीति व्यग्रनाशनः। ८१ स्तव्यस्तवप्रियाय । स्तोतुं योग्यास्तव्याः ज्ञानिनस्तेषां स्तवः प्रियो यस्य स स्तव्यस्तवप्रियः । ८२ स्तोत्रे व्यासमूर्तये । स्तौतीति स्तोता तस्मै व्यासाः वेदविभाजकऋषयो मूर्तयः स्वरूपाणि यस्य स व्यासमूर्तिः । ८३ अनाकुलाय । न आकुलः कामादिशत्रुव्याप्तोऽनाकुलः ॥ १५६ ॥

२. ८४ निरवद्यपदोपायाय निरवद्यपदस्य मोक्षस्योपायः साधनरूपो निरवद्यपदोपायः । ८५ विद्या राशये । विद्यानां सर्वविद्यानां राशिः समुदायो यस्मात्स विद्याराशिः । ८६ अविक्रमाय । नास्ति विक्रमो यस्मिन्सोविक्रमः प्रसादैकगम्य इत्यर्थः । ८७ प्रशांतबुद्धये अक्षुद्राय । प्रकर्षेण शांता बुद्धिर्यस्य स प्रशांतबुद्धिस्तस्मै अत एवाक्षुद्रो वैषम्यरहितः । ८८ क्षुद्रघ्ने । क्षुद्रान् विषमबुद्धीन् हंति नाशयतीति क्षुद्रहा । ८९ नित्यसुंदराय । नित्यं सर्वकाले सुंदरो नित्यसुंदरः ॥ १५७ ॥

३. ९० धैर्याग्र्यधुर्याय धैर्यमग्र्यं येषां ते धैर्याग्र्यास्तेषु धुर्यः प्रथम इत्यर्थः । ९१ धात्रीशाय । दधातीति धात्री पृथ्वी तस्याः ईशः स्वामीत्यर्थः । ९२ शाकल्याय शाकल्यस्तसंज्ञकऋषिरूपः । ९३ शर्बरीपतये । शर्वरीणां रात्रीणां पतिः शर्वरीपतिः । ९४ परमार्थगुरवे दृष्टये । परमार्थस्य मोक्षस्य गुरुरुपदेशकवेदरूपः तस्मै अत एव दृष्टिश्चक्षूरूपः । तदुक्तम् 'वेदैः पश्यंति वाडवाः' इति । ९५ गुरवे गृणाति सर्वेषां हितमुपदिशतीति गुरुः । ९६ आश्रितवत्सलाय । आश्रितेषु स्वभक्तेषु वत्सलोत्यंतकरुण इत्यर्थः ॥ १५८ ॥

४. ९७ रसाय । रसो ब्राह्मरसरूपः 'रसो वै सः' इति श्रुतेः । ९८ रसज्ञाय । रसस्य ब्रह्मरसस्य ज्ञा वेत्तारः भक्तजना यस्मात्स रसज्ञः । ९९ सर्वज्ञाय । सर्वस्य निखिलब्रह्मांडस्य ज्ञा वेत्तारो योगिनो यस्मात्स सर्वज्ञः। १००० सर्वसत्त्वावलंबनाय नमः। सर्वसत्त्वानां निखिलप्राणिनामवलंबन आश्रयभूत इत्यर्थः। इति दशमं शतकं समाप्तम् ॥ सूतः सहस्रनामोक्त्वाग्रिमवृत्तं कथयति-एवमित्यादिना । एवं पूर्वोक्तानुपूर्व्येत्यर्थः ॥ १५९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्नापयामास च विभुः पूजयामास पंकजैः ।
परीक्षार्थं हरेः पूजाकमलेषु महेश्वरः ॥ १६० ॥

गोपयामास कमलं तदैकं भुवनेश्वरः ।
हृतपुष्पो हरिस्तत्र किमिदं त्वभ्यचिंतयन् ॥ १६१ ॥[1]

ज्ञात्वा स्वनेत्रमुद्धृत्य सर्वसत्त्वावलंबनम् ।
पूजयामास भावेन नाम्ना तेन जगद्गुरुम् ॥ १६२ ॥[2]

ततस्तत्र विभुं दृष्ट्वा तथाभूतं हरो हरिम् ।
तस्मादवततराशु मंडलात्पावकस्य च ॥ १६३ ॥[3]

कोटिभास्करसंकाशं जटामुकुटमंडितम् ।
ज्वालामालावृतं दिव्यं तीक्ष्णदंष्ट्रं भयंकरम् ॥ १६४ ॥

शूलटंकगदाचक्रकुंतपाशधरं हरम् ।
वरदाभयहस्तं च द्वीपिचर्मोत्तरीयकम् ॥ १६५ ॥

इत्थंभूतं तदा दृष्ट्वा भवं भस्मविभूषितम् ।
हृष्टो नमश्चकाराशु देवदेवं जनार्दनः ॥ १६६ ॥

तुष्टुवुस्तं परिक्रम्य सेंद्रा देवास्त्रिलोचनम् ।
चचाल ब्रह्मभुवनं चकंपे च वसुंधरा ॥ १६७ ॥

ददाह तेजस्तच्छंभोः प्रांतं वै शतयोजनम् ।
अधस्ताच्चोर्ध्वतश्चैव हाहेत्यकृत भूतले ॥ १६८ ॥

तदा प्राह महादेवः प्रहसन्निव शंकरः ।
संप्रेक्ष्य प्रणयाद्विष्णुं कृतांजलिपुटं स्थितम् ॥ १६९ ॥

---

१. हरेःपरीक्षार्थं विष्णुभावं परीक्षितुमित्यर्थः । महेश्वरःपूजाकमलेषु मध्ये एकं कमलं गोपयामास स्वमायया विष्णवज्ञातं चकारेत्यग्रिमेणान्वयः ॥ १६० ॥ १६१ ॥

२. ज्ञात्वा स्वस्मिन् भ्रांत्यभावाद्धरचेष्टितं बुद्ध्वेत्यर्थः । तेन सर्वसत्त्वावलंवनरूपेण ॥ १६२ ॥

३. तथाभूतं समर्पितनेत्रमित्यर्थः । तस्माल्लिंगात्पावकस्य च मंडलादाशु अवततारेत्यन्वयः ॥ १६३ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ज्ञातं मयेदमधुना देवकार्यं जनार्दन।
सुदर्शनाख्यं चक्रं च ददामि तव शोभनम्॥ १७०॥[1]

यद्रूपं भवता दृष्टं सर्वलोकभयंकरम्।
हिताय तव यत्नेन तव भावाय सुव्रत॥ १७१॥[2]

शांतं रणाजिरे विष्णो देवानां दुःखसाधनम्।
शांतस्य चास्त्रं शांतं स्याच्छांतेनास्त्रेण किं फलम्॥ १७२॥[3]

शांतस्य समरे चास्त्रं शांतिरेव तपस्विनम्।
योद्धुः शांत्या बलच्छेदः परस्य बलवृद्धिदः॥ १७३॥[4]

देवैरशांतैर्यद्रूपं मदीयं भावयाव्ययम्।
किमायुधेन कार्यं वै योद्धुं देवारिसूदन॥ १७४॥[5]

क्षमा युधि न कार्यं वै योद्धुं देवारिसूदन।
अनागते व्यतीते च दौर्बल्ये स्वजनोत्करे॥ १७५॥[6]

अकालिके स्वधर्मे च अनर्थे वारिसूदन।
एवमुक्त्वा ददौ चक्रं सूर्यायुतसमप्रभम्॥ १७६॥[7]

नेत्रं च नेता जगतां प्रभुर्वै पद्मसन्निभम्।
तदाप्रभृति तं प्राहुः पद्माक्षमिति सुव्रतम्॥ १७७॥

---

१. शिवरूपं रौद्रं वर्णयति-कोटिभास्करेत्यादिना॥ १६४॥ १६५॥ १६७॥ १६८॥ १६९॥ १७०॥

२. अत्युग्ररूपप्रदर्शनहेतुं कथयति-यद्रूपमित्यादिना॥ १७१॥

३. शांतं सौम्यरूपं रणाजिरे देवानां दुःखसाधनं शांतस्यास्त्रं च शांतं स्यात्तेन शांतेनास्त्रेण किं फलं किमपि नेत्यर्थः॥ १७२॥

४. शांतस्य तपस्विनं प्रति समरे शांतिरेवास्त्रं योद्धुः संप्रहारकर्तुः शांत्या परस्य बलवृद्धिदः स्यादिति शेषः॥ १७३॥

५. अशान्तैर्देवैः सह देवारिसूदन यद्घोरं रूपं मदीय मव्ययं भावय वै तथा च आयुधेन किं कार्यं किमपि नेत्यर्थः॥ १७४॥

६. अक्षमास्थानानि कथयति-क्षमेत्यादिना॥ १७५॥

७. चक्रं वारिभवसुदर्शनाख्यम्॥ १७६॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दत्त्वैनं नयनं चक्रं विष्णवे नीललोहितः ।
पस्पर्श च कराभ्यां वै सुशुभाभ्यामुवाचह ॥ १७८ ॥

वरदोहं वरश्रेष्ठ वरान्वरच चेप्सितान् ।
भक्त्या वशीकृतो नूनं त्वयाहं पुरुषोत्तम ॥ १७९ ॥

इत्युक्तो देवदेवेन देवदेवं प्रणम्य तम् ।
त्वयि भक्तिर्महादेव प्रसीद वरमुत्तमम् ॥ १८० ॥[1]

नान्यमिच्छामि भक्तानामार्तयो नास्ति यत्प्रभो ।
तच्छ्रुत्वा वचनं तस्य दयावान् सुतरां भवः ॥ १८१ ॥[2]

पस्पर्श च ददौ तस्मै श्रद्धां शीतांशुभूषणः ।
प्राह चैवं महादेवः परमात्मानमच्युतम् ॥ १८२ ॥

मयि भक्तश्च वंद्यश्च पूज्यश्चैव सुरासुरैः ।
भविष्यसि न संदेहो मत्प्रसादात्सुरोतत्तम ॥ १८३ ॥

यदा सती दक्षपुत्री विनिंद्यैव सुलोचना ।
मातरं पितरं दक्षं भविष्यति सुरेश्वरी ॥ १८४ ॥[3]

दिव्या हैमवती विष्णो तदा त्वमपि सुव्रत ।
भगिनीं तव कल्याणीं देवीं हैमवतीमुमाम् ॥ १८५ ॥
नियोगाद्ब्रह्मणः साध्वीं प्रदास्यसि ममैव ताम् ।
मत्संबंधी च लोकानां मध्ये पूज्यो भविष्यति ॥ १८६ ॥[4]
मां दिव्येन च भावेन तदाप्रभृति शंकरम् ।
द्रक्ष्यसे च प्रसन्नेन मित्रभूतमिवात्मना ॥ १८७ ॥

---

१. नेत्रं लोचनमित्यर्थः ॥ १७७ ॥ १७८ ॥ १७९ ॥ १८० ॥

२. नास्ति न संतीत्यर्थः ॥ १८१ ॥

३. स्वस्मिन् श्रद्धादानात्तथा च 'यो यच्छ्रद्धः स एव सः' इति भगवद्गीतोक्तनियमादच्युते परमात्मेति विशेषणसंगतिः एवं वक्ष्यमाणमित्यर्थः ॥ १८२ ॥ १८३ ॥ १८४ ॥

४. हैमवती हिमवत्पुत्रीत्यर्थः ॥ १८५ ॥ १८६ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इत्युक्त्वांतर्दधे रुद्रो भगवान्नीललोहितः ।
जनार्दनोपि भगवान् देवानामपि सन्निधौ ॥ १८८ ॥[१]

अयाचत महादेवं ब्रह्माणं मुनिभिः समम् ।
मया प्रोक्तं स्तवं दिव्यं पद्मयोने सुशोभनम् ॥ १८९ ॥

यः पठेच्छृणुयाद्वापि श्रावयेद्वा द्विजोत्तमान् ।
प्रतिनाम्नि हिरण्यस्य दत्तस्य फलमाप्नुयात् ॥ १९० ॥

अश्वमेधसहस्रेण फलं भवति तस्य वै ।
घृताद्यैः स्नापयेद्रुद्रं स्थाल्या वै कलशैः शुभैः ॥ १९१ ॥

नाम्नां सहस्रेणानेन श्रद्धया शिवमीश्वरम् ।
सोपि यज्ञसहस्रस्य फलं लब्ध्वा सुरेश्वरैः ॥ १९२ ॥

पूज्यो भवति रुद्रस्य प्रीतिर्भवति तस्य वै ।
तथास्त्विति तथा प्राह पद्मयोनेर्जनार्दनम् ॥ १९३ ॥[२]

जग्मतुः प्रणिपत्यैनं देवदेवं जगद्गुरुम् ।
तस्मान्नाम्नां सहस्रेण पूजयेदनघो द्विजाः ॥ १९४ ॥

जपेन्नाम्नां सहस्रं च स याति परमां गतिम् ॥ १९५ ॥[३]

इति श्रीलिंगमहापुराणे पूर्वभागे सहस्रनामभिः पूजनाद्विष्णुचक्रलाभो नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥[४]

---

१. तदाप्रभृति पार्वतीप्रदानानंतरमित्यर्थः ॥ १८७ ॥ १८८ ॥

२. मुनिभिः समं महादेवं ब्रह्माणमयाचतेत्यनेनैतत्सहस्रनामस्तवादेर्वक्ष्यमाणफलं सर्वसंमतमिति बोध्यते ॥ १८९ ॥ १९० ॥ १९१ ॥ १९२ ॥ १९३ ॥

३. जगद्गुरुमेनं शिवं प्रणिपत्य ब्रह्मविष्णू जग्मतुरित्यन्वयः । तस्मात्पूर्वोक्तकारणादनघो निष्पापः पूजाधिकारी नाम्नां सहस्रेण पूजयेत्पूजासामग्र्यभावे यो नाम्नां साहस्रं जपन् स च परमां गतिं मोक्षं यातीत्यग्रिमेणान्वयः । द्विजा इति ऋषिसंबोधनम् ॥ १९४ ॥ १९५ ॥

४. अमोघास्त्रं लब्धुं सकलविबुधानां हि ऋषभो हरिः सांबं दिव्यैरमिमततमैर्नामदशभिः शतैरस्तौद्भक्त्या तदिदमखिलं शंकरमुदे सहस्रं व्याख्यातं भवतु विबुधानां प्रियकरम् । इति श्रीलिंगमहापुराणे पूर्वभागे शिव तोषिण्यां टीकायामष्टनवतितमोऽध्यायः ॥ ९८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

VERSION-4

श्री शिवमहापुराणे

सूत उवाच

श्रूयतामृषयः श्रेष्ठाः कथयामि यथाश्रुतम् ॥
विष्णुना प्रार्थितो येन संतुष्टः परमेश्वरः ॥
तदाहं कथयाम्यद्य पुण्यं नामसहस्रकम् ॥१ ॥

श्रीविष्णुरुवाच

शिवो हरो मृडो रुद्रः पुष्करः पुष्पलोचनः ॥
अर्थिगम्यः सदाचारः शर्वः शंभुर्महेश्वरः ॥२ ॥

चंद्रापीडश्चंद्रमौलिर्विश्वं विश्वंभरेश्वरः ॥
वेदांतसारसंदोहः कपाली नीललोहितः ॥३ ॥

ध्यानाधारोऽपरिच्छेद्यो गौरीभर्त्ता गणेश्वरः ॥
अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गस्वर्गसाधनः ॥४ ॥

ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः ॥
वामदेवो महादेवः पटुः परिवृढो दृढः ॥५ ॥

विश्वरूपो विरूपाक्षो वागीशः शुचिसत्तमः ॥
सर्वप्रमाणसंवादी वृषाङ्को वृषवाहनः ॥६ ॥

ईशः पिनाकी खट्वांगी चित्रवेषश्चिरंतन ॥
तमोहरो महायोगी गोप्ता ब्रह्मा च धूर्जटिः ॥७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः ।।
उन्नध्रः पुरुषो जुष्यो दुर्वासाः पुरशासनः ।।८ ।।

दिव्यायुधः स्कंदगुरुः परमेष्ठी परात्परः ।।
अनादिमध्यनिधनो गिरीशो गिरिजाधवः ।।९ ।।

कुबेरबंधुः श्रीकंठो लोकवर्णोत्तमो मृदुः ।।
समाधिवेद्यः कोदंडी नीलकंठः परस्वधी: ।।१० ।।

विशालाक्षो मृगव्याधः सुरेशः सूर्यतापनः ।।
धर्मधाम क्षमाक्षेत्रं भगवान्भगनेत्रभित् ।।११ ।।

उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः परंतपः ।।
दाता दयाकरो दक्षः कर्मदी: कामशासनः ।।१२ ।।

श्मशाननिलयः सूक्ष्मः श्मशानस्थो महेश्वरः ।।
लोककर्त्ता मृगपतिर्महाकर्त्ता महौषधिः ।।१३ ।।

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।।
नीतिः सुनीतिः शुद्धात्मा सोमः सोमरतः सुखी ।।१४ ।।

सोमपोऽमृतपः सौम्यो महातेजा महाद्युतिः ।।
तेजोमयोऽमृतमयोऽन्नमयश्च सुधापतिः ।।१५ ।।

अजातशत्रुरालोकः संभाव्यो हव्यवाहनः ।।
लोककरो वेदकरः सूत्रकारः सनातनः ।।१६ ।।

महर्षिःकपिलाचार्यो विश्वदीप्तिस्त्रिलोचनः ।।
पिनाकपाणिर्भूदेवःस्वस्तिदः स्वस्तिकृत्सुधीः ।।१७ ।।

धातृधामा धामकरः सर्वगः सर्वगोचरः ।।
ब्रह्मसृग्विश्वसृक्सर्गः कर्णिकारः प्रियः कविः ।।१८ ।।

शाखो विशाखो गोशाखः शिरो भिषगनुत्तमः ।।
गंगाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थिरः ।।१९ ।।

विजितात्मा विधेयात्मा भूतवाहनसारथिः ।।
सगणो गणकायश्च सुकीर्तिश्छिन्नसंशयः ।।२० ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कामदेवः कामपालो भस्मोद्धूलितविग्रहः ॥
भस्मप्रियो भस्मशायी कामी कांतः कृतागमः ॥२१ ॥

समावर्तोऽनिवृत्तात्मा धर्मपुंजः सदाशिवः ।
अकल्मषश्च पुण्यात्मा चतुर्बाहुर्दुरासदः ॥२२ ॥

दुर्लभो दुर्गमो दुर्गः सर्वायुधविशारदः ।
अध्यात्मयोगनिलयः सुतंतुस्तंतुवर्धनः ॥२३ ॥

शुभांगो लोकसारंगो जगदीशो जनार्दनः ॥
भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः ॥२४ ॥

असाध्यः साधुसाध्यश्च भृत्यमर्कटरूपधृक् ॥
हिरण्यरेताः पौराणो रिपुजीवहरो बली ॥२५ ॥

महाह्रदो महागर्तस्सिद्धो वृंदारवंदितः ॥
व्याघ्रचर्मांबरो व्याली महाभूतो महानिधिः ॥२६ ॥

अमृतोऽमृतपः श्रीमान्पाञ्चजन्यः प्रभंजनः ।
पंचविंशतितत्त्वस्थः पारिजातः परात्परः ॥२७ ॥

सुलभस्सुव्रतश्शूरो वाङ्मयैकनिधिर्निधिः ॥
वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः ॥२८ ॥

आश्रमः क्षपणः क्षामो ज्ञानवानचलेश्वरः ।
प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः ॥२९ ॥

धनुर्धरो धनुर्वेदो गुणः शशिगुणाकरः ॥
सत्यस्सत्यपरोऽदीनो धर्मो गोधर्मशासनः ॥३० ॥

अनंतदृष्टिरानंदो दंडो दमयिता दमः ।
अभिचार्य्यो महामायो विश्वकर्मविशारदः ॥३१ ॥

वीतरागो विनीतात्मा तपस्वी भूतभावनः ॥
उन्मत्तवेषः प्रच्छन्नो जितकामोऽजितप्रियः ॥३२ ॥

कल्याणप्रकृतिः कल्पः सर्वलोकप्रजापतिः ।
तरस्वी तारको धीमान्प्रधानः प्रभुरव्ययः ॥३३ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

लोकपालोऽतर्हितात्मा कल्पादिः कमलेक्षणः ॥
वेदशास्त्रार्थतत्त्वज्ञोऽनियमो नियताश्रयः ॥३४ ॥

चंद्रः सूर्यः शनिः केतुर्वरांगो विद्रुमच्छविः ॥
भक्तिवश्यः परं ब्रह्म मृगबाणार्पणोऽनघः ॥३५ ॥

अद्रिरद्र्यालयः कांतः परमात्मा जगद्गुरुः ॥
सर्वकर्मालयस्तुष्टो मंगल्यो मंगलावृतः ॥३६ ॥

महातपा दीर्घतपाः स्थविष्ठः स्थविरो ध्रुवः ॥
अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥३७ ॥

संवत्सरकरो मंत्रः प्रत्ययः सर्वतापनः ॥
अजः सर्वेश्वरस्सिद्धो महातेजा महाबलः ॥३८ ॥

योगी योग्यो महारेताः सिद्धिः सर्वादिरग्रहः ॥
वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ॥३९ ॥

सुकीर्तिः शोभनस्स्रग्वी वेदांगो वेदविन्मुनिः ॥
भ्राजिष्णुर्भोजनं भोक्ता लोकनाथो दुंराधरः ॥४० ॥

अमृतश्शाश्वतश्शांतो बाणहस्तः प्रतापवान् ॥
कमंडलुधरो धन्वी ह्यवाङ्मनसगोचरः ॥४१ ॥

अतींद्रियो महामायस्सर्ववासश्चतुष्पथः ॥
कालयोगी महानादो महोत्साहो महाबलः ॥४२ ॥

महाबुद्धिर्महावीर्यो भूतचारी पुरंदरः ॥
निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥४३ ॥

अनिर्देश्यवपुः श्रीमान्सर्वाचार्यमनोगतिः ॥
बहुश्रुतिर्महामायो नियतात्मा ध्रुवोऽध्रुवः ॥४४ ॥

तेजस्तेजो द्युतिधरो जनकः सर्वशासकः ॥
नृत्यप्रियो नृत्यनित्यः प्रकाशात्मा प्रकाशकः ॥४५ ॥

स्पष्टाक्षरो बुधो मंत्रः समानः सारसंप्लवः ।
युगादिकृद्युगावर्तो गंभीरो वृषवाहनः ॥ ४६ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इष्टो विशिष्टः शिष्टेष्टः सुलभः सारशोधनः ।
तीर्थरूपस्तीर्थनामा तीर्थादृश्यस्तु तीर्थदः ॥ ४७ ॥

अपांनिधिरधिष्ठानं विजयो जयकालवित् ।
प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥ ४८ ॥

विमोचनःसुरगणो विद्येशो बिंदुसंश्रयः ।
वातरूपोऽमलो न्यायी विकर्ता गहनो गुहः ॥ ४९ ॥

करणं कारणं कर्ता सर्वबंधविमोचनः ।
व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ॥ ५० ॥

गुरुदो ललितोऽभेदो भावात्मात्मनि संस्थितः ।
वीरेश्वरो वीरभद्रो वीरासनविधिर्गुरुः ॥ ५१ ॥

वीरचूडामणिर्वेत्ता चिदानंदो नदीधरः ।
आज्ञाधारस्त्रिशूली च शिपिविष्टः शिवालयः ॥ ५२ ॥

बालखिल्यो महावीरस्तिग्मांशुर्बधिरः खगः ।
अभिरामः सुशरणः सुब्रह्मण्यः सुधापतिः ॥ ५३ ॥

मघवान्कौशिको गोमान्विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेहः सारः संसारचक्रधृत् ॥ ५४ ॥

अमोघदंडी मध्यस्थो हिरण्यो ब्रह्मवर्चसः ।
परमार्थः परो मायी शंबरो व्याघ्रलोचनः ॥ ५५ ॥

रुचिर्बहुरुचिर्वैद्यो वाचस्पतिरहस्पतिः ।
रविर्विरोचनः स्कंदः शास्ता वैवस्वतो यमः ॥ ५६ ॥

युक्तिरुन्नतकीर्तिश्च सानुरागः पुरंजयः ।
कैलासाधिपतिः कांतः सविता रविलोचनः ॥ ५७ ॥

विश्वोत्तमो वीतभयो विश्वभर्त्ताऽनिवारितः ।
नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ॥ ५८ ॥

दूरश्रवो विश्वसहो ध्येयो दुःस्वप्ननाशनः ।
उत्तारणो दुष्कृतिहा विज्ञेयो दुःसहोऽभवः ॥ ५९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अनादिर्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः ।
विश्वगोप्ता विश्वकर्त्ता सुवीरो रुचिरांगदः ॥ ६० ॥

जननो जनजन्मादिः प्रीतिमान्नीतिमान्ध्रुवः ।
वसिष्ठः कश्यपो भानुर्भीमो भीमपराक्रमः ॥ ६१ ॥

प्रणवः सत्पथाचारो महाकोशो महाघनः ।
जन्माधिपो महादेवः सकलागमपारगः ॥ ६२ ॥

तत्त्वं तत्त्वविदेकात्मा विभुर्विष्णुर्विभूषणः ।
ऋषिर्ब्राह्मण ऐश्वर्यजन्मा मृत्युजरातिगः ॥ ६३ ॥

पंचयज्ञसमुत्पत्तिर्विश्वेशो विमलोदयः ।
आत्मयोनिरनाद्यंतो वत्सलो भक्तलोकधृक् ॥ ६४ ॥

गायत्रीवल्लभः प्रांशुर्विश्वावासः प्रभाकरः ।
शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा ॥ ६५ ॥

अनेमिरिष्टनेमिश्च मुकुन्दो विगतज्वरः ।
स्वयंज्योतिर्महाज्योतिस्तनुज्योतिरचंचलः ॥ ६६ ॥

पिंगलः कपिलश्मश्रुर्भालनेत्रस्त्रयीतनुः ।
ज्ञानस्कंदो महानीतिर्विश्वोत्पत्तिरुपप्लवः ॥ ६७ ॥

भगो विवस्वानादित्यो गतपारो बृहस्पतिः ।
कल्याणगुणनामा च पापहा पुण्यदर्शनः ॥ ६८ ॥

उदारकीर्तिरुद्योगी सद्योगी सदसत्त्रपः ।
नक्षत्रमाली नाकेशः स्वाधिष्ठानः षडाश्रयः ॥ ६९ ॥

पवित्रः पापहारी च मणिपूरो नभोगतिः ।
हृत्पुंडरीकमासीनः शक्रः शांतो वृषाकपिः ॥ ७० ॥

उष्णो गृहपतिः कृष्णः समर्थोऽनर्थनाशनः ।
अधर्मशत्रुरज्ञेयः पुरुहूतः पुरुश्रुतः ॥ ७१ ॥

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः ।
जगद्धितैषी सुगतः कुमारः कुशलागमः ॥ ७२ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

हिरण्यवर्णो ज्योतिष्मान्नानाभूतरतो ध्वनिः ।
आरोग्यो नमनाध्यक्षो विश्वामित्रो धनेश्वरः ॥ ७३ ॥

ब्रह्मज्योतिर्वसुधामा महाज्योतिरनुत्तमः ।
मातामहो मातरिश्वा नभस्वान्नागहारधृक् ॥ ७४ ॥

पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः ।
निरावरणनिर्वारो वैरंच्यो विष्टरश्रवाः ॥ ७५ ॥

आत्मभूरनिरुद्धोऽत्रिर्ज्ञानमूर्तिर्महायशाः ।
लोकवीराग्रणीर्वीरश्चण्डः सत्यपराक्रमः ॥ ७६ ॥

व्यालकल्पो महाकल्पः कल्पवृक्षः कलाधरः ।
अलंकरिष्णुरचलो रोचिष्णुर्विक्रमोन्नतः ॥ ७७ ॥

आयुः शब्दपतिर्वाग्मी प्लवनश्शिखिसारथिः ।
असंसृष्टोऽतिथिश्शत्रुः प्रमाथी पादपासनः ॥ ७८ ॥

वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः ।
जप्यो जरादिशमनो लोहितश्च तनूनपात् ॥ ७९ ॥

पृषदश्वो नभोयोनिःसुप्रतीकस्तमिस्रहा ।
निदाघस्तपनो मेघभक्षः परपुरंजयः ॥ ८० ॥

सुखानिलस्सुनिष्पन्नस्सुरभिश्शिशिरात्मकः ।
वसंतो माधवो ग्रीष्मो नभस्यो बीजवाहनः ॥ ८१ ॥

अंगिरा गुरुरात्रेयो विमलो विश्वपावनः ।
पावनः पुरजिच्छक्रस्त्रैविद्यो नववारणः ॥ ८२ ॥

मनोबुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः ।
जमदग्निर्बलनिधिर्विगालो विश्वगालवः ॥ ८३ ॥

अघोरोऽनुत्तरो यज्ञः श्रेयो निःश्रेयसप्रदः ।
शैलो गगनकुंदाभो दानवारिररिंदमः ॥ ८४ ॥

चामुण्डो जनकश्चारुर्निश्शल्यो लोकशल्यधृक् ।
चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः ॥ ८५ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आग्नेयोऽथ समान्नायस्तीर्थदेवशिवालयः ।
बहुरूपो महारूपस्सर्वरूपश्चराचरः ॥ ८६ ॥

न्यायनिर्मायको नेयो न्यायगम्यो निरंजनः ।
सहस्रमूर्द्धा देवेंद्रस्सर्वशस्त्रप्रभंजनः ॥ ८७ ॥

मुंडी विरूपो विकृतो दंडी नादी गुणोत्तमः ।
पिंगलाक्षो हि वह्वयो नीलग्रीवो निरामयः ॥ ८८ ॥

सहस्रबाहुस्सर्वेशश्शरण्यस्सर्वलोकधृक् ।
पद्मासनः परं ज्योतिः पारम्पर्य्यफलप्रदः ॥ ८९ ॥

पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ।
परावरज्ञो वरदो वरेण्यश्च महास्वनः ॥ ९० ॥

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामित्रो देवासुरमहेश्वरः ॥ ९१ ॥

देवासुरेश्वरो दिव्यो देवासुरमहाश्रयः ।
देवदेवोऽनयोऽचिंत्यो देवतात्मात्मसंभवः ॥ ९२ ॥

सद्यो महासुरव्याधो देवसिंहो दिवाकरः ।
विबुधाग्रचरः श्रेष्ठः सर्वदेवोत्तमोत्तम ॥ ९३ ॥

शिवज्ञानरतः श्रीमाञ्शिखी श्रीपर्वतप्रियः ।
वज्रहस्तस्सिद्धखड्गो नरसिंहनिपातनः ॥ ९४ ॥

ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ।
नन्दी नंदीश्वरोऽनंतो नग्नव्रतधरश्शुचिः ॥ ९५ ॥

लिंगाध्यक्षः सुराध्यक्षो युगाध्यक्षो युगापहः ।
स्वधामा स्वगतः स्वर्गी स्वरः स्वरभयः स्वनः ॥ ९६ ॥

बाणाध्यक्षो बीजकर्ता कर्मकृद्धर्मसंभवः ।
दंभो लोभोऽथ वै शंभुस्सर्वभूतमहेश्वरः ॥ ९७ ॥

श्मशाननिलयस्त्र्यक्षस्सतुरप्रतिमाकृतिः ।
लोकोत्तरस्फुटोलोकः त्र्यंबको नागभूषणः ॥ ९८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अंधकारिमखद्वेषी विष्णुकंधरपातनः ।
हीनदोषोऽक्षयगुणो दक्षारिः पूषदंतभित् ॥ ९९ ॥

पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ।
सन्मार्गसुप्रियो धूर्तः पुण्यकीर्तिरनामयः ॥ १०० ॥

मनोजवस्तीर्थकरो जटिलो नियमेश्वरः ।
जीवितांतकरो नित्यो वसुरेता वसुप्रदः ॥ १०१ ॥

सद्गतिः सिद्धिदः सिद्धिः सजातिः खलकंटकः ।
कलाधरो महाकालभूतः सत्यपरायणः ॥ १०२ ॥

लोकलावण्यकर्ता च लोकोत्तरसुखालयः ।
चंद्रसंजीवनश्शास्ता लोकग्राहो महाधिपः ॥ १०३ ॥

लोकबंधुर्लोकनाथः कृतज्ञः कृतिभूषितः ।
अनपायोऽक्षरः कांतः सर्वशस्त्रभृतां वरः ॥ १०४ ॥

तेजोमयो द्युतिधरो लोकमानी घृणार्णवः ।
शुचिस्मितः प्रसन्नात्मा ह्यजेयो दुरतिक्रमः ॥ १०५ ॥

ज्योतिर्मयो जगन्नाथो निराकारो जलेश्वरः ।
तुंबवीणो महाकायो विशोकश्शोकनाशनः ॥ १०६ ॥

त्रिलोकपस्त्रिलोकेशः सर्वशुद्धिरधोक्षजः ।
अव्यक्तलक्षणो देवो व्यक्तोऽव्यक्तो विशां पतिः ॥ १०७ ॥

परः शिवो वसुर्नासासारो मानधरो यमः ।
ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्वयः ॥१०८ ॥

वेधा विधाता धाता च स्रष्टा हर्ता चतुर्मुखः ।
कैलासशिखरावासी सर्वावासी सदागतिः ॥१०९ ॥

हिरण्यगर्भो द्रुहिणो भूतपालोऽथ भूपतिः ।
सद्योगी योगविद्योगी वरदो ब्राह्मणप्रियः ॥ ११० ॥

देवप्रियो देवनाथो देवको देवर्चितकः ।
विषमाक्षो विरूपाक्षो वृषदो वृषवर्धनः ॥ १११ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निर्ममो निरहंकारो निर्मोहो निरुपद्रवः ।
दर्पहा दर्पदो दृप्तः सर्वार्थपरिवर्तकः ॥ ११२ ॥

सहस्त्रार्चिर्भूतिभूषः स्निग्धाकृतिरदक्षिणः ।
भूतभव्यभवन्नाथो विभवो भूतिनाशनः ॥ ११३ ॥

अर्थोऽनर्थो महाकोशः परकार्यैकपंडितः ।
निष्कंटकः कृतानंदो निर्व्याजो व्याजमर्दनः ॥ ११४ ॥

सत्त्ववान्सात्त्विकः सत्यः कृतस्नेहः कृतागमः ।
अकंपितो गुणग्राही नैकात्मा नैककर्मकृत् ॥ ११५ ॥

सुप्रीतः सुखदः सूक्ष्मः सुकरो दक्षिणानिलः ।
नंदिस्कंदो धरो धुर्यः प्रकटः प्रीतिवर्धनः ॥ ११६ ॥

अपराजितः सर्वसहो गोविंदः सत्त्ववाहनः ।
अधृतः स्वधृतः सिद्धः पूतमूर्तिर्यशोधनः ॥ ११७ ॥

वाराहश्रृंगधृक् श्रृंगी बलवानेकनायकः ।
श्रुतिप्रकाशः श्रुतिमानेकबंधुरनेकधृक् ॥ ११८ ॥

श्रीवत्सलः शिवारंभः शांतभद्रः समो यशः ।
भूशयो भूषणो भूतिर्भूतिकृद्भूतभावनः ॥ ११९ ॥

अकंपो भक्तिकामस्तु कालहानिः कलाविभुः ।
सत्यव्रती महात्यागी नित्यशांतिपरायणः ॥ १२० ॥

परार्थवृत्तिर्वरदो विरक्तस्तु विशारदः ।
शुभदः शुभकर्ता च शुभनामा शुभः स्वयम् ॥ १२१ ॥

अनर्थितो गुणग्राही ह्यकर्ता कनकप्रभः ।
स्वभावभद्रो मध्यस्थः शत्रुघ्नो विघ्ननाशनः ॥ १२२ ॥

शिखंडी कवची शूली जटी मुंडी च कुंडली ।
अमृत्युः सर्वदृक् सिंहस्तेजोराशिर्महामणिः ॥ १२३ ॥

असंख्येयोऽप्रमेयात्मा वीर्यवान् वीर्यकोविदः ।
वेद्यश्च वै वियोगात्मा सप्तावरमुनीश्वरः ॥ १२४ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अनुत्तमो दुराधर्षो मधुरः प्रियदर्शनः ।
सुरेशः स्मरणः सर्वः शब्दः प्रतपतां वरः ॥ १२५ ॥

कालपक्षः कालकालः सुकृती कृतवासुकिः ।
महेष्वासो महीभर्ता निष्कलंको विश्रृंखलः ॥ १२६ ॥

द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः ।
विश्वतस्संवृत स्तुत्यो व्यूढोरस्को महाभुजः ॥ १२७ ॥

सर्वयोनिर्निरातंको नरनारायणप्रियः ।
निर्लेपो यतिसंगात्मा निर्व्यंगो व्यंगनाशनः ॥ १२८ ॥

स्तव्यः स्तवप्रियः स्तोता व्यासमूर्तिर्निरंकुशः ।
निरवद्यमयोपायो विद्याराशिश्च सत्कृतः ॥ १२९ ॥

प्रशांतबुद्धिरक्षुण्णः संग्रहो नित्यसुंदरः ।
वैयाघ्रधुर्यो धात्रीशः संकल्पः शर्वरीपतिः ॥ १३० ॥

परमार्थगुरुर्दत्तः सूरिराश्रितवत्सलः ।
सोमो रसज्ञो रसदः सर्वसत्त्वावलंबनः ॥ १३१ ॥

एवं नाम्नां सहस्रेण तुष्टाव हि हरं हरिः ।
प्रार्थयामास शम्भुं वै पूजयामास पंकजैः ॥ १३२ ॥

ततः स कौतुकी शंभु श्चकार चरितं द्विजाः ।
महाद्भुतं सुखकरं तदेव श्रृणुतादरात् ॥ १३३ ॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां शिवसहस्रनामवर्णनं नाम
पञ्चत्रिंशोध्यायः ॥ ३५ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

VERSION-5

महाभारते शान्तिपर्वणि

चतुरशीत्यधिकद्विशततमोऽध्यायः

जनमेजय उवाच

प्राचेतसस्य दक्षस्य कथं वैवस्वतेऽन्तरे ।
विनाशमगमद् ब्रह्मन् हयमेधः प्रजापतेः ॥ १ ॥

देव्या मन्युकृतं मत्वा क्रुद्धः सर्वात्मकः प्रभुः ।
प्रसादात् तस्य दक्षेण स यज्ञः संचितः कथम् ।
एतद् वेदितुमिच्छेयं तन्मे ब्रूहि यथातथम् ॥ २ ॥

वैशम्पायन उवाच

पुरा हिमवतः पृष्ठे दक्षो वै यज्ञमाहरत् ।
गङ्गाद्वारे शुभे देशे ऋषिसिद्धनिषेविते ॥ ३ ॥

गन्धर्वाप्सरसाकीर्णे नानाद्रुमलतावृते ।
ऋषिसङ्घैः परिवृतं दक्षं धर्मभृतां वरम् ॥ ४ ॥

पृथिव्यामन्तरिक्षे च ये च स्वर्लोकवासिनः ।
सर्वे प्राञ्जलयो भूत्वा उपतस्थुः प्रजापतिम् ॥ ५ ॥

देवदानवगन्धर्वाः पिशाचोरगराक्षसाः ।
हाहाहूहूश्च गन्धर्वो तुम्बुरुर्नारदस्तथा ॥ ६ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विश्वावसुर्विश्वसेनो गन्धर्वाप्सरसस्तथा ।
आदित्या वसवो रुद्राः साध्याः सह मरुद्गणैः ॥ ७ ॥

इन्द्रेण सहिताः सर्वे आगता यज्ञभागिनः ।
ऊष्मपाः सोमपाश्चैव धूमपा आज्यपास्तथा ॥ ८ ॥

ऋषयः पितरश्चैव आगता ब्रह्मणा सह ।
एते चान्ये च बहवो भूतग्रामाश्चतुर्विधाः ॥ ९ ॥

जरायुजाण्डजाश्चैव सहसा स्वेदजोद्भिजैः ।
आहूता मन्त्रिताः सर्वे देवाश्च सह पत्निभिः ॥ १० ॥

विराजन्ते विमानस्था दीप्यमाना इवाग्नयः ।
तान् दृष्ट्वा मन्युनाऽऽविष्टो दधीचिर्वाक्यमब्रवीत् ॥ ११ ॥

नायं यज्ञो न वा धर्मो यत्र रुद्रो न इज्यते ।
वधबन्धं प्रपन्ना वै किं नु कालस्य पर्ययः ॥ १२ ॥

किंतु मोहान्न पश्यन्ति विनाशं पर्युपस्थितम् ।
उपस्थितं महाघोरं न बुध्यन्ति महाध्वरे ॥ १३ ॥

इत्युक्त्वा स महायोगी पश्यति ध्यानचक्षुषा ।
स पश्यति महादेवं देवीं च वरदां शुभाम् ॥ १४ ॥

नारदं च महात्मानं तस्या देव्याः समीपतः ।
संतोषं परमं लेभे इति निश्चित्य योगवित् ॥ १५ ॥

एकमन्त्रास्तु ते सर्वे येनेशो न निमन्त्रितः ।
तस्माद् देशादपक्रम्य दधीचिर्वाक्यमब्रवीत् ॥ १६ ॥

अपूज्यपूजनाच्चैव पूज्यानां चाप्यपूजनात् ।
नृघातकसमं पापं शश्वत् प्राप्नोति मानवः ॥ १७ ॥

अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ।
देवतानामृषीणां च मध्ये सत्यं ब्रवीम्यहम् ॥ १८ ॥

आगतं पशुभर्तारं स्त्रष्टारं जगतः पतिम् ।
अध्वरे ह्यग्रभोक्तारं सर्वेषां पश्यत प्रभुम् ॥ १९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दक्ष उवाच

सन्ति नो बहवो रुद्राः शूलहस्ताः कपर्दिनः ।
एकादशस्थानगता नाहं वेद्मि महेश्वरम् ॥ २० ॥

दधीचिरुवाच

सर्वेषामेव मन्त्रोऽयं येनासौ न निमन्त्रितः ।
यथाहं शंकरादूर्ध्वं नान्यं पश्यामि दैवतम् ।
तथा दक्षस्य विपुलो यज्ञोऽयं न भविष्यति ॥ २१ ॥

दक्ष उवाच

एतन्मखेशाय सुवर्णपात्रे हविः समस्तं विधिमन्त्रपूतम् ।
विष्णोर्नयाम्यप्रतिमस्य भागं प्रभुर्विभुश्चाहवनीय एषः ॥ २२ ॥

देव्युवाच

किं नाम दानं नियमं तपो वा कुर्यामहं येन पतिर्ममाद्य ।
लभेत भागं भगवानचिन्त्यो ह्यर्धं तथा भागमथो तृतीयम् ॥ २३ ॥

एवं ब्रुवाणां भगवान् स पत्नीं प्रहृष्टरूपः क्षुभितामुवाच ।
न वेत्सि मां देवि कृशोदराङ्गि किं नाम युक्तं वचनं मखेशे ॥ २४ ॥

अहं विजानामि विशालनेत्रे ध्यानेन हीना न विदन्त्यसन्तः ।
तवाद्य मोहेन च सेन्द्रदेवा लोकास्त्रयः सर्वत एव मूढाः ॥ २५ ॥

मामध्वरे शंसितारः स्तुवन्ति रथन्तरं सामगाश्चोपगान्ति ।
मां ब्राह्मणा ब्रह्मविदो यजन्ते ममाध्वर्यवः कल्पयन्ते च भागम् ॥ २६ ॥

सुप्राकृतोऽपि पुरुषः सर्वः स्त्रीजनसंसदि ।
स्तौति गर्वायते चापि स्वमात्मानं न संशयः ॥ २७ ॥

श्रीभगवानुवाच

नात्मानं स्तौमि देवेशि पश्य मे तनुमध्यमे ।
यं स्रक्ष्यामि वरारोहे यागार्थे वरवर्णिनि ॥ २८ ॥

इत्युक्त्वा भगवान् पत्नीमुमां प्राणैरपि प्रियाम् ।
सोऽसृजद् भगवान् वक्त्राद् भूतं घोरं प्रहर्षणम् ॥ २९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तमुवाचाक्षिप मखं दक्षस्येति महेश्वरः ।
ततो वक्त्राद् विमुक्तेन सिंहेनैकेन लीलया ॥ ३० ॥

देव्या मन्युव्यपोहार्थं हतो दक्षस्य वै क्रतुः ।
मन्युना च महाभीमा महाकाली महेश्वरी ॥ ३१ ॥

आत्मनः कर्मसाक्षित्वे तेन सार्धं सहानुगा ।
देवस्यानुमतं मत्वा प्रणम्य शिरसा ततः ॥ ३२ ॥

आत्मनः सदृशः शौर्याद् बलरूपसमन्वितः ।
स एव भगवान् क्रोधः प्रतिरूपसमन्वितः ॥ ३३ ॥

अनन्तबलवीर्यश्च अनन्तबलपौरुषः ।
वीरभद्र इति ख्यातो देव्या मन्युप्रमार्जकः ॥ ३४ ॥

सोऽसृजद्रोमकूपेभ्यो रौम्यान् नाम गणेश्वरान् ।
रुद्रतुल्या गणा रौद्रा रुद्रवीर्यपराक्रमाः ॥ ३५ ॥

ते निपेतुस्ततस्तूर्णं दक्षयज्ञविहिंसया ।
भीमरूपा महाकायाः शतशोऽथ सहस्रशः ॥ ३६ ॥

ततः किलकिलाशब्दैराकाशं पूरयन्निव ।
तेन शब्देन महता त्रस्तास्तत्र दिवौकसः ॥ ३७ ॥

पर्वताश्च व्यशीर्यन्त चकम्पे च वसुंधरा ।
मारुताश्चैव घूर्णन्ते चुक्षुभे वरुणालयः ॥ ३८ ॥

अग्नयो नैव दीप्यन्ते नैव दीप्यति भास्करः ।
ग्रहा नैव प्रकाशन्ते नक्षत्राणि न चन्द्रमाः ॥ ३९ ॥

ऋषयो न प्रकाशन्ते न देवा न च मानुषाः ।
एवं तु तिमिरीभूते निर्दहन्त्यपमानिताः ॥ ४० ॥

प्रहरन्त्यपरे घोरा यूपानुत्पाटयन्ति च ।
प्रमर्दन्ति तथा चान्ये विमर्दन्ति तथा परे ॥ ४१ ॥

आधावन्ति प्रधावन्ति वायुवेगा मनोजवाः ।
चूर्ण्यन्ते यज्ञपात्राणि दिव्यान्याभरणानि च ॥ ४२ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विशीर्यमाणा दृश्यन्ते तारा इव नभस्तले ।
दिव्यान्नपानभक्ष्याणां राशयः पर्वतोपमाः ।। ४३ ।।

क्षीरनद्योऽथ दृश्यन्ते घृतपायसकर्दमाः ।
दधिमण्डोदका दिव्याः खण्डशर्करवालुकाः ।। ४४ ।।

षड् रसान् निवहन्त्येता गुडकुल्या मनोरमाः ।
उच्चावचानि मांसानि भक्ष्याणि विविधानि च ।। ४५ ।।

पानकानि च दिव्यानि लेह्यचोष्याणि यानि च ।
भुञ्जते विविधैर्वक्त्रैर्विलुम्पन्त्याक्षिपन्ति च ।। ४६ ।।

रुद्रकोपान्महाकायाः कालाग्निसदृशोपमाः ।
क्षोभयन् सुरसैन्यानि भीषयन्तः समन्ततः ।। ४७ ।।

क्रीडन्ति विविधाकाराश्चिक्षिपुः सुरयोषितः ।
रुद्रक्रोधात् प्रयत्नेन सर्वदेवैः सुरक्षितम् ।। ४८ ।।

तं यज्ञमदहच्छीघ्रं रुद्रकर्मा समन्ततः ।
चकार भैरवं नादं सर्वभूतभयंकरम् ।। ४९ ।।

छित्त्वा शिरो वै यज्ञस्य ननाद च मुमोद च ।
ततो ब्रह्मादयो देवा दक्षश्चैव प्रजापतिः ।। ५० ।।

ऊचुः प्राञ्जलयः सर्वे कथ्यतां को भवानिति ।
नाहं रुद्रो न वा देवी नैव भोक्तुमिहागतः ।। ५१ ।।

देव्या मन्युकृतं मत्वा क्रुद्धः सर्वात्मकः प्रभुः ।
द्रष्टुं वा नैव विप्रेन्द्रान् नैव कौतूहलेन वा ।। ५२ ।।

तव यज्ञविघातार्थं सम्प्राप्तं विद्धि मामिह ।
वीरभद्र इति ख्यातो रुद्रकोपाद् विनिःसृतः ।। ५३ ।।

भद्रकालीति विख्याता देव्या कोपाद् विनिःसृता ।
प्रेषितौ देवदेवेन यज्ञान्तिकमिहागतौ ।। ५४ ।।

शरणं गच्छ विप्रेन्द्र देवदेवमुमापतिम् ।
वरं क्रोधोऽपि देवस्य वरदानं न चान्यतः ।। ५५ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वीरभद्रवचः श्रुत्वा दक्षो धर्मभृतां वरः ।
तोषयामास स्तोत्रेण प्रणिपत्य महेश्वरम् ॥ ५६ ॥

प्रपद्ये देवमीशानं शाश्वतं ध्रुवमव्ययम् ।
महादेवं महात्मानं विश्वस्य जगतां पतिम् ॥ ५७ ॥

प्राणापानौ संनिरुध्य वक्त्रस्थानेन यक्षता ।
विचार्य सर्वतो दृष्टिं बहुदृष्टिरमित्रजित् ॥ ५८ ॥

सहसा देवदेवेशो ह्यग्निकुण्डात् समुत्थितः ।
विभ्रत्सूर्यसहस्रस्य तेजः संवर्तकोपमः ॥ ५९ ॥

स्मितं कृत्वाब्रवीद् वाक्यं ब्रूहि किं करवाणि ते ।
श्राविते च मखाध्याये देवानां गुरुणा ततः ॥ ६० ॥

तमुवाचाञ्जलिं कृत्वा दक्षो देवं प्रजापतिः ।
भीतशङ्कितवित्रस्तः सवाष्पवदनेक्षणः ॥ ६१ ॥

यदि प्रसन्नो भगवान् यदि चाहं भवत्प्रियः ।
यदि वाहमनुग्राह्यो यदि वा वरदो मम ॥ ६२ ॥

यद् दग्धं भक्षितं पीतमशितं यच्च नाशितम् ।
चूर्णीकृतापविद्धं च यज्ञसम्भारमीदृशम् ॥ ६३ ॥

दीर्घकालेन महता प्रयत्नेन सुसंचितम् ।
तन्न मिथ्या भवेन्मह्यं वरमेतमहं वृणे ॥ ६४ ॥

तथास्त्वित्याह भगवान् भगनेत्रहरो हरः ।
धर्माध्यक्षो विरूपाक्षस्त्र्यक्षो देवः प्रजापतिः ॥ ६५ ॥

जानुभ्यामवनीं गत्वा दक्षो लब्ध्वा भवाद्वरम् ।
नाम्नामष्टसहस्रेण स्तुतवान् वृषभध्वजम् ॥ ६६ ॥

युधिष्ठिर उवाच

यैर्नामधेयैः स्तुतवान् दक्षो देवं प्रजापतिः ।
वक्तुमर्हसि मे तात श्रोतुं श्रद्धा ममानघ ॥ ६७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भीष्म उवाच

श्रूयतां देवदेवस्य नामान्यद्भुतकर्मणः ।
गूढव्रतस्य गुह्यानि प्रकाशानि च भारत ॥ ६८ ॥

नमस्ते देवदेवेश देवारिबलसूदन ।
देवेन्द्रबलविष्टम्भ देवदानवपूजित ॥ ६९ ॥

सहस्राक्ष विरूपाक्ष त्र्यक्ष यक्षाधिपप्रिय ।
सर्वतः पाणिपादान्त सर्वतोऽक्षिशिरोमुख ॥ ७० ॥

सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठसि ।
शङ्कुकर्ण महाकर्ण कुम्भकर्णार्णवालय ॥ ७१ ॥

गजेन्द्रकर्ण गोकर्ण पाणिकर्ण नमोऽस्तु ते ।
शतोदर शतावर्त शतजिह्व नमोऽस्तु ते ॥ ७२ ॥

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणं त्वा शतक्रतुमूर्ध्वं खमिव मेनिरे ॥ ७३ ॥

मूर्तौ हि ते महामूर्ते समुद्राम्बरसंनिभ ।
सर्वा वै देवता ह्यस्मिन् गावो गोष्ठ इवासते ॥ ७४ ॥

भवच्छरीरे पश्यामि सोममग्निं जलेश्वरम् ।
आदित्यमथ वै विष्णुं ब्रह्माणं च बृहस्पतिम् ॥ ७५ ॥

भगवान् कारणं कार्यं क्रिया करणमेव च ।
असतश्च सतश्चैव तथैव प्रभवाप्ययौ ॥ ७६ ॥

नमो भवाय शर्वाय रुद्राय वरदाय च ।
पशूनां पतये नित्यं नमोऽस्त्वन्धकघातिने ॥ ७७ ॥

त्रिजटाय त्रिशीर्षाय त्रिशूलवरपाणिने ।
त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः ॥ ७८ ॥

नमश्चण्डाय कुण्डाय अण्डायाण्डधराय च ।
दण्डिने समकर्णाय दण्डिमुण्डाय वै नमः ॥ ७९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नमोर्ध्वदंष्ट्रकेशाय शुक्लायावतताय च ।
विलोहिताय धूम्राय नीलग्रीवाय वै नमः ॥ ८० ॥

नमोऽस्त्वप्रतिरूपाय विरूपाय शिवाय च ।
सूर्याय सूर्यमालाय सूर्यध्वजपताकिने ॥ ८१ ॥

नमः प्रमथनाथाय वृषस्कन्धाय धन्विने ।
शत्रुंदमाय दण्डाय पर्णचीरपटाय च ॥ ८२ ॥

नमो हिरण्यगर्भाय हिरण्यकवचाय च ।
हिरण्यकृतचूडाय हिरण्यपतये नमः ॥ ८३ ॥

नमः स्तुताय स्तुत्याय स्तूयमानाय वै नमः ।
सर्वाय सर्वभक्षाय सर्वभूतान्तरात्मने ॥ ८४ ॥

नमो होत्रेऽथ मन्त्राय शुक्लध्वजपताकिने ।
नमो नाभाय नाभ्याय नमः कटकटाय च ॥ ८५ ॥

नमोऽस्तु कृशनासाय कृशाङ्गाय कृशाय च ।
संहृष्टाय विहृष्टाय नमः किलकिलाय च ॥ ८६ ॥

नमोऽस्तु शयमानाय शयितायोत्थिताय च ।
स्थिताय धावमानाय मुण्डाय जटिलाय च ॥ ८७ ॥

नमो नर्तनशीलाय मुखवादित्रवादिने ।
नाद्योपहारलुब्धाय गीतवादित्रशालिने ॥ ८८ ॥

नमो ज्येष्ठाय श्रेष्ठाय बलप्रमथनाय च ।
कालनाथाय कल्याय क्षयायोपक्षयाय च ॥ ८९ ॥

भीमदुन्दुभिहासाय भीमव्रतधराय च ।
उग्राय च नमो नित्यं नमोऽस्तु दशबाहवे ॥ ९० ॥

नमः कपालहस्ताय चितिभस्मप्रियाय च ।
विभीषणाय भीष्माय भीमव्रतधराय च ॥ ९१ ॥

नमो विकृतवक्त्राय खड्गजिह्वाय दंष्ट्रिणे ।
पक्वाममांसलुब्धाय तुम्बीवीणाप्रियाय च ॥ ९२ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नमो वृषाय वृष्याय गोवृषाय वृषाय च।
कटंकटाय दण्डाय नमः पचपचाय च॥ ९३॥

नमः सर्ववरिष्ठाय वराय वरदाय च।
वरमाल्यगन्धवस्त्राय वरातिवरदे नमः॥ ९४॥

नमो रक्तविरक्ताय भावनायाक्षमालिने।
सम्भिन्नाय विभिन्नाय छायायातपनाय च॥ ९५॥

अघोरघोररूपाय घोरघोरतराय च।
नमः शिवाय शान्ताय नमः शान्ततमाय च॥ ९६॥

एकपाद्बहुनेत्राय एकशीर्ष्णे नमोऽस्तु ते।
रुद्राय क्षुद्रलुब्धाय संविभागप्रियाय च॥ ९७॥

पञ्चालाय सिताङ्गाय नमः शमशमाय च।
नमश्चण्डिकघण्टाय घण्टायाघण्टघण्टिने॥ ९८॥

सहस्राध्मातघण्टाय घण्टामालाप्रियाय च।
प्राणघण्टाय गन्धाय नमः कलकलाय च॥ ९९॥

हूं हूं हूंकारपाराय हूं हूंकारप्रियाय च।
नमः शमशमे नित्यं गिरिवृक्षालयाय च॥ १००॥

गर्भमांसमृगालाय तारकाय तराय च।
नमो यज्ञाय यजिने हुताय प्रहुताय च॥ १०१॥

यज्ञवाहाय दान्ताय तप्यायातपनाय च।
नमस्तटाय तट्याय तटानां पतये नमः॥ १०२॥

अन्नदायान्नपतये नमस्त्वन्नभुजे तथा।
नमः सहस्रशीर्षाय सहस्रचरणाय च॥ १०३॥

सहस्रोद्यतशूलाय सहस्रनयनाय च।
नमो बालार्कवर्णाय बालरूपधराय च॥ १०४॥

बालानुचरगोप्ताय बालक्रीडनकाय च।
नमो वृद्धाय लुब्धाय क्षुब्धाय क्षोभणाय च॥ १०५॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तरङ्गाङ्कितकेशाय मुञ्जकेशाय वै नमः ।
नमः षट्कर्मतुष्टाय त्रिंकर्मनिरताय च ॥ १०६ ॥

वर्णाश्रमाणां व्रिधिवत् पृथक्कर्मनिवर्तिने ।
नमो घुष्याय घोषाय नमः कलकलाय च ॥ १०७ ॥

श्वेतपिङ्गलनेत्राय कृष्णरक्तेक्षणाय च ।
प्राणभग्नाय दण्डाय स्फोटनाय कृशाय च ॥ १०८ ॥

धर्मकामार्थमोक्षाणां कथनीयकथाय च ।
सांख्याय सांख्यमुख्याय सांख्ययोगप्रवर्तिने ॥ १०९ ॥

नमो रथ्यविरथ्याय चतुष्पथरथाय च ।
कृष्णाजिनोत्तरीयाय व्यालयज्ञोपवीतिने ॥ ११० ॥

ईशान वज्रसंघात हरिकेश नमोऽस्तु ते ।
त्र्यम्बकाम्बिकनाथाय व्यक्ताव्यक्त नमोऽस्तु ते ॥ १११ ॥

काम कामद कामघ्न तृप्तातृप्तविचारिणे ।
सर्व सर्वद सर्वघ्न संध्याराम नमोऽस्तु ते ॥ ११२ ॥

महाबल महाबाहो महासत्त्व महाद्युते ।
महामेघचयप्रख्य महाकाल नमोऽस्तु ते ॥ ११३ ॥

स्थूलजीर्णाङ्गजटिले बल्कलाजिनधारिणे ।
दीप्तसूर्याग्निजटिले वल्कलाजिनवाससे ।
सहस्रसूर्यप्रतिम तपोनित्य नमोऽस्तु ते ॥ ११४ ॥

उन्मादन शतावर्त गङ्गातोयार्द्रमूर्धज ।
चन्द्रावर्त युगावर्त मेघावर्त नमोऽस्तु ते ॥ ११५ ॥

त्वमन्नमन्नभोक्ता च अन्नदोऽन्नभुगेव च ।
अन्नस्रष्टा च पक्ता च पक्वभुक्पवनोऽबलः ॥ ११६ ॥

जरायुजाण्डजाश्चैव स्वेदजाश्च तथोद्भिजाः ।
त्वमेव देवदेवेश भूतग्रामश्चतुर्विधः ॥ ११७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

चराचरस्य स्रष्टा त्वं प्रतिहर्ता तथैव च।
त्वामाहुर्ब्रह्मविदुषो ब्रह्म ब्रह्मविदां वर ॥ ११८ ॥

मनसः परमा योनिः खं वायुर्ज्योतिषां निधिः।
ऋक्सामानि तथोङ्कारमाहुस्त्वां ब्रह्मवादिनः ॥ ११९ ॥

हायिहायिध्रुवाहायिहावुहायि तथासकृत्।
गायन्ति त्वां सुरश्रेष्ठ सामगा ब्रह्मवादिनः ॥ १२० ॥

यजुर्मयो ऋङ्मयश्च त्वमाहुतिमयस्तथा।
पठ्यसे स्तुतिभिश्चैव वेदोपनिषदां गणैः ॥ १२१ ॥

ब्राह्मणाः क्षत्रियाः वैश्याः शूद्रा वर्णावराश्च ये।
त्वमेव मेघसंघाश्च विद्युत्स्तनितगर्जितः ॥ १२२ ॥

संवत्सरस्त्वमृतवो मासो मासार्धमेव च।
युगं निमेषाःकाष्ठास्त्वं नक्षत्राणि ग्रहः कलाः ॥ १२३ ॥

वृक्षाणां ककुदोऽसि त्वं गिरीणां शिखराणि च।
व्याघ्रो मृगाणां पततां तार्क्ष्योऽनन्तश्च भोगिनाम् ॥ १२४ ॥

क्षीरोदो ह्युदधीनां च यन्त्राणां धनुरेव च।
वज्रः प्रहरणानां च व्रतानां सत्यमेव च ॥ १२५ ॥

त्वमेव द्वेष इच्छा च रागो मोहः क्षमाक्षमे।
व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ ॥ १२६ ॥

त्वं गदी त्वं शरी चापी खट्वाङ्गी झर्झरी तथा।
छेत्ता भेत्ता प्रहर्ता त्वं नेता मन्ता पिता मतः ॥ १२७ ॥

दशलक्षणसंयुक्तो धर्मोऽर्थः काम एव च।
गङ्गा समुद्राः सरितः पल्वलानि सरांसि च ॥ १२८ ॥

लता वल्ल्यस्तृणौषध्यः पशवो मृगपक्षिणः।
द्रव्यकर्मसमारम्भः कालः पुष्पफलप्रदः ॥ १२९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आदिश्चान्तश्च देवानां गायत्र्योंकार एव च ।
हरितो रोहितो नीलः कृष्णो रक्तस्तथारुणः ।
कद्रुश्च कपिलश्चैव कपोतो मेघकस्तथा ॥ १३० ॥

अवर्णश्च सुवर्णश्च वर्णकारो घनोपमः ।
सुवर्णनामा च तथा सुवर्णप्रिय एव च ॥ १३१ ॥

त्वमिन्द्रश्च यमश्चैव वरुणो धनदोऽनलः ।
उपप्लवश्चित्रभानुः स्वर्भानुर्भानुरेव च ॥ १३२ ॥

क्षेत्रं होता च होम्यं च हुतं चैव तथा प्रभुः ।
त्रिसौपर्णं तथा ब्रह्म यजुषां शतरुद्रियम् ॥ १३३ ॥

पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम् ।
गिरिको हिंडुको वृक्षो जीवः पुद्गल एव च ॥ १३४ ॥

प्राणः सत्वं रजश्चैव तमश्चाप्रमदस्तथा ।
प्राणोऽपानः समानश्च उदानो व्यान एव च ॥ १३५ ॥

उन्मेषश्च निमेषश्च क्षुतं जृम्भितमेव च ।
लोहितान्तर्गता दृष्टिर्महावक्त्रो महोदरः ॥ १३६ ॥

सूचीरोमा हरिश्मश्रुरूर्ध्वकेशश्चलाचलः ।
गीतवादित्रतत्त्वज्ञो गीतवादनकप्रियः ॥ १३७ ॥

मत्स्यो जलचरो जाल्योऽकलः केलिकलः कलिः ।
अकालश्चातिकालश्च दुष्कालः काल एव च ॥ १३८ ॥

मृत्युः क्षुरश्च कृत्यश्च पक्षोऽपक्षक्षयंकरः ।
मेघकालो महादंष्ट्रः संवर्तकवलाहकः ॥ १३९ ॥

घण्टोऽघण्टो घटी घण्टी चरुचेली मिलीमिली ।
ब्रह्मकायिकमग्नीनां दण्डी मुण्डस्त्रिदण्डधृक् ॥ १४० ॥

चतुर्युगश्चतुर्वेदश्चातुर्होत्रप्रवर्तकः ।
चातुराश्रम्यनेता च चातुर्वर्ण्यकरश्च यः ॥ १४१ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सदा चाक्षप्रियो धूर्तो गणाध्यक्षो गणाधिपः ।
रक्तमाल्याम्बरधरो गिरिशो गिरिकप्रियः ॥ १४२ ॥

शिल्पिकः शिल्पिनां श्रेष्ठः सर्वशिल्पप्रवर्तकः ।
भगनेत्राङ्कुशश्चण्डः पूष्णो दन्तविनाशनः ॥ १४३ ॥

स्वाहा स्वधा वषट्कारो नमस्कारो नमो नमः ।
गूढव्रतो गुह्यतपास्तारकस्तारकामयः ॥ १४४ ॥

धाता विधाता संधाता विधाता धारणोऽधरः ।
ब्रह्मा तपश्च सत्यं च ब्रह्मचर्यमथार्जवम् ॥ १४५ ॥

भूतात्मा भूतकृद्भूतो भूतभव्यभवोद्भवः ।
भूर्भुवः स्वरितश्चैव ध्रुवो दान्तो महेश्वरः ॥ १४६ ॥

दीक्षितोऽदीक्षितः क्षान्तो दुर्दान्तोऽदान्तनाशनः ।
चन्द्रावर्तो युगावर्तः संवर्तः सम्प्रवर्तकः ॥ १४७ ॥

कामो बिन्दुरणुः स्थूलः कर्णिकारस्त्रजप्रियः ।
नन्दीमुखो भीममुखः सुमुखो दुर्मुखोऽमुखः ॥ १४८ ॥

चतुर्मुखो बहुमुखो रथेष्वग्निमुखस्तथा ।
हिरण्यगर्भः शकुनिर्महोरगपतिर्विराट् ॥ १४९ ॥

अधर्महा महापार्श्वश्चण्डधारो गणाधिपः ।
गोनर्दो गोप्रताश्च गोवृषेश्वरवाहनः ॥ १५० ॥

त्रैलोक्यगोप्ता गोविंदो गोमार्गोऽमार्ग एव च ।
श्रेष्ठःस्थिरश्च स्थाणुश्च निष्कम्पः कम्प एव च ॥ १५१ ॥

दुर्वारणो दुर्विषहो दुःसहो दुरतिक्रमः ।
दुर्धर्षो दुष्प्रकंपश्च दुर्विषो दुर्जयो जयः ॥ १५२ ॥

शशः शशाङ्कः शमनः शीतोष्णक्षुज्जराधिकृत् ।
आधयो व्याधयश्चैव व्याधिहा व्याधिरेव च ॥ १५३ ॥

मम यज्ञमृगव्याधो व्याधीनामागमो शमः ।
शिखण्डी पुण्डरीकाक्षः पुण्डरीकवनालयः ॥ १५४ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दण्डधारस्त्र्यम्बकश्च उग्रदण्डोऽण्डनाशनः ।
विषाग्निपाः सुरश्रेष्ठः सोमपास्त्वं मरुत्पतिः ।। १५५ ।।

अमृतपास्त्वं जगन्नाथं देवदेव गणेश्वर ।
विषाग्निपा मृत्युपाश्च क्षीरपाः सोमपास्तथाः ।
मधुश्च्युतानामग्रपास्त्वमेव तुषिताद्यपाः ।। १५६ ।।

हिरण्यरेताः पुरुषस्त्वमेव
त्वं स्त्रीपुमांस्त्वं च नपुंसकं च ।
बालो युवा स्थविरो जीर्णदंष्ट्र-
स्त्वं नागेन्द्र शक्रस्त्वं विश्वकृद्विश्वकर्ता ।।१५७ ।।

विश्वकृद् विश्वकृतां वरेण्यस्त्वं विश्ववाहो
विश्वरूपस्तेजस्वी विश्वतोमुखः ।
चन्द्रादित्यौ चक्षुषी ते हृदयं च पितामहः ।। १५८ ।।

महोदधिः सरस्वती वाग् बलमनलोऽनिलःअहोरात्रं-
निमेषोन्मेषकर्म ।।१५९ ।।

न ब्रह्मा न च गोविन्दः पौराणा ऋषयो न ते ।
माहात्म्यं वेदितुं शक्ता याथातथ्येन ते शिव ।। १६० ।।

या मूर्तयः सुसूक्ष्मास्ते न मह्यं यान्ति दर्शनम् ।
शाधि मां सततं रक्ष पिता पुत्रमिवौरसम् ।। १६१ ।।

रक्ष मां रक्षणीयोऽहं तवानघ नमोऽस्तु ते ।
भक्तानुकम्पी भगवान् भक्तश्चाहं सदा त्वयि ।। १६२ ।।

यः सहस्राण्यनेकानि पुंसामावृत्य दुर्दृशः ।
तिष्ठत्येकः समुद्रान्ते स मे गोप्तास्तु नित्यशः ।। १६३ ।।

यं विनिद्रा जितश्वासाः सत्त्वस्थाः संयतेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ।। १६४ ।।

जटिले दण्डिने नित्यं लम्बोदरशरीरिणे ।
कमण्डलुनिषङ्गाय तस्मै ब्रह्मात्मने नमः ।। १६५ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यस्य केशेषु जीमूता नद्यः सर्वाङ्गसंधिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ।। १६६ ।।

सम्भक्ष्य सर्वभूतानि युगान्ते पर्युपस्थिते ।
यः शेते जलमध्यस्थस्तं प्रपद्येऽम्बुशायिनम् ।। १६७ ।।

प्रविश्य वदनं राहोर्यः सोमं पिबते निशि ।
ग्रसत्यर्कं च स्वर्भानुर्भूत्वा मां सोऽभिरक्षतु ।। १६८ ।।

ये चानुपतिता गर्भा यथा भागानुपासते ।
नमस्तेभ्यः स्वधा स्वाहा प्राप्नुवन्तु मुदन्तु ते ।। १६९ ।।

येऽङ्गुष्ठमात्राः पुरुषा देहस्थाः सर्वदेहिनाम् ।
रक्षन्तु ते हि मां नित्यं नित्यं चाप्याययन्तु माम् ।। १७० ।।

ये न रोदन्ति देहस्था देहिनो रोदयन्ति च ।
हर्षयन्ति न हृष्यन्ति नमस्तेभ्येऽस्तु नित्यशः ।। १७१ ।।

ये नदीषु समुद्रेषु पर्वतेषु गुहासु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारे गहनेषु च ।। १७२ ।।

चतुष्पथेषु रथ्यासु चत्वरेषु तटेषु च ।
हस्त्यश्वरथशालासु जीर्णोद्यानालयेषु च ।। १७३ ।।

येषु पञ्चसु भूतेषु दिशासु विदिशासु च ।
चन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु ।। १७४ ।।

रसातलगता ये च ये च तस्मै परं गताः ।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्योऽस्तु नित्यशः ।। १७५ ।।

येषां न विद्यते संख्या प्रमाणं रूपमेव च ।
असंख्येयगुणा रुद्रा नमस्तेभ्योऽस्तु नित्यशः ।। १७६ ।।

सर्वभूतकरो यस्मात् सर्वभूतपतिर्हरः ।
सर्वभूतान्तरात्मा च तेन त्वं न निमन्त्रितः ।। १७७ ।।

त्वमेव हीज्यसे यस्माद् यज्ञैर्विविधदक्षिणैः ।
त्वमेव कर्ता सर्वस्य तेन त्वं न निमन्त्रितः ।। १७८ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अथवा मायया देव सूक्ष्मया तव मोहितः ।
एतस्मात् कारणाद् वापि तेन त्वं न निमन्त्रितः ॥ १७९ ॥

प्रसीद मम भद्रं ते भव भावगतस्य मे ।
त्वयि मे हृदयं देव त्वयि बुद्धिर्मनस्त्वयि ॥ १८० ॥

स्तुत्वैवं स महादेवं विरराम प्रजापतिः ।
भगवानपि सुप्रीतः पुनर्दक्षमभाषत ॥ १८१ ॥

परितुष्टोऽस्मि ते दक्ष स्तवेनानेन सुव्रत ।
बहुनात्र किमुक्तेन मत्समीपे भविष्यसि ॥ १८२ ॥

अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
प्रजापते मत्प्रसादात् फलभागी भविष्यसि ॥ १८३ ॥

अथैनमब्रवीद् वाक्यं लोकस्याधिपतिर्भवः ।
आश्वासनकरं वाक्यं वाक्यविद्वाक्यसम्मतम् ॥ १८४ ॥

दक्ष दक्ष न कर्तव्यो मन्युर्विघ्नमिमं प्रति ।
अहं यज्ञहरस्तुभ्यं दृष्टमेतत् पुरातनम् ॥ १८५ ॥

भूयश्च ते वरं दद्मि तं त्वं गृह्णीष्व सुव्रत ।
प्रसन्नवदनो भूत्वा तदिहैकमनाः श्रृणु ॥ १८६ ॥

वेदात् षडङ्गादुद्धृत्य सांख्ययोगाच्च युक्तितः ।
तपः सुतप्तं विपुलं दुश्चरं देवदानवैः ॥ १८७ ॥

अपूर्वं सर्वतोभद्रं सर्वतोमुखमव्ययम् ।
अब्दैर्दशाहसंयुक्तं गूढमप्राज्ञनिन्दितम् ॥ १८८ ॥

वर्णाश्रमकृतैर्धर्मैर्विपरीतं क्वचित्समम् ।
गतान्तैरध्यवसितमत्याश्रममिदं व्रतम् ॥ १८९ ॥

मया पाशुपतं दक्ष शुभमुत्पादितं पुरा ।
तस्य चीर्णस्य तत् सम्यक् फलं भवति पुष्कलम् ।
तच्चास्तु ते महाभाग त्यज्यतां मानसो ज्वरः ॥ १९० ॥

एवमुक्त्वा महादेवः सपत्नीकः सहानुगः ।
अदर्शनमनुप्राप्तो दक्षस्यामितविक्रमः ॥ १९१ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दक्षप्रोक्तं स्तवमिमं कीर्तयेद् यः शृणोति वा।
नाशुभं प्राप्नुयात् किंचिद् दीर्घमायुरवाप्नुयात्॥ १९२॥

यथा सर्वेषु देवेषु वरिष्ठो भगवाञ्छिवः।
तथा स्तवो वरिष्ठोऽयं स्तवानां ब्रह्मसम्मितः॥ १९३॥

यशोराज्यसुखैश्वर्यकामार्थधनकांक्षिभिः।
स्तोतव्यो भक्तिमास्थाय विद्याकामैश्च यत्नतः॥ १९४॥

व्याधितो दुःखितो दीनश्चोरग्रस्तो भयार्दितः।
राजकार्याभियुक्तो वा मुच्यते महतो भयात्॥ १९५॥

अनेनैव तु देहेन गणानां समतां व्रजेत्।
तेजसा यशसा चैव युक्तो भवति निर्मलः॥ १९६॥

न राक्षसाः पिशाचा वा न भूता न विनायकाः।
विघ्नं कुर्युर्गृहे तस्य यत्रायं पठ्यते स्तवः॥ १९७॥

शृणुयाच्चैव या नारी तद्भक्ता ब्रह्मचारिणी।
पितृपक्षे भर्तृपक्षे पूज्या भवति देववत्॥ १९८॥

शृणुयाद् यः स्तवं कृत्स्नं कीर्तयेद् वा समाहितः।
तस्य सर्वाणि कर्माणि सिद्धिं गच्छन्त्यभीक्ष्णशः॥ १९९॥

मनसा चिन्तितं यच्च यच्च वाचानुकीर्तितम्।
सर्वं सम्पद्यते तस्य स्तवस्यास्यानुकीर्तनात्॥ २००॥

देवस्य च गृहस्यापि देव्या नन्दीश्वरस्य च।
बलिं सुविहितं कृत्वा दमेन नियमेन च॥ २०१॥

ततस्तु युक्तो गृह्णीयान्नामान्याशु यथाक्रमम्।
ईप्सिताँल्लभते सोऽर्थान् भोगान् कामांश्च मानवः॥ २०२॥

मृतश्च स्वर्गमाप्नोति तिर्यक्षु च न जायते।
इत्याह भगवान् व्यासः पराशरसुतः प्रभुः॥ २०३॥

इति श्रीमहाभारते शान्तिपर्वणि मोक्षधर्मपर्वणि दक्षप्रोक्तशिवसहस्रनामस्तवे
चतुरशीत्यधिकद्विशततमोऽध्यायः॥२८४॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

VERSION-6

वायुमहापुराणे

सूत उवाच ॥

ब्रह्मणः सृजतः पुत्रान् पूर्वे स्वायम्भुवेऽन्तरे ।
अम्भांसि जज्ञिरे तानि मनुष्यासुरदेवताः ॥ १ ॥

पितृवन्मन्यमानस्य जज्ञिरे पितरोऽस्य वै ।
तेषान्निसर्गः प्रागुक्तो विस्तरस्तस्य वक्ष्यते ॥ २ ॥

देवासुरमनुष्याणां दृष्ट्वा देवोऽभ्यभाषत ।
पितृवन्मन्यमानस्य जज्ञिरे वोपयक्षिताः ॥ ३ ॥

मध्वादयः षड्तवस्तान् पितृन् परिचक्षते ।
ऋतवः पितरो देवा इत्येषा वैदिकी श्रुतिः ॥ ४ ॥

मन्वन्तरेषु सर्वेषु ह्यतीतानागतेष्वपि ।
एते स्वायम्भुवे पूर्वमुत्पन्ना ह्यन्तरे शुभे ॥ ५ ॥

अग्निष्वात्ताः स्मृता नाम्ना तथा बर्हिषदश्च वै ।
अयज्वानस्तथा तेषामासन् वै गृहमेधिनः ।
अग्निष्वात्ताः स्मृतास्ते वै पितरोऽनाहिताग्नयः ॥ ६ ॥

यज्वानस्तेषु ये ह्यासन् पितरः सोमपीथिनः ।
स्मृता बर्हिषदस्ते वै पितरस्त्वग्निहोत्रिणः ।
ऋतवः पितरो देवाः शास्त्रेऽस्मिन्निश्चयो मंतः ॥ ७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मधुमाधवौ रसौ ज्ञेयो शुचिशुक्रौ तु शुष्मिणौ ।
नभश्चैव नभस्यश्च जीवावेतावुदाहृतौ ॥ ८ ॥

इषश्चैव तथोर्जश्च सुधावन्तावुदाहृतौ ।
सहश्चैव सहस्यश्च मन्युमन्तौ तु तौ स्मृतौ ।
तपश्चैव तपस्यश्च घोरावेतौ तु शैशिरौ ॥ ९ ॥

कालावस्थास्तु षट् तेषाम्मासाख्या वै व्यवस्थिताः ।
त इमे ऋतवः प्रोक्ताश्चेतनाचेतनास्तु वै ॥ १० ॥

ऋतवो ब्रह्मणः पुत्रा विज्ञेयास्तेऽभिमानिनः ।
मासार्द्धमासस्थानेषु स्थानञ्च ऋतवोर्तवाः ॥ ११ ॥

स्थानानां व्यतिरेकेण ज्ञेयाः स्थानाभिमानिनः ।
अहोरात्रश्च मासाश्च ऋतवश्चायनानि च ॥ १२ ॥

संवत्सराश्च स्थानानि कालावस्थाभिमानिनः ।
निमेषाश्च कलाः काष्ठा मुहूर्ता वै दिनक्षपाः ॥ १३ ॥

एतेषु स्थानिनो ये तु कालावस्थास्ववस्थिताः ।
तन्मयत्वात्तदात्मानस्तान् वक्ष्यामि निबोधत ॥ १४ ॥

पर्व्वण्यास्तिथयः सन्ध्याः पक्षा मासार्द्धसंज्ञिताः ।
द्वावर्द्धमासौ मासस्तु द्वौ मासावृतुरुच्यते ॥ १५ ॥

ऋतुत्रयं चायनं द्वे अयने दक्षिणोत्तरे ।
संवत्सरः सुमेकस्तु स्थानान्येतानि स्थानिनाम् ॥ १६ ॥

ऋतवः सुमेकपुत्रा विज्ञेया ह्यष्टधा तु षट् ।
ऋतुपुत्राः स्मृताः पञ्च प्रजास्त्वार्तवलक्षणाः ॥ १७ ॥

यस्माच्चैवार्तवेयास्तु जायन्ते स्थाणुजङ्गमाः ।
आर्तवाः पितरश्चैव ऋतवश्च पितामहाः ॥ १८ ॥

सुमेकात्तु प्रसूयन्ते म्रियन्ते च प्रजातयः ।
तस्मात् स्मृतः प्रजानां वै सुमेकः प्रपितामहः ॥ १९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्थानेषु स्थानिनो ह्येते स्थानात्मानः प्रकीर्तिताः ।
तदाख्यास्तन्मयत्वाच्च तदात्मानश्च ते स्मृताः ॥ २० ॥

प्रजापतिः स्मृतो यस्तु स तु संवत्सरो मतः ।
संवत्सरः स्मृतो ह्यग्निः ऋतमित्युच्यते द्विजैः ॥ २१ ॥

ऋतात्तु ऋतवो यस्माज्जज्ञिरे ऋतवस्ततः ।
मासाः षड्ऋतवो ज्ञेयास्तेषां पञ्चार्तवाः सुताः ॥ २२ ॥

द्विपदाश्चतुष्पदाश्चैव पक्षिसंसर्पतामपि ।
स्थावराणां च पञ्चानां पुष्पं कालार्तवं स्मृतम् ॥ २३ ॥

ऋतुत्वमार्तवत्वञ्च पितृत्वञ्च प्रकीर्तितम् ।
इत्येते पितरो ज्ञेया ऋतवश्चार्तवाश्च ये ॥ २४ ॥

सर्वभूतानि तेभ्योऽथ ऋतुकालाद्विजज्ञिरे ।
तस्मादेतेऽपि पितर आर्तवा इति नः श्रुतम् ॥ २५ ॥

मन्वन्तरेषु सर्वेषु स्थिताः कालाभिमानिनः ।
स्थानाभिमानिनो ह्येते तिष्ठन्तीह प्रसंयमात् ॥ २६ ॥

अग्निष्वात्ता बर्हिषदः पितरो द्विविधाः स्मृताः ।
जज्ञाते च पितृभ्यस्तु द्वे कन्ये लोकविश्रुते ॥ २७ ॥

मेना च धारिणी चैव याभ्यां विश्वमिदं धृतम् ।
पितरस्ते निजे कन्ये धर्मार्थं प्रददुः शुभे ।
त उभे ब्रह्मवादिन्यौ योगिन्यौ चैव ते उभे ॥ २८ ॥

अग्निष्वात्तास्तु ये प्रोक्तास्तेषां मेना तु मानसी ।
धारणी मानसी चैव कन्या बर्हिषदां स्मृता ॥ २९ ॥

मेरोस्तु धारणीं नाम पत्न्यर्थं व्यसृजन् शुभाम् ।
पितरस्ते बर्हिषदः स्मृता ये सोमपीथिनः ॥ ३० ॥

अग्निष्वात्तास्तु तां मेनां पत्नीं हिमवते ददुः ।
स्मृतास्ते वै तु दौहित्रास्तद्दौहित्रान् निबोधत ॥ ३१ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मेना हिमवतः पत्नी मैनाकं सान्वसूयत ।
गङ्गा सरिद्वरा चैव पत्नी या लवणोदधेः ।
मैनाकस्यानुजः क्रौञ्चः क्रौञ्चद्वीपो यतः स्मृतः ॥ ३२ ॥

मेरोस्तु धारणी पत्नी दिव्यौषधिसमन्वितम् ।
मन्दरं सुषुवे पुत्रं तिस्रः कन्याश्च विश्रुताः ॥ ३३ ॥

वेला च नियतिश्चैव तृतीया चायतिः पुनः ।
धातुश्चैवायतिः पत्नी विधातुर्नियतिः स्मृता ॥ ३४ ॥

स्वायम्भुवेऽन्तरे पूर्वन्तयोर्वै कीर्तिताः प्रजाः ।
सुषुवे सागराद्वेला कन्यामेकामनिन्दिताम् ॥ ३५ ॥

सावर्णिना च सामुद्री पत्नी प्राचीनबर्हिषः ।
सवर्णा साथ सामुद्री दशप्राचीनबर्हिषः ।
सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः ॥ ३६ ॥

तेषां स्वायम्भुवो दक्षः पुत्रत्वे जज्ञिवान् प्रभुः ।
त्रयम्बकस्याभिशापेन चाक्षुषस्यान्तरे मनोः ॥ ३७ ॥

एतच्छ्रुत्वा ततः सूतमपृच्छच्छांशपायनः ।
उत्पन्नः स कथं दक्षो ह्यभिशापाद्भवस्य तु ।
चाक्षुषस्यान्वये पूर्वं तन्नः प्रब्रूहि पृच्छताम् ॥ ३८ ॥

इत्युक्तः कथयामास सूतो दक्षाश्रितां कथाम् ।
शांशपायनमामन्त्र्य त्रयम्बकाच्छापकारणम् ॥ ३९ ॥

दक्षस्यासन् सुता ह्यष्टौ कन्या याः कीर्तिता मया ।
स्वेभ्यो गृहेभ्यो ह्यानाय्य ताः पिताभ्यर्चयद्गृहे ।
ततस्त्वभ्यर्चिताः सर्वा न्यवसंस्ताः पितुर्गृहे ॥ ४० ॥

तासां ज्येष्ठा सती नाम पत्नी या त्र्यम्बकस्य वै ।
नाजुहावात्मजां तां वै दक्षो रुद्रमभिद्विषन् ॥ ४१ ॥

अकरोत्स नतिं दक्षे न कदाचिन्महेश्वरः ।
जामाता श्वशुरे तस्मिन् स्वभावात् तेजसि स्थितः ॥ ४२ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ततो ज्ञात्वा सती सर्वाः स्वस्रः प्राप्ताः पितृर्गृहम् ।
जगाम साप्यनाहूता सती सत् स्वं पितुर्गृहम् ॥ ४३ ॥

ततोऽब्रवीत् सा पितरं देवी क्रोधादमर्षिता ।
यवीयसीभ्यो ज्यायसीं किन्तु पूजामिमां प्रभो ।
असम्मतामवज्ञाय कृतवानसि गर्हिताम् ॥ ४४ ॥

अहं ज्येष्ठा वरिष्ठा हि न त्वसत् कर्तुमर्हसि ।
एवमुक्तोऽब्रवीदेनां दक्षः संरक्तलोचनः ॥ ४५ ॥

त्वन्तु श्रेष्ठा वरिष्ठा च पूज्या बाला सदा मम ।
तासां ये चैव भर्तारस्ते मे बहुमताः सदा ॥ ४६ ॥

ब्रह्मिष्ठाश्च तपिष्ठाश्च महायोगाः सुधार्मिकाः ।
गुणैश्चैवाधिकाः श्लाघ्याः सर्वे ते त्र्यम्बकात्सति ॥ ४७ ॥

वसिष्ठोऽत्रिः पुलस्त्यश्च अङ्गिराः पुलहः क्रतुः ।
भृगुर्मरीचिश्च तथा श्रेष्ठा जामातरो मम ॥ ४८ ॥

तस्यात्मा स च ते शर्वो भक्ता चासि हि तं सदा ।
तेन त्वां न बुभूषामि प्रतिकूलो हि मे भवः ॥ ४९ ॥

इत्युवाच तदा दक्षः संप्रमूढेन चेतसा ।
शापार्थमात्मनश्चैव ये चोक्ताः परमर्षयः ॥ ५० ॥

तथोक्ता पितरं सा वै क्रुद्धा देवीदमब्रवीत् ।
वाङ्मनःकर्मभिर्यस्माददुष्टां मां विगर्हसे ।
तस्मात्त्यजाम्यहन्देहमिदन्तात तवात्मजम् ॥ ५१ ॥

ततस्तेनावमानेन सती दुःखादमर्षिता ।
अब्रवीद्वचनं देवी नमस्कृत्य महेश्वरम् ॥ ५२ ॥

यत्राहमुपपत्स्येहं पुनर्देहेन भास्वता ।
तत्राप्यहमसंमूढा सम्भूता धार्मिकी पुनः ।
गच्छेयं धर्मपत्नीत्वं त्र्यम्बकस्यैव धर्मतः ॥ ५३ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

CENTRE FOR SHAIVA STUDIES Pudicherry

तत्रैवाथ समासीना युक्तात्मानं समादधे ।
धारयामास चाग्नेयीं धारणां मनसात्मनः ॥ ५४ ॥

तत आग्नेयीसमुत्थेन वायुना समुदीरितः ।
सर्वाङ्गेभ्यो विनिःसृत्य वह्निर्भस्म चकार ताम् ॥ ५५ ॥

तदुपश्रुत्य निधनं सत्या देवोऽथ शूलधृक् ।
संवादञ्च तयोर्बुद्ध्वा याथातथ्येन शङ्करः ।
दक्षस्याथ ऋषीणाञ्च चुकोप भगवान् प्रभुः ॥ ५६ ॥

यस्मादवमता दक्ष मत्कृते नाम सा सती ।
प्रशस्ताश्चेतराः सर्वाः स्वसुता भर्तृभिः सह ॥ ५७ ॥

तस्माद्वैवस्वतं प्राप्य पुनरेव महर्षयः ।
उत्पत्स्यन्ते द्वितीये वै मम यज्ञे ह्योनिजाः ॥ ५८ ॥

हुते वै ब्रह्मणा शुक्ते चाक्षुषस्यान्तरे मनोः ।
अभिव्याहृत्य च ऋषीन् दक्षमभ्यगमत् पुनः ॥ ५९ ॥

भविता चाक्षुषो राजा चाक्षुषस्य समन्वये ।
प्राचीनबर्हिषः पौत्रः पुत्रश्चैव प्रचेतसः ॥ ६० ॥

दक्ष इत्येव नाम्ना त्वं मार्षायां जनयिष्यसि ।
कन्यायां शाखिनाञ्चैव प्राप्ते वै चाक्षुषेऽन्तरे ॥ ६१ ॥

दक्ष उवाच ॥

अहं तत्रापि ते विघ्नमाचरिष्यामि दुर्मते ।
धर्मार्थकामयुक्तेषु कर्मस्विह पुनः पुनः ॥ ६२ ॥

यस्मात् स्वं मत्कृते क्रूर ऋषीन् व्याहृतवानसि ।
तस्मात्सार्द्धं सुरैर्यज्ञे न त्वां यक्ष्यन्ति वै द्विजाः ॥ ६३ ॥

हुत्वाहुतिं ततः क्रूरः अपस्त्यक्ष्यन्ति कर्मसु ।
इहैव वत्स्यसि तथा दिवं हित्वा युगक्षयात् ॥ ६४ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

रुद्र उवाच ॥

सर्वेषामेव लोकानां भूर्लोकस्त्वादिरुच्यते ।
तमहं धारयिष्यामि निदेशात् परमेष्ठिनः ॥ ६५ ॥

अस्यां क्षितौ वृता लोकाः सर्वे तिष्ठन्ति भास्कराः ।
तानहं धारयामीह सततं न तवाज्ञया ॥ ६६ ॥

चातुर्वर्ण्यं हि देवानां ते चाप्येकत्र भुञ्जते ।
नाहं तैः सह भोक्ष्यामि ततो दास्यन्ति ते पृथक् ।
ततो देवैः स तैः सार्द्धं नेज्यते पृथगिज्यते ॥ ६७ ॥

ततोऽभिव्याहृतो दक्षो रुद्रेणामिततेजसा ।
स्वायम्भुवेऽन्तरे त्यक्त्वा उत्पन्नो मानुषेष्विह ॥ ६८ ॥

ज्ञात्वा गृहपतिं दक्षं ज्ञानानामीश्वरं प्रभुम् ।
दक्षो नाम महायज्ञैः सोऽयजद्दैवतैः सह ॥ ६९ ॥

अथ देवी सती या तु प्राप्ते वैवस्वतेऽन्तरे ।
मेनायां तामुमां देवीं जनयामास शैलराड् ॥ ७० ॥

सा तु देवी सती पूर्वं ततः पश्चादुमाऽभवत् ।
सहव्रता भवस्यैषा न तया मुच्यते भवः ।
यावदिच्छति संस्थातुं प्रभुर्मन्वन्तरेष्विह ॥ ७१ ॥

मारीचं कश्यपं देवी यथादितिरनुव्रता ।
साध्यं नारायणं श्रीस्तु मघवन्तं शची यथा ॥ ७२ ॥

विष्णुं कीर्ती रुचिः सूर्यं वसिष्ठञ्चाप्यरुन्धती ।
नैतास्तु विजहत्येतान् भर्तॄन् देव्यः कथंचन ।
आवर्तमानकल्पेषु पुनर्जायन्ति तैः सह ॥ ७३ ॥

एवं प्राचेतसो दक्षो जज्ञे वै चाक्षुषेऽन्तरे ।
प्राचीनबर्हिषः पौत्रः पुत्रश्चैव प्रचेतसः ॥ ७४ ॥

दशभ्यस्तु प्रचेतोभ्यो मार्षायाञ्च पुनर्नृपः ।
जज्ञे रुद्राभिशापेन द्वितीयेऽस्मिन्निति श्रुतिः ॥ ७५ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भृग्वादयस्तु ते सर्वे जज्ञिरे वै महर्षयः ।
आद्ये त्रेतायुगे पूर्वं मनोर्वैवस्वतस्य ह ।
देवस्य महतो यज्ञे वारुणीं बिभ्रतस्तनुम् ।। ७६ ।।

इति सानुशयोऽह्यासीत्तयोर्जात्यन्तरागतः ।
प्रजापतेस्तु दक्षस्य त्र्यम्बकस्य च धीमतः ।। ७७ ।।

तस्मान्नानुशयः कार्यो वैरिष्विह कदाचन ।
जात्यन्तरगतस्यापि भावितस्य शुभाशुभैः ।
जन्तुं न मुञ्चति ख्यातिस्तत्र कार्यं विजानता ।। ७८ ।।

ऋषय ऊचुः ।।

प्राचेतसस्य दक्षस्य कथं वैवस्वतेऽन्तरे ।
विनाशमगमत् सूत हयमेधः प्रजापतेः ।। ७९ ।।

देव्या मृत्युं कृतं मत्वा क्रुद्धं सर्वात्मकं प्रभुम् ।
कथं प्रासादयद्दक्षः स यज्ञः साधितः कथम् ।
एतद्वेदितुमिच्छामस्तन्नो ब्रूहि यथातथम् ।। ८० ।।

सूत उवाच ।।

पुरा मेरोर्द्विज श्रेष्ठाः श्रृङ्गं त्रैलोक्यविश्रुतम् ।
ज्योतिष्कं नाम सावित्रं सर्वरत्नविभूषितम् ।। ८१ ।।

अप्रमेयमनाधृष्यं सर्वलोकनमस्कृतम् ।
तस्मिन् देवो गिरिश्रेष्ठे सर्वधातुविभूषिते ।
पर्यङ्क इव विभ्राजन्नुपविष्टो बभूव ह ।। ८२ ।।

शैलराजसुता चास्य नित्यं पार्श्वस्थिताऽभवत् ।
आदित्याश्च महात्मानो वसवश्चामितौजसः ।। ८३ ।।

तथैव च महात्मानावश्विनौ भिषजां वरौ ।
तथा वैश्रवणो राजा गुह्यकैः परिवारितः ।। ८४ ।।

यक्षाणामीश्वरः श्रीमान् कैलासनिलयः प्रभुः ।
उपासते महात्मानं उशना च महामुनिः ।
सनत्कुमारप्रमुखास्ते चैव परमर्षयः ।। ८५ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अङ्गिरःप्रमुखाश्चैव तथा देवर्षयोऽपरे ।
विश्वावसुश्च गन्धर्वस्तथा नारदपर्वतौ ॥ ८६ ॥

अप्सरोगणसङ्घश्च समाजग्मुरनेकशः ।
ववौ शिवः सुखो वायुर्नानागन्धवहः शुचिः ॥ ८७ ॥

सर्वर्तुकुसुमोपेताः पुष्पवन्तो द्रुमास्तथा ।
तथा विद्याधराश्चैव सिद्धाश्चैव तपोधनाः ॥ ८८ ॥

महादेवं पशुपतिं पर्युपासन्ति तत्र वै ।
भूतानि च तथान्यानि नानारूपधराण्यथ ॥ ८९ ॥

राक्षसाश्च महारौद्राः पिशाचाश्च महाबलाः ।
बहुरूपधरा हृष्टा नानाप्रहरणोद्यताः ॥ ९० ॥

देवस्यानुचरास्तत्र तस्थुर्वैश्वानरोपमाः ।
नन्दीश्वरश्च भगवान् देवस्यानुमते स्थितः ॥ ९१ ॥

प्रगृह्य ज्वलितं शूलं दीप्यमानं स्वतेजसा ।
गङ्गा च सरितां श्रेष्ठा सर्वतीर्थजलोद्भवा ।
पर्युपासत तन्देवरूपिणी द्विजसत्तमाः ॥ ९२ ॥

एवं स भगवांस्तत्र दीप्यमानः सुरर्षिभिः ।
देवैश्च सुमहाभागैर्महादेवो व्यवस्थितः ॥ ९३ ॥

पुरा हिमवतः पृष्ठे दक्षो वै यज्ञमारभत् ।
गङ्गाद्वारे शुभे देशे ऋषिसिद्धनिषेविते ॥ ९४ ॥

ततस्तस्य मखे देवाः शतक्रतुपुरोगमाः ।
गमनाय समागम्य बुद्धिमापेदिरे तदा ॥ ९५ ॥

स्वैर्विमानैर्महात्मानो ज्वलद्भिर्ज्वलनप्रभाः ।
देवस्यानुमनेऽगच्छन् गङ्गाद्वार इति श्रुतिः ॥ ९६ ॥

गन्धर्वाप्सरसाकीर्णं नानाद्रुमलतावृतम् ।
ऋषिसङ्घैः परिवृतं दक्षं धर्मभृतां वरम् ॥ ९७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पृथिव्यामन्तरिक्षे वा ये च स्वर्लोकवासिनः ।
सर्वे प्राञ्जलयो भूत्वा उपतस्थुः प्रजापतिम् ॥ ९८ ॥

आदित्या वसवो रुद्राः साध्याः सह मरुद्गणैः ।
जिष्णुना सहिताः सर्वे आगता यज्ञभागिनः ॥ ९९ ॥

ऊष्मपाः सोमपाश्चैव आज्यपा धूमपास्तथा ।
अश्विनौ पितरश्चैव आगता ब्रह्मणा सह ॥ १०० ॥

एते चान्ये च बहवो भूतग्रामास्तथैव च ।
जरायुजाण्डजाश्चैव स्वेदजोद्भिज्जकास्तथा ॥ १०१ ॥

आहूता मन्त्रतः सर्वे देवाश्च सह पत्निभिः ।
विराजन्ते विमानस्था दीप्यमाना इवाग्नयः ॥ १०२ ॥

तान् दृष्ट्वा मन्युमाविष्टो दधीचो वाक्यमब्रवीत् ।
अपूज्यपूजने चैव पूज्यानां चाप्यपूजने ।
नरः पापमवाप्नोति महद्वै नात्र संशयः ॥ १०३ ॥

एवमुक्त्वा तु विप्रर्षिः पुनर्दक्षमभाषत ।
पूज्यन्तु पशुभर्तारं कस्मान्नाह्वयसे प्रभुम् ॥ १०४ ॥

दक्ष उवाच ॥

सन्ति मे बहवो रुद्राः शूलहस्ताः कपर्दिनः ।
एकादशावस्थगता नान्यं वेद्मि महेश्वरम् ॥ १०५ ॥

दधीच उवाच ॥

सर्वे निमन्त्रिता देवा येन ईशो निमन्त्रितः ।
यथाहं शङ्करादूर्ध्वं नान्यं पश्यामि दैवतम् ।
तथा दक्षस्य विपुलो यज्ञोऽयं न भविष्यति ॥ १०६ ॥

दक्ष उवाच ॥

एतन्मखे शूर सुवर्णपात्रे हविः समस्तं विधिमन्त्रपूतम् ।
विष्णोर्नयाम्यप्रतिमस्य सर्वं प्रभोर्विभो ह्याहवनीयनित्यम् ॥ १०७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

गतास्तु देवता ज्ञात्वा शैलराजसुता तदा ।
उवाच वचनं साध्वी देवं पशुपतिं तदा ॥ १०८ ॥

उमोवाच ॥

भगवन् क्व गता ह्येते देवाः शक्रपुरोगमाः ।
ब्रूहि तत्त्वेन तत्त्वज्ञ संशयो मे महानयम् ॥ १०९ ॥

महेश्वर उवाच ॥

दक्षो नाम महाभागः प्रजानां पतिरुत्तमः ।
हयमेधेन यजते तत्र यान्ति दिवौकसः ॥ ११० ॥

देव्युवाच ॥

यज्ञमेतं महाभाग किमर्थं न गतोऽसि वै ।
केन वा प्रतिषेधेन गमनं प्रतिषिध्यते ॥ १११ ॥

महेश्वर उवाच ॥

सुरैरेव महाभागे सर्वमेतदनुष्ठितम् ।
यज्ञेषु मम सर्वेषु न भाग उपकल्पितः ॥ ११२ ॥

पूर्वोपायोपपन्नेन मार्गेण वरवर्णिनि ।
न मे सुराः प्रयच्छन्ति भागं यज्ञस्य धीमतः ॥ ११३ ॥

देव्युवाच ॥

भगवन् सर्वदेवेषु प्रभावानधिको गुणैः ।
अजेयश्चाप्यधृष्यश्च तेजसा यशसा श्रिया ॥ ११४ ॥

अनेन तु महाभाग प्रतिषेधेन नामतः ।
अतीव दुःखमापन्ना वेपथुश्च ममानघ ॥ ११५ ॥

किं नाम दानं नियमन्तपो वा कुर्य्यामहं येन पतिर्ममाद्य ।
लभेत भागं भगवानचिन्त्यो यज्ञस्य चार्द्धं त्वथ वा तृतीयम् ॥ ११६ ॥

एवं ब्रुवाणां भगवानचिन्त्यः पत्नीं प्रहृष्टः क्षुभितामुवाच ।
न वेत्सि देवेशि कृशोदराङ्गि किं नाम युक्तं वचनन्तवेदम् ॥ ११७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अहं हि जानामि विशालनेत्रे ध्यानेन सर्वे हि वदन्ति सन्तः ।
न वाद्य मोहेन महेन्द्रदेवो लोकत्रयं सर्वथा संप्रमूढम् ।। ११८ ।।

मामध्वरे शंसितारः स्तुवन्ति रथन्तरे साम गायन्ति गेयम् ।
मां ब्राह्मणा ब्रह्मसत्रे यजन्ते माध्वर्य्यवः कल्पयन्ते च भागम् ।। ११९ ।।

देव्युवाच ।।

अप्राकृतोऽपि भगवान् सर्वस्त्रीजनसंसदि ।
स्तौति गोपायते वापि स्वमात्मानं न संशयः ।। १२० ।।

भगवानुवाच ।।

नात्मानं स्तौमि देवेशि पश्य त्वमुपगच्छ च ।
यं स्त्रक्ष्यामि वरारोहे भागार्थे वरवर्णिनि ।। १२१ ।।

एवमुक्त्वा तु भगवान् पत्नीं प्राणैरपि प्रियाम् ।
सोऽसृजद्भगवान्वक्त्राद्भूतं क्रोधाग्निसन्निभम् ।। १२२ ।।

सहस्रशीर्षं देवञ्च सहस्रचरणं क्षणम् ।
सहस्रमुद्गरधरं सहस्रशरपाणिनम् ।। १२३ ।।

शङ्खचक्रगदापाणिं दीप्तकार्मुकधारिणम् ।
परश्वसिधरं देवं महारौद्रं भयावहम् ।। १२४ ।।

घोररूपेण दीप्यन्तं चन्द्रार्धकृतभूषणम् ।
वसानं चर्म वैयाघ्रं महारुचिरनिःस्रवम् ।। १२५ ।।

दंष्ट्राकरालं विभ्रान्तं महावक्त्रं महोदरम् ।
विद्युज्जिह्वं प्रलम्बोष्ठं लम्बकर्णं दुरासदम् ।। १२६ ।।

कुलिशोद्योतितकरम्भाभिर्ज्वलितमूर्द्धजम् ।
ज्वालामालापरिक्षिप्तं मुक्तादामविभूषितम् ।। १२७ ।।

तेजसा चैव दीप्यन्तं युगान्तमिव पावकम् ।
आकर्णदारितास्यान्तं चतुर्दिक्षु भयानकम् ।। १२८ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

महाबलं महातेजं महापुरुषमीश्वरम्।
विश्वहर्तृमहाकायं महान्यग्रोधमण्डलम्।
युगपच्चन्द्रशतवद्दीप्यन्तं मन्मथाग्निवत्॥ १२९ ॥

चतुर्महास्यं सिततीक्ष्णदंष्ट्रं महोग्रतेजोबलकौतुकाढ्यम्।
युगान्तसूर्य्याग्निसहस्रभासं सहस्रचन्द्रामलकान्तिकान्तम्।
प्रदीप्तसर्वोपधिमन्दराभं सुमेरुकैलासहिमाद्रितुल्यम्॥ १३० ॥

युगार्काभं महावीर्य्यं चारुनासं महाननम्।
प्रचण्डगण्डं दीप्ताक्षमग्निज्वालाविलाननम्॥ १३१ ॥

मृगेन्द्रकृत्तिवसनं महाभुजगवेष्टितम्।
उष्णीषिणं चन्द्रधरं क्वचिदुग्रं क्वचित्समम्॥ १३२ ॥

नानाकुसुममूर्द्धानं नानागन्धानुलेपनम्।
नानारत्नविचित्राङ्गं नानाभरणभूषितम्॥ १३३ ॥

कर्णिकारस्रजं दीप्तं क्रोधादुद्भ्रान्तलोचनम्।
क्वचिन्नृत्यति चित्राङ्गं क्वचिद्वदति सुस्वरम्॥ १३४ ॥

क्वचिद्ध्यायति युक्तात्मा क्वचित्स्थूलं प्रमार्जति।
क्वचिद्गायति विश्वात्मा क्वचिद्रौति मुहुर्मुहुः ॥ १३५ ॥

ज्ञानं वैराग्यमैश्वर्य्यं तपः सत्यं क्षमा धृतिः ।
प्रभुत्वमात्मसंबोधो ह्यधिष्ठानगुणैर्युतः ॥ १३६ ॥

जानुभ्यामवनिं गत्वा प्रणतः प्राञ्जलिः स्थितः ।
आज्ञापय त्वं देवेश किं कार्य्यं करवाणि ते ॥ १३७ ॥

तमुवाचाक्षिप मखं दक्षस्येह महेश्वरः ।
देवस्यानुमतिं श्रुत्वा वीरभद्रो महाबलः ।
प्रणम्य शिरसा पादौ देवेशस्य उमापतेः ॥ १३८ ॥

ततो बन्धात् प्रमुक्तेन सिंहेनेवेह लीलया।
देव्या मन्युकृतं मत्वा हतो दक्षस्य स क्रतुः ॥ १३९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मन्युना च महाभीमा भद्रकाली महेश्वरी ।
आत्मनः सर्वसाक्षित्वे तेन सार्द्धं सहानुगा ॥ १४० ॥

स एष भगवान् क्रुद्धः प्रेतावासकृतालयः ।
वीरभद्र इति ख्यातो देव्या मन्युप्रमार्जकः ॥ १४१ ॥

सोऽसृजद्रोमकूपेभ्यो रौद्रान्नाम गणेश्वरान् ।
रुद्रानुगा महावीर्य्या रुद्रवीर्यपराक्रमाः ॥ १४२ ॥

रुद्रस्यानुचराः सर्वे सर्वे रुद्रसमप्रभाः ।
ते निपेतुस्ततस्तूर्णं शतशोऽथ सहस्रशः ॥ १४३ ॥

ततः किलकिलाशब्द आकाशं पूरयन्निव ।
तेन शब्देन महता त्रस्ताः सर्वे दिवौकसः ॥ १४४ ॥

पर्वताश्च व्यशीर्यन्त कम्पते च वसुन्धरा ।
मेरुश्च घूर्णति विप्राः क्षुभ्यन्ते वरुणालयाः ॥ १४५ ॥

अग्नयो नैव दीप्यन्ते न च दीप्यन्ति भास्कराः ।
ग्रहा नैव प्रकाशन्ते नक्षत्राणि न तारकाः ॥ १४६ ॥

ऋषयो नाभ्यभाषन्त न देवा न च दानवाः ।
एवं हि तिमिरीभूतं निर्दहन्ति विमानिताः ॥ १४७ ॥

सिंहनादं प्रमुञ्चन्ते घोररूपा महाबलाः ।
प्रभञ्जन्ते परे घोरा यूपानुत्पाटयन्ति च ॥ १४८ ॥

प्रमर्दन्ति तथा चान्ये विनृत्यन्ति तथाऽपरे ।
आधावन्ति प्रधावन्ति वायुवेगा मनोजवाः ॥ १४९ ॥

चूर्णन्ते यज्ञपात्राणि यागस्यायतनानि च ।
शीर्यमाणानि दृश्यन्ते तारा इव नभस्तलात् ॥ १५० ॥

दिव्यान्नपानभक्षाणां राशयः पर्वतोपमाः ।
क्षीरनद्यस्तथा चान्या घृतपायसकर्दमाः ।
मधुमण्डोदका दिव्याः खण्डशर्करवालुकाः ॥ १५१ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

षड्रसान्निवहन्त्यन्या गुडकुल्या मनोरमाः ।
उच्चावचानि मांसानि भक्ष्याणि विविधानि च ॥ १५२ ॥

यानि कानि च दिव्यानि लेह्यशोष्यं तथापरे ।
भुञ्जते विविधैर्वक्त्रैर्विलुण्ठन्ति च सर्वशः ।
क्रीडन्ति विविधाकाराश्चिक्षिपुः सुरयोषितः ॥ १५३ ॥

रुद्रकोपप्रयुक्तास्तु सर्वदेवैः सुरक्षितम् ।
तं यज्ञमहनन् शीघ्रं रुद्रकल्पाः समीपतः ॥ १५४ ॥

चक्रुरन्ये तथा नादान् सर्वभूतभयंकरान् ।
छित्त्वा शिरोऽन्यं यज्ञस्य विनदन्ति भयङ्कराः ॥ १५५ ॥

दक्षो दक्षपतिश्चैव देवो यज्ञपतिस्तथा ।
मृगरूपेण चाकाशें प्रपलायितुमारभत् ॥ १५६ ॥

वीरभद्रोऽप्रमेयात्मा ज्ञात्वा तस्य बलन्तदा ।
अन्तरिक्षगतस्याशु चिच्छेदास्य शिरो महान् ॥ १५७ ॥

दक्षः प्रजापतिश्चैव विनष्टभ्रान्तचेतनः ।
क्रुद्धेन वीरभद्रेण शिरः पादेन पीडितः ।
जराभिभूततीव्रात्मा निपपात महीतले ॥ १५८ ॥

त्रयस्त्रिंशद्देवतानां ताः कोट्यो विमलात्मकाः ।
पाशेनाग्निबलेनाशु बद्धाः सिंहबलेन च ॥ १५९ ॥

ततो जग्मुर्महात्मानं सर्वे देवा महाबलम् ।
प्रसीद भगवान् रुद्र भृत्यानां मा क्रुधः प्रभो ॥ १६० ॥

ततो ब्रह्मादयो देवा दक्षश्चैव प्रजापतिः ।
ऊचुः प्राञ्जलयो भूत्वा कथ्यतां को भवानिति ॥ १६१ ॥

वीरभद्र उवाच ॥

न च देवो न चादित्यो न च भोक्तुमिहागतः ।
नैव द्रष्टुं हि देवेन्द्रान्न च कौतूहलान्वितः ॥ १६२ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दक्षयज्ञविनाशार्थं सम्प्राप्तं विद्धि मामिह ।
वीरभद्र इति ख्यातं रुद्रकोपाद्विनिर्गतम् ॥ १६३ ॥

भद्रकाली च विज्ञेया देव्याः क्रोधाद्विनिर्गता ।
प्रेषिता देवदेवेन यज्ञान्तिकमिहागता ॥ १६४ ॥

शरणं गच्छ राजेन्द्र देवं ते त्वमुमापतिम् ।
वरं क्रोधोऽपि रुद्रस्य वरदानं न देवतः ॥ १६५ ॥

वीरभद्रवचः श्रुत्वा दक्षो धर्म्मभृतां वरः ।
तोषयामास देवेशं शूलपाणिं महेश्वरम् ॥ १६६ ॥

प्रदुष्टे यज्ञवादे तु विद्रुतेषु द्विजातिषु ।
तारामृगमये दीप्ते रौद्रे भीमृमहानले ॥ १६७ ॥

शूलनिर्भिन्नवदनैः कूजद्भिः परिचारकैः ।
निखातोत्पाटितैर्यूपैरपविद्धै र्यतस्ततः ॥ १६८ ॥

उत्पतद्भिः पतद्भिश्च गृध्रैरामिषगृघ्नुभिः ।
पक्षपातविनिर्धूतैः शिवाशतनिनादितैः ॥ १६९ ॥

प्राणापानौ सन्निरुध्य ततः स्थानेन यत्नतः ।
विचार्य सर्वतो दृष्टिं बहुदृष्टिरमित्रजित् ॥ १७० ॥

सहसा देवदेवेशः अग्निकुण्डादुपागतः ।
चन्द्रसूर्य्यसहस्रस्य तेजः संवर्तकोपमम् ॥ १७१ ॥

प्रहस्य चैनं भगवानिदं वचनमब्रवीत् ।
नष्टस्ते ज्ञानतो दक्ष प्रीतिस्ते मयि सांप्रतम् ॥ १७२ ॥

स्मितं कृत्वाब्रवीद्वाक्यं ब्रूहि किं करवाणि ते ।
श्रावितश्च समाख्याय देवानां गुरुभिः सह ॥ १७३ ॥

तमुवाचाञ्जलिं कृत्वा दक्षो देवं प्रजापतिः ।
भीतशङ्कितवित्रस्तः सबाष्पवदनेक्षणः ॥ १७४ ॥

यदि प्रसन्नो भगवान् यदि वाहं तव प्रियः ।
यदि वाहमनुग्राह्यो यदि देयो वरो मम ॥ १७५ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यज्जग्धं भक्षितं पीतमशितं यच्च नाशितम्।
चूर्णीकृतञ्चापविद्धं यज्ञसम्भारमीदृशम्॥ १७६॥

दीर्घकालेन महता प्रयत्नेन च सञ्चितम्।
तन्न मिथ्या भवेन्मह्यं वरमेतं वृणोम्यहम्॥ १७७॥

तथास्त्वित्याह भगवान् भगनेत्रहरो हरः।
धर्माध्यक्षं महादेवं त्र्यक्षन्तं वे प्रजापतिः॥ १७८॥

जानुभ्यामवनिं गत्वा दक्षो लब्ध्वा भवाद्वरम्।
नाम्नामष्टसहस्रेण स्तुतवान् वृषभध्वजम्॥ १७९॥

दक्ष उवाच॥

नमस्ते देवदेवेश देवारिबलसूदन।
देवेन्द्र ह्यमरश्रेष्ठ देवदानवपूजित॥ १८०॥

सहस्राक्ष विरूपाक्ष त्र्यक्ष यक्षाधिपप्रिय।
सर्वतः पाणिपादस्त्वं सर्वतोऽक्षिशिरोमुखः।
सर्वतः श्रुतिमान् लोके सर्वानावृत्य तिष्ठसि॥ १८१॥

शङ्कुकर्ण महाकर्ण कुम्भकर्णार्णवालय।
गजेन्द्रकर्ण गोकर्ण पाणिकर्ण नमोऽस्तु ते॥ १८२॥

शतोदर शतावर्त शतजिह्व शतानन।
गायन्ति त्वां गायत्रिणो ह्यर्च्चयन्ति तथार्चिनः॥ १८३॥

देवदानवगोप्ता च ब्रह्मा च त्वं शतक्रतुः।
मूर्तीशस्त्वं महामूर्ते समुद्राम्बुधराय च॥ १८४॥

सर्वाः ह्यस्मिन् देवतास्ते गावो गोष्ठ इवासते।
शरीरन्ते प्रपश्यामि सोममग्निं जलेश्वरम्॥ १८५॥

आदित्यमथ विष्णुञ्च ब्रह्माणं सबृहस्पतिम्।
क्रिया कार्य्यं कारणञ्च कर्ता करणमेव च॥ १८६॥

असच्च सदसच्चैव तथैव प्रभवाव्ययम्।
नमो भवाय शर्वाय रुद्राय वरदाय च॥ १८७॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पशूनां पतये चैव नमस्त्वन्धकघातिने ।
त्रिजटाय त्रिशीर्षाय त्रिशूलवरधारिणे ॥ १८८ ॥

त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः ।
नमश्चण्डाय मुण्डाय प्रचण्डाय धराय च ॥ १८९ ॥

दण्डि(?) .मासक्तकर्णाय दण्डिमुण्डाय वै नमः ।
नमोऽर्द्धदण्डकेशाय निष्काय विकृताय च ॥ १९० ॥

विलोहिताय धूम्राय नीलग्रीवाय ते नमः ।
नमस्त्वप्रतिरूपाय शिवाय च नमोऽस्तु ते ॥ १९१ ॥

सूर्य्याय सूर्य्यपतये सूर्य्यध्वजपताकिने ।
नमः प्रमथनाथाय वृषस्कन्धाय धन्विने ॥ १९२ ॥

नमो हिरण्यगर्भाय हिरण्यकवचाय च ।
हिरण्यकृतचूडाय हिरण्यपतये नमः ॥ १९३ ॥

सत्रघाताय दण्डाय वर्णपानपुटाय च ।
नमः स्तुताय स्तुत्याय स्तूयमानाय वै नमः ॥ १९४ ॥

सर्वायाभक्ष्यभक्ष्याय सर्वभूतान्तरात्मने ।
नमो होत्राय मन्त्राय शुक्लध्वजपताकिने ॥ १९५ ॥

नमो नमाय नम्याय नमः किलिकिलाय च ।
नमस्ते शयमानाय शयितायोत्थिताय च ॥ १९६ ॥

स्थिताय चलमानाय मुद्राय कुटिलाय च ।
नमो नर्तनशीलाय मुखवादित्रकारिणे ॥ १९७ ॥

नाट्योपहारलुब्धाय गीतवाद्यरताय च ।
नमो ज्येष्ठाय श्रेष्ठाय बलप्रमथनाय च ॥ १९८ ॥

कलनाय च कल्पाय क्षयायोपक्षयाय च ।
भीमदुन्दुभिहासाय भीमसेनप्रियाय च ॥ १९९ ॥

उग्राय च नमो नित्यं नमस्ते दशबाहवे ।
नमः कपालहस्ताय चिताभस्मप्रियाय च ॥ २०० ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विभीषणाय भीष्माय भीष्मव्रतधराय च ।
नमो विकृतवक्षाय खड्गजिह्वाग्रदंष्ट्रिणे ।। २०१ ।।

पक्वाममांसलुब्धाय तुम्बवीणाप्रियाय च ।
नमो वृषाय वृष्याय वृष्णये वृषणाय च ।। २०२ ।।

कटङ्कटाय चण्डाय नमः सावयवाय च ।
नमस्ते वरकृष्णाय वराय वरदाय च ।। २०३ ।।

वरगन्धमाल्यवस्त्राय वरातिवरये नमः ।
नमो वर्षाय वाताय छायायै आतपाय च ।। २०४ ।।

नमो रक्तविरक्ताय शोभनायाक्षमालिने ।
सम्भिन्नाय विभिन्नाय विविक्तविकटाय च ।। २०५ ।।

अघोररूपरूपाय घोरघोरतराय च ।
नमः शिवाय शान्ताय नमः शान्ततराय च ।। २०६ ।।

एकपाद्बहुनेत्राय एकशीर्षन्नमोऽस्तु ते ।
नमो वृद्धाय लुब्धाय संविभागप्रियाय च ।। २०७ ।।

पञ्चमालार्चिताङ्गाय नमः पाशुपताय च ।
नमश्चण्डाय घण्टाय घण्टया जग्धरन्ध्रिणे ।। २०८ ।।

सहस्रशतघण्टाय घण्टामालाप्रियाय च ।
प्राणदण्डाय त्यागाय नमो हिलिहिलाय च ।। २०९ ।।

हूंहुङ्काराय पाराय हूंहुङ्कारप्रियाय च ।
नमश्च शम्भवे नित्यं गिरिवृक्षकलाय च ।। २१० ।।

गर्भमांसश्रृगालाय तारकाय तराय च ।
नमो यज्ञाधिपतये द्रुतायोपद्रुताय च ।। २११ ।।

यज्ञवाहाय दानाय तप्याय तपनाय च ।
नमस्तटाय भव्याय तडितां पतये नमः ।। २१२ ।।

अन्नादायान्नपतये नमोऽस्त्वन्नभवाय च ।
नमः सहस्रशीर्ष्णे च सहस्रचरणाय च ।। २१३ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सहस्रोद्यतशूलाय सहस्रनयनाय च।
नमोऽस्तु बालरूपाय बालरूपधराय च॥ २१४॥

बालानाञ्चैव गोप्त्रे च बालक्रीडनकाय च।
नमः शुद्धाय बुद्धाय क्षोभणायाक्षताय च॥ २१५॥

तरङ्गाङ्कितकेशाय मुक्तकेशाय वै नमः।
नमः षट्कर्मनिष्ठाय त्रिकर्मनिरताय च॥ २१६॥

वर्णाश्रमाणां विधिवत् पृथक्कर्मप्रवर्तिने।
नमो घोषाय घोष्याय नमः कलकलाय च॥ २१७॥

श्वेतपिङ्गलनेत्राय कृष्णरक्तक्षणाय च।
धर्मार्थकाममोक्षाय क्वथाय कमनाय च॥ २१८॥

साङ्ख्याय साङ्ख्यमुख्याय योगाधिपतये नमः।
नमो रथ्यविरथ्याय चतुष्पथरताय च॥ २१९॥

कृष्णाजिनोत्तरीयाय व्यालयज्ञोपवीतिने।
ईशानवज्रसंहाय हरिकेश नमोऽस्तु ते।
अविवेकैकनाथाय व्यक्ताव्यक्त नमोऽस्तु ते॥ २२०॥

काम कामद कामघ्न धृष्टोद्दृप्तनिषूदन।
सर्व सर्वद सर्वज्ञ सन्ध्याराग नमोऽस्तु ते॥ २२१॥

महाबाल महाबाहो महासत्त्व महाद्युते।
महामेघवरप्रेक्ष महाकाल नमोऽस्तु ते॥ २२२॥

स्थूलजीर्णाङ्गजटिने वल्कलाजिनधारिणे।
दीप्तसूर्याग्निजटिने वल्कलाजिनवाससे।
सहस्रसूर्यप्रतिम तपोनित्य नमोऽस्तु ते॥ २२३॥

उन्मादनशतावर्त गङ्गातोयार्द्धमूर्द्धज।
चन्द्रावर्त युगावर्त मेघावर्त नमोऽस्तु ते॥ २२४॥

त्वमन्नमन्नकर्ता च अन्नदश्च त्वमेव हि।
अन्नस्रष्टा च पक्ता च पक्वभुक्तपचे नमः॥ २२५॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जरायुजोऽण्डजश्चैव स्वेदजोद्भिज्ज एव च।
त्वमेव देवदेवेशो भूतग्रामश्चतुर्विधः ॥ २२६ ॥

चराचरस्य ब्रह्मा त्वं प्रतिहर्ता त्वमेव च।
त्वमेव ब्रह्मविदुषामपि ब्रह्मविदां वरः ॥ २२७ ॥

सत्त्वस्य परमा योनिरब्वायुज्योतिषां निधिः।
ऋक्सामानि तथोङ्कारमाहुस्त्वां ब्रह्मवादिनः ॥ २२८ ॥

हविर्हावी हवो हावी हुवां वाचाहुतिः सदा।
गायन्ति त्वां सुरश्रेष्ठ सामगा ब्रह्मवादिनः ॥ २२९ ॥

यजुर्मयो ऋङ्मयश्च सामाथर्वमयस्तथा।
पठ्यसे ब्रह्मविद्भिस्त्वं कल्पोपनिषदां गणैः ॥ २३० ॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णावराश्च ये।
त्वामेव मेघसङ्घाश्च विश्वस्तनितगर्जितम् ॥ २३१ ॥

संवत्सरस्त्वमृतवो मासा मासार्द्धमेव च।
कला काष्ठा निमेषाश्च नक्षत्राणि युगा ग्रहाः ॥ २३२ ॥

वृषाणां ककुदं त्वं हि गिरीणां शिखराणि च।
सिंहो मृगाणां पततां तार्क्ष्योऽनन्तश्च भोगिनाम् ॥ २३३ ॥

क्षीरोदो ह्युदधीनाञ्च यन्त्राणां धनुरेव च।
वज्रम्प्रहरणानाञ्च व्रतानां सत्यमेव च ॥ २३४ ॥

इच्छा द्वेषश्च रागश्च मोहः क्षामो दमः शमः।
व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ ॥ २३५ ॥

त्वं गदी त्वं शरी चापि खट्वाङ्गी झर्झरीं तथा।
छेत्ता भेत्ता प्रहर्ता च त्वं नेताप्यन्तको मतः ॥ २३६ ॥

दशलक्षणसंयुक्तो धर्मोऽर्थः काम एव च।
इन्द्रः समुद्राः सरितः पल्वलानि सरांसि च ॥ २३७ ॥

लतावल्लीतृणौषध्यः पशवो मृगपक्षिणः।
द्रव्यकर्मगुणारम्भः कालपुष्पफलप्रदः ॥ २३८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आदिश्चान्तश्च मध्यश्च गायत्र्योङ्कार एव च।
हरितो लोहितः कृष्णो नीलः पीतस्तथारुणः ॥ २३९ ॥

कटुश्च कपिलश्चैव कपोतो मेचकस्तथा।
सुवर्णरिता विख्यातः सुवर्णश्चाप्यतो मतः ॥ २४० ॥

सुवर्णनामा च तथा सुवर्णप्रिय एव च।
त्वमिन्द्रोऽथ यमश्चैव वरुणो धनदोऽनलः ॥ २४१ ॥

उत्फुल्लश्चित्रभानुश्च स्वर्भानुर्भानुरेव च।
होत्रं होता च होमस्त्वं हुतञ्च प्रहुतं प्रभुः ॥ २४२ ॥

सुपर्णञ्च तथा ब्रह्म यजुषां शतरुद्रियम्।
पवित्राणां पवित्रं च मङ्गलानाञ्च मङ्गलम् ॥ २४३ ॥

गिरिः स्तोकस्तथा वृक्षो जीवः पुद्गल एव च।
सत्त्वं त्वञ्च रजस्त्वञ्च तमश्च प्रजनं तथा ॥ २४४ ॥

प्राणोऽपानः समानश्च उदानो व्यान एव च।
उन्मेषश्चैव मेषश्च तथा जृम्भितमेव च ॥ २४५ ॥

लोहिताङ्गो गदी दंष्ट्री महावक्त्रो महोदरः।
शुचिरोमा हरिच्छ्मश्रुरूर्द्ध्वकेशस्त्रिलोचनः ॥ २४६ ॥

गीतवादित्रनृत्याङ्गो गीतवादनकप्रियः।
मत्स्यो जली जलो जल्यो जवः कालः कली कलः ॥ २४७ ॥

विकालश्च सुकालश्च दुष्कालः कलनाशनः।
मृत्युश्चैव क्षयोऽन्तश्च क्षमापायकरो हरः ॥ २४८ ॥

संवर्तकोऽन्तकश्चैव संवर्तकबलाहकौ।
घटो घटीको घण्टीको चूडालोलबलो बलम् ॥ २४९ ॥

ब्रह्मकालोऽग्निवक्त्रश्च दण्डी मुण्डी च दण्डधृक्।
चतुर्युगश्चतुर्वेदश्चतुर्होत्रश्चतुष्पथः ॥ २५० ॥

चतुराश्रमवेत्ता च चातुर्वर्ण्यकरश्च ह।
क्षराक्षरप्रियो धूर्तोऽगण्योऽगण्यगणाधिपः ॥ २५१ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

रुद्राक्षमाल्याम्बरधरो गिरिको गिरिकप्रियः ।
शिल्पीशः शिल्पिनां श्रेष्ठः सर्वशिल्पप्रवर्तकः ॥ २५२ ॥

भगनेत्रान्तकश्चन्द्रः पूष्णो दन्तविनाशनः ।
गूढावर्तश्च गूढश्च गूढप्रतिनिषेविता ॥ २५३ ॥

तरणस्तारकश्चैव सर्वभूतसुतारणः ।
धाता विधाता सत्वानां निधाता धारणो धरः ॥ २५४ ॥

तपो ब्रह्म च सत्यञ्च ब्रह्मचर्यमथार्जवम् ।
भूतात्मा भूतकृद्भूतो भूतभव्यभवोद्भवः ॥ २५५ ॥

भूर्भुवः स्वरितश्चैव तथोत्पत्तिर्महेश्वरः ।
ईशानो वीक्षणः शान्तो दुर्दान्तो दन्तनाशनः ॥ २५६ ॥

ब्रह्मावर्त सुरावर्त कामावर्त नमोऽस्तु ते ।
कामबिम्बनिहर्ता च कर्णिकाररजःप्रियः ॥ २५७ ॥

मुखचन्द्रो भीममुखः सुमुखो दुर्मुखो मुखः ।
चतुर्मुखो बहुमुखो रणे ह्यभिमुखः सदा ॥ २५८ ॥

हिरण्यगर्भः शकुनिर्महोदधिः परो विराट् ।
अधर्महा महादण्डो दण्डधारी रणप्रियः ॥ २५९ ॥

गोतमो गोप्रतारश्च गोवृषेश्वरवाहनः ।
धर्मकृद्धर्मस्रष्टा च धर्मो धर्मविदुत्तमः ॥ २६० ॥

त्रैलोक्यगोप्ता गोविन्दो मानदो मान एव च ।
तिष्ठन् स्थिरश्च स्थाणुश्च निष्कम्पः कम्प एव च ॥ २६१ ॥

दुर्वारणो दुर्विषहो दुःसहो दुरतिक्रमः ।
दुर्द्धरो दुष्प्रकम्पश्च दुर्विदो दुर्जयो जयः ॥ २६२ ॥

शशः शशाङ्कः शमनः शीतोष्णं दुर्जराऽथ तृट् ।
आधयो व्याधयश्चैव व्याधिहा व्याधिगश्च ह ॥ २६३ ॥

सह्यो यज्ञो मृगा व्याधा व्याधीनामाकरोऽकरः ।
शिखण्डी पुण्डरीकाक्षः पुण्डरीकावलोकनः ॥ २६४ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दण्डधरः सदण्डश्च दण्डमुण्डविभूषितः ।
विषपोऽमृतपश्चैव सुरापः क्षीरसोमपः ।। २६५ ।।

मधुपश्चाज्यपश्चैव सर्वपश्च महाबलः ।
वृषाश्ववाह्यो वृषभस्तथा वृषभलोचनः ।। २६६ ।।

वृषभश्चैव विख्यातो लोकानां लोकसत्कृतः ।
चन्द्रादित्यौ चक्षुषी ते हृदयञ्च पितामहः ।
अग्निरापस्तथा देवी धर्मकर्मप्रसाधितः ।। २६७ ।।

न ब्रह्मा न च गोविन्दः पुराणऋषयो न च ।
माहात्म्यं वेदितुं शक्ता याथातथ्येन ते शिव ।। २६८ ।।

या मूर्तयः सुसूक्ष्मास्ते न मह्यं यान्ति दर्शनम् ।
ताभिर्मां सततं रक्ष पिता पुत्रमिवौरसम् ।। २६९ ।।

रक्ष मां रक्षणीयोऽहं तवानघ नमोऽस्तु ते ।
भक्तानुकम्पी भगवान् भक्तश्चाहं सदा त्वयि ।। २७० ।।

यः सहस्राण्यनेकानि पुंसामाहृत्य दुर्दृशः ।
तिष्ठत्येकः समुद्रान्ते स मे गोप्तास्तु नित्यशः ।। २७१ ।।

यं विनिद्रा जितश्वासाः सत्त्वस्थाः समदर्शिनः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ।। २७२ ।।

सम्भक्ष्य सर्वभूतानि युगान्ते समुपस्थिते ।
यः शेते जलमध्यस्थस्तं प्रपद्येऽप्सुशायिनम् ।। २७३ ।।

प्रविश्य वदने राहोर्यः सोमं ग्रसते निशि ।
ग्रसत्यर्कञ्च स्वर्भानुर्भूत्वा सोमाग्निरेव च ।। २७४ ।।

येऽङ्गुष्ठमात्राः पुरुषा देहस्थाः सर्वदेहिनाम् ।
रक्षन्तु ते हि मां नित्यं नित्यमाप्याययन्तु माम् ।। २७५ ।।

ये चाप्युत्पतिता गर्भादधोभागगताश्च ये ।
तेषां स्वाहाः स्वधाश्चैव आप्नुवन्तु स्वदन्तु च ।। २७६ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ये न रोदन्ति देहस्थाः प्राणिनो रोदयन्ति च ।
हर्षयन्ति च हृष्यन्ति नमस्तेभ्योऽस्तु नित्यशः ।। २७७ ।।

ये समुद्रे नदीदुर्गे पर्वतेषु गुहासु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ।। २७८ ।।

चतुष्पथेषु रथ्यासु चत्वरेषु सभासु च ।
चन्द्रार्कयोर्मध्यंगता ये च चन्द्रार्करश्मिषु ।। २७९ ।।

रसातलगता ये च ये च तस्मात्परङ्गताः ।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्यश्च नित्यशः ।
सूक्ष्माः स्थूलाः कृशा ह्रस्वा नमस्तेभ्योस्तु नित्यशः ।। २८० ।।

सर्वस्त्वं सर्वगो देव सर्वभूतपतिर्भवान् ।
सर्वभूतान्तरात्मा च तेन त्वं न निमन्त्रितः ।। २८१ ।।

त्वमेव चेज्यसे यस्माद्यज्ञैर्विविधदक्षिणैः ।
त्वमेव कर्ता सर्वस्य तेन त्वं न निमन्त्रितः ।। २८२ ।।

अथ वा मायया देव मोहितः सूक्ष्मया त्वया ।
एतस्मात् कारणद्वापि तेन त्वं न निमन्त्रितः ।। २८३ ।।

प्रसीद मम देवेश त्वमेव शरणं मम ।
त्वं गतिस्त्वं प्रतिष्ठा च न चान्यास्ति मे गतिः ।। २८४ ।।

स्तुत्वैवं स महादेवं विरराम प्रजापतिः ।
भगवानपि सुप्रीतः पुनर्दक्षमभाषत ।। २८५ ।।

परितुष्टोऽस्मि ते दक्ष स्तवेनानेन सुव्रत ।
बहुनात्र किमुक्तेन मत्समीपं गमिष्यसि ।। २८६ ।।

अथैनमब्रवीद्वाक्यं त्रैलोक्याधिपतिर्भवः ।
कृत्वाश्वासकरं वाक्यं वाक्यज्ञो वाक्यमाहतम् ।। २८७ ।।

दक्ष दक्ष न कर्तव्यो मन्युर्विघ्नमिमं प्रति ।
अहं यज्ञहा न त्वन्यो दृश्यते तत्पुरा त्वया ।। २८८ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भूयश्च तं वरमिमं मत्तो गृहणीष्व सुव्रत ।
प्रसन्नवदनो भूत्वा त्वमेकाग्रमनाः शृणु ॥ २८९ ॥

अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
प्रजापते मत्प्रसादात् फलभागी भविष्यसि ॥ २९० ॥

वेदान् षडङ्गानुद्धृत्य साङ्ख्यान्योगांश्च कृत्स्नशः ।
तपश्च विपुलं तप्त्वा दुश्चरं देवदानवैः ॥ २९१ ॥

अर्थैर्दशार्द्धसंयुक्तैर्गूढमप्राज्ञनिर्म्मितम् ।
वर्णाश्रमकृतैर्धर्मैर्विपरीतं क्वचित्समम् ॥ २९२ ॥

श्रुत्यर्थैरध्यवसितं पशुपाशविमोक्षणम् ।
सर्वेषामाश्रमाणान्तु मया पाशुपतं व्रतम् ।
उत्पादितं शुभं दक्ष सर्वपापविमोक्षणम् ॥ २९३ ॥

अस्य चीर्णस्य यत्सम्यक् फलं भवति पुष्कलम् ।
तदस्तु ते महाभाग मानसस्त्यज्यतां ज्वरः ॥ २९४ ॥

एवमुक्त्वा महादेवः सपत्नीकः सहानुगः ।
अदर्शनमनुप्राप्तो दक्षस्यामितविक्रमः ॥ २९५ ॥

अवाप्य च तदा भागं यथोक्तं ब्रह्मणा भवः ।
ज्वरञ्च सर्वधर्मज्ञो बहुधा व्यभजत्तदा ।
शान्त्यर्थं सर्वभूतानां शृणुध्वं तत्र वै द्विजाः ॥ २९६ ॥

शीर्षाभितापो नागानां पर्वतानां शिलारुजः ।
अपान्तु नालिकां विद्यान्निर्मोकम्भुजगेष्वपि ॥ २९७ ॥

खौरकः सौरभेयाणामूषरः पृथिवीतले ।
इभानामपि धर्मज्ञ दृष्टिप्रत्यवरोधनम् ॥ २९८ ॥

रन्ध्रोद्भूतं तथाश्वानां शिखोद्भेदश्च बर्हिणाम् ।
नेत्ररोगः कोकिलानां ज्वरः प्रोक्तो महात्मभिः ॥ २९९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अजानां पित्तभेदश्च सर्वेषामिति नः श्रुतम् ।
शुकानामपि सर्वेषां हिमिका प्रोच्यते ज्वरः ।
शार्दूलेष्वपि वै विप्राः श्रमो ज्वर इहोच्यते ।। ३०० ।।

मानुषेषु तु सर्वज्ञ ज्वरो नामैष कीर्तितः ।
मरणे जन्मनि तथा मध्ये च विशते सदा ।। ३०१ ।।

एतन्माहेश्वरं तेजो ज्वरो नाम सुदारुणः ।
नमस्यश्चैव मान्यश्च सर्वप्राणिभिरीश्वरः ।। ३०२ ।।

इमां ज्वरोत्पत्तिमदीनमानसः पठेत्सदा यः सुसमाहितो नरः ।
विमुक्तरोगः स नरो मुदा युतो लभेत कामान् स यथामनीषितान् ।।

दक्षप्रोक्तं स्तवञ्चापि कीर्तयेद्यः शृणोति वा ।
नाशुभं प्राप्नुयात् किञ्चिद्दीर्घञ्चायुरवाप्नुयात् ।। ३०४ ।।

यथा सर्वेषु देवेषु वरिष्ठो योगवान् हरः ।
तथा स्तवो वरिष्ठोऽयं स्तवानां ब्रह्मनिर्मितः ।। ३०५ ।।

यशोराज्यसुखैश्वर्यवित्तायुर्धनकाङ्क्षिभिः ।
स्तोतव्यो भक्तिमास्थाय विद्याकामैश्च यत्नतः ।। ३०६ ।।

व्याधितो दुःखितो दीनश्चौरत्रस्तो भयार्दितः ।
राजकार्यनियुक्तो वा मुच्यते महतो भयात् ।। ३०७ ।।

अनेन चैव देहेन गणानां स गणाधिपः ।
इह लोके सुखं प्राप्य गण एवोपपद्यते ।। ३०८ ।।

न च यक्षाः पिशाचा वा न नागा न विनायकाः ।
कुर्युर्विघ्नं गृहे तस्य यत्र संस्तूयते भवः ।। ३०९ ।।

शृणुयाद्वा इदं नारी सुभक्त्या ब्रह्मचारिणी ।
पितृभिर्भर्तृपक्षाभ्यां पूज्या भवति देववत् ।। ३१० ।।

शृणुयाद्वा इदं सर्वं कीर्तयेद्वाप्यभीक्ष्णशः ।
तस्य सर्वाणि कार्याणि सिद्धिं गच्छन्त्यविघ्नतः ।। ३११ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मनसा चिन्तितं यच्च यच्च वाचाप्युदाहृतम् ।
सर्वं सम्पद्यते तस्य स्तवनस्यानुकीर्तनात् ॥ ३१२ ॥

देवस्य सगुहस्याथ देव्या नन्दीश्वरस्य तु ।
बलिं विभवतः कृत्वा दमेन नियमेन च ॥ ३१३ ॥

ततः स युक्तो गृह्णीयान्नामान्याशु यथाक्रमम् ।
ईप्सितान् लभतेऽत्यर्थं कामान् भोगांश्च मानवः ।
मृतश्च स्वर्गमाप्नोति स्त्रीसहस्रपरिवृतः ॥ ३१४ ॥

सर्वकर्मसु युक्तो वा युक्तो वा सर्वपातकैः ।
पठन् दक्षकृतं स्तोत्रं सर्वपापैः प्रमुच्यते ।
मृतश्च गणसालोक्यं पूज्यमानः सुरासुरैः ॥ ३१५ ॥

वृषेव विधियुक्तेन विमानेन विराजते ।
आभूतसंप्लवस्थायी रुद्रस्यानुचरो भवेत् ॥ ३१६ ॥

इत्याह भगवान् व्यासः पराशरसुतः प्रभुः ।
नैतद्वेदयते कश्चिन्नेदं श्राव्यन्तु कस्यचित् ॥ ३१७ ॥

श्रुत्वैतत्परमं गुह्यं येऽपि स्युः पापकारिणः ।
वैश्याः स्त्रियश्च शूद्राश्च रुद्रलोकमवाप्नुयुः ॥ ३१८ ॥

श्रावयेद्यस्तु विप्रेभ्यः सदा पर्वसु पर्वसु ।
रुद्रलोकमवाप्नोति द्विजो वै नात्र संशयः ॥ ३१९ ॥

इति श्रीमहापुराणे वायुप्रोक्ते दक्षशापवर्णनं नाम त्रिंशोऽध्यायः ॥ ३० ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

VERSION-7

ब्रह्ममहापुराणे

॥ ब्रह्मोवाच ॥

एवं दृष्ट्वा तदा दक्षः शंभोर्वीर्यं द्विजोत्तमाः ।
प्राञ्जलिः प्रणतो भूत्वा संस्तोतुमुपचक्रमे ॥ १ ॥

॥ दक्ष उवाच ॥

नमस्ते देवदेवेश नमस्ते बलसूदन ।
देवेन्द्र त्वं बलश्रेष्ठ देवदानवपूजित ॥ २ ॥

सहस्राक्ष विरूपाक्ष त्र्यक्ष यक्षाधिपप्रिय ।
सर्वतः पाणिपादस्त्वं सर्वतोक्षिशिरोमुखः ॥ ३ ॥

सर्वतः श्रुतिमांल्लोके सर्वमावृत्य तिष्ठसि ।
शङ्कुकर्णो महाकर्णः कुम्भकर्णोऽर्णवालयः ॥ ४ ॥

गजेन्द्रकर्णो गोकर्णः शतकर्णो नमोऽस्तु ते ।
शतोदरः शतावर्तः शतजिह्वः सनातनः ॥ ५ ॥

गायन्ति त्वां गायत्रिणो अर्चयन्ति ह्यर्कर्मिणः ।
देवदानवगोप्ता च ब्रह्मा च त्वं शतक्रतुः ॥ ६ ॥

मूर्तिमांस्त्वं महामूर्तिः समुद्रः सरसां निधिः ।
त्वयि सर्वा देवता हि गावो गोष्ठ इवाऽऽसते ॥ ७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

त्वत्तः शरीरे पश्यामि सोममग्निं जलेश्वरम्।
आदित्यमथ विष्णुं च ब्रह्माणं सबृहस्पतिम्॥ ८॥

क्रिया करणकार्ये च कर्ता कारणमेव च।
असच्च सदसच्चैव तथैव प्रभवाप्ययौ॥ ९॥

नमो भवाय शर्वाय रुद्राय वरदाय च।
पशूनां पतये चैव नमोऽस्त्वन्धकघातिने॥ १०॥

त्रिजटाय त्रिशीर्षाय त्रिशूलवरधारिणे।
त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः॥ ११॥

नमश्चण्डाय मुण्डाय विश्वचण्डधराय च।
दण्डिने शङ्कुकर्णाय चण्डीचण्डाय वै नमः॥ १२॥

नमोऽर्धदण्डिकेशाय शुष्काय विकृताय च।
विलोहिताय धूम्राय नीलग्रीवाय वै नमः॥ १३॥

नमोऽस्त्वप्रतिरूपाय विरूपाय शिवाय च।
सूर्याय सूर्यपतये सूर्यध्वजपताकिने॥ १४॥

नमः प्रमथमाथाय वृषस्कन्धाय वै नमः।
नमो हिरण्यवर्णाय हिरण्यकवचाय च॥ १५॥

हिरण्यकृतचूडाय हिरण्यपतये नमः।
शत्रुघाताय चण्डाय पर्णसंघशयाय च॥ १६॥

नमः स्तुताय स्तुत्याय स्तूयमानाय वै नमः।
सर्वाय सर्वभक्षाय सर्वभूतान्तरात्मने॥ १७॥

नमो होमाय मन्त्राय शुक्लध्वजपताकिने।
नमोऽनम्याय नम्याय नमः किलकिलाय च॥ १८॥

नमस्त्वां शयमानाय शयितायोत्थिताय च।
स्थिताय धावमानाय भूताय कुटिलाय च॥ १९॥

नमो नर्तनशीलाय मुखवादित्रकारिणे।
बाधापहाय लुब्धाय गीतवादित्रकारिणे॥ २०॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नमो ज्येष्ठाय श्रेष्ठाय बलप्रमथनाय च ।
कल्पनाय च कल्प्याय क्षमायोपक्षमाय च ।
उग्राय च नमो नित्यं नमश्च दशबाहवे ।। २१ ।।

नमः कपालहस्ताय सितभस्मप्रियाय च ।
विभीषणाय भीमाय भीमव्रतधराय च ।। २२ ।।

नानाविकृतवक्त्राय खड्गजिह्वोग्रदंष्ट्रिणे ।
पक्षमासलवाद्याय तुम्बीवीणाप्रियाय च ।। २३ ।।

अघोरघोररूपाय घोराद्घोरतराय च ।
नमः शिवाय शान्ताय नमः शान्ततराय च ।। २४ ।।

नमो बुद्धाय शुद्धाय संविभागप्रियाय च ।
प्रपञ्चाय तथोग्राय नमः सांख्यपराय च ।। २५ ।।

नमश्चण्डैकघण्टाय घण्टानादाय घण्टिने ।
सहस्रशतघण्टाय घण्टामालाप्रियाय च ।। २६ ।।

प्राणदण्डाय नित्याय नमस्ते लोहिताय च ।
हूंहूंकाराय रुद्राय हूंहूंकारप्रियाय च ।। २७ ।।

नमोऽपारवते नित्यं गिरिवृक्षप्रियाय च ।
मार्गमासश्रृगालाय तारकाय तराय च ।
नमो यज्ञाधिपतये कृताय प्रकृताय च ।। २८ ।।

यज्ञवाहाय दान्ताय तथ्याय वितथाय च ।
नमस्तटाय तट्याय तटिनीपतये नमः ।। २९ ।।

अन्नदायान्नपतये नमस्त्वन्नभुजाय च ।
नमः सहस्रशीर्षाय सहस्रचरणाय च ।। ३० ।।

सहस्रोद्यतशूलाय सहस्रनयनाय च ।
नमो बालार्कवर्णाय बालरूपधराय च ।। ३१ ।।

नमो बालार्करूपाय बालक्रीडनकाय च ।
नमः शुद्धाय बुद्धाय क्षोभणाय क्षयाय च ।। ३२ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तरङ्गाङ्कितकेशाय मुक्तकेशाय वै नमः ।
नमः षट्कर्मतुष्टाय त्रिकर्मनिरताय च ॥ ३३ ॥

वर्णाश्रमाणां विधिवत्पृथग्धर्मप्रवर्तिने ।
नमः श्रेष्ठाय ज्येष्ठाय नमः कलकलाय च ॥ ३४ ॥

श्वेतपिङ्गलनेत्राय कृष्णरक्तेक्षणाय च ।
धर्मकामार्थमोक्षाय क्रथाय क्रथनाय च ॥ ३५ ॥

सांख्याय सांख्यमुख्याय योगाधिपतये नमः ।
नमो रथ्याधिरथ्याय चतुष्पथपथाय च ॥ ३६ ॥

कृष्णाजिनोत्तरीयाय व्यालयज्ञोपवीतिने ।
ईशान रुद्रसंघात हरिकेश नमोऽस्तु ते ॥ ३७ ॥

त्र्यम्बकायाम्बिकानाथ व्यक्ताव्यक्त नमोऽस्तु ते ।
काल कामद कामघ्न दुष्टोद्‌वृत्तनिवारण ॥ ३८ ॥

सर्वगर्हित सर्वघ्न सद्योजात नमोऽस्तु ते ।
उन्मादन शतावर्त गङ्गातोयार्द्रमूर्धज ॥ ३९ ॥

चन्द्रार्धसंयुगावर्त मेघावर्त नमोऽस्तु ते ।
नानार्थदानभर्त्ता च अर्थदश्च त्वमेव हि ॥ ४० ॥

अन्नस्रष्टा च भोक्ता च यज्ञभुक् च तथानलः ।
जरायुजाण्डजाश्चैव स्वेदजोद्भिज्ज एव च ॥ ४१ ॥

त्वमेव देवदेवेश भूतग्रामश्चतुर्विधः ।
चराचरस्य स्रष्टा त्वं प्रतिहर्ता त्वमेव च ॥ ४२ ॥

त्वमेव ब्रह्म विश्वेश अप्सु ब्रह्म वदन्ति ते ।
सर्वस्य परमा योनिः स्वधा त्वं ज्योतिषां निधिः ॥ ४३ ॥

ऋक्सामानि तथोंकारमाहुस्त्वां ब्रह्मवादिनः ।
हायि हायि हरे हायि हुवाहावेति वाऽसकृत् ॥ ४४ ॥

गायन्ति त्वां सुरश्रेष्ठाः सामगा ब्रह्मवादिनः ।
यजुर्मय ऋङ्मयस्त्वं सामाथर्वयुतस्तथा ॥ ४५ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सेव्यसे ब्रह्मविद्भिस्त्वं कल्पोपनिषदां गणैः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णाश्रमाश्च ये ॥ ४६ ॥

त्वमेवाऽऽश्रमसंघाश्च विद्युत्स्तनितमेव च ।
संवत्सरस्त्वमृतवो मासो मासार्धमेव च ॥ ४७ ॥

कलाः काष्ठा निमेषाश्च नक्षत्राणि युगानि च ।
वृषाणां ककुदं त्वं हि गिरीणां शिखराणि च ॥ ४८ ॥

सिंहो मृगाणां च पतिस्तक्षकोनन्तभोगिनाम् ।
क्षीरोदो ह्युदधीनां च मन्त्राणां यजुरेव च ॥ ४९ ॥

वज्रं प्रहरणानां च व्रतानां सत्यमेव च ।
त्वमेवेच्छा च द्वेषश्च रागो मोहः शमः क्षमा ॥ ५० ॥

व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ ।
त्वं गदी त्वं शरी चापी खट्वाङ्गी त्वं ध्वजी रथी ॥ ५१ ॥

छेत्ता भेत्ता प्रहर्ता च नेता मन्ताऽसि नो मतः ।
दशलक्षणसंयुक्तो धर्मोऽर्थः काम एव च ॥ ५२ ॥

इन्द्रः समुद्रः सरितः पल्वलानि सरांसि च ।
लता वल्ल्यस्तृणौषध्यः पशवो मृगपक्षिणः ॥ ५३ ॥

द्रव्यकर्मगुणारम्भः कालपुष्पफलप्रदः ।
आदिश्चान्तश्च मध्यश्च गायत्र्योंकार एव च ॥ ५४ ॥

हरितो लोहितः कृष्णो नीलः पीतस्तथाऽरुणः ।
कद्रुश्च कपिलो बभ्रुः कपोतो मेघकस्तथा ॥ ५५ ॥

सुवर्णरेता विख्यातः सुवर्णश्चाप्यथो मतः ।
सुवर्णनामा च तथा सुवर्णप्रिय एव च ॥ ५६ ॥

त्वमिन्दुश्च यमश्चैव वरुणो धनदोऽनलः ।
उत्फुल्लश्चित्रभानुश्च स्वर्भानुर्भानुरेव च ॥ ५७ ॥

होत्रं होता च होम्यं च हुतं चैव तथा प्रभुः ।
त्रिसौपर्णस्तथा ब्रह्मन्यजुषां शतरुद्रियम् ॥ ५८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम्।
गिरिः पापान्तको वृक्षो जीवः प्रलय एव च।
प्राणश्च त्वं रजश्च त्वं तमः सत्त्वयुतस्तथा ॥ ५९ ॥

प्राणोऽपानः समानश्च उद्वानो व्यान एव च।
उन्मेषश्च निमेषश्च कालः कल्पस्तथैव च ॥ ६० ॥

लोहिताङ्गश्च दंष्ट्री च महावक्त्रो महोदरः।
शुचिरोमा हरिच्छ्मश्रुरूर्ध्वकेशश्चलाचलः ॥ ६१ ॥

गीतवादित्रनृत्यांगो गीतावादनकप्रियः।
मत्स्यो जालो जलोऽजय्यो जलव्यालः कुटीचरः ॥ ६२ ॥

विकालश्च सुकालश्च दुष्कालः कालनाशनः।
मृत्युश्चैवाक्षयोऽन्तश्च क्षमामायाकरोत्करः ॥ ६३ ॥

संवर्त्तो वर्तकश्चैव संवर्तकबलाहकौ।
घण्टाकी घण्टकी घण्टी चूडालो लवणोदधिः ॥ ६४ ॥

ब्रह्मा कालाग्निवक्त्रश्च दण्डी मुण्डस्त्रिदण्डधृक्।
चतुर्युगश्चतुर्वेदश्चतुर्होत्रश्चतुष्पथः ॥ ६५ ॥

चातुराश्रम्यनेता च चातुर्वर्ण्यकरश्च हि।
क्षराक्षरः प्रियो धूर्तो गणैर्गण्यो गणाधिपः ॥ ६६ ॥

रक्तमाल्याम्बरधरो गिरीशो गिरिजाप्रियः।
शिल्पीशः शिल्पिनः श्रेष्ठः सर्वशिल्पप्रवर्तकः ॥ ६७ ॥

भगनेत्रान्तकश्चण्डः पूष्णो दन्तविनाशनः।
स्वाहा स्वधा वषट्कारो नमस्कार नमोऽस्तु ते ॥ ६८ ॥

गूढव्रतश्च गूढश्च गूढव्रतनिषेवितः।
तरणस्तारणश्चैव सर्वानुस्यूतचारणः ॥ ६९ ॥

धाता विधाता संधाता निधाता धरणीधरः।
तपो ब्रह्म च सत्यं च ब्रह्मचर्यं तथाऽऽर्जवम् ॥ ७० ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भूतात्मा भूतकृद्भूतो भूतभव्यभवोद्भवः ।
भूर्भूवः स्वरितश्चैव वृतो ह्यग्निर्महेश्वरः ॥ ७१ ॥

रेक्षणो दक्षिणाकान्तो दान्तोऽदान्तविनाशनः ।
ब्रह्मावर्तः सुरावर्तः कामावर्त नमोऽस्तु ते ।
कामबिम्बविनिर्हन्ता कर्णिकारस्रजप्रियः ॥ ७२ ॥

गोनेता गोप्रचारश्च गोवृषेश्वरवाहनः ।
त्रैलोक्यगोप्ता गोविन्दो गोप्ता गोगर्ग एव च ॥ ७३ ॥

अखण्डचन्द्राभिमुखः सुमुखो दुर्मुखोऽमुखः ।
चतुर्मुखो बहुमुखो रणेष्वभिमुखः सदा ॥ ७४ ॥

हिरण्यगर्भः शकुनिर्धनदोऽन्नपतिर्विराट् ।
अधर्महा महादक्षो दण्डधारी रणप्रियः ॥ ७५ ॥

तिष्ठन्स्थिरश्च स्थाणुश्च निष्कम्पश्च मुनिश्चलः ।
दुर्वारणो दुर्विषहो दुर्दर्पो दुरतिक्रमः ॥ ७६ ॥

दुर्धरो दुर्वशो नित्यो दुर्दमो विजयो जयः ।
शशः शशाङ्कनयनः शीतोष्णः क्षुत्तृषा जरा ॥ ७७ ॥

आधयो व्याधयश्चैव व्याधिहा व्यधिपश्च यः ।
सह्यो यज्ञमृगव्याधो व्याधीनामाकरोऽकरः ॥ ७८ ॥

शिखण्डी पुण्डरीकश्च पुण्डरीकावलोकनः ।
दण्डधृक्चक्रदण्डश्च रौद्रभागविनाशनः ॥ ७९ ॥

विषपोऽमृतपश्चैव सुरापः क्षीरसोमपः ।
मधुपश्चाऽऽपपश्चैव सर्वपश्च बलाबलः ॥ ८० ॥

वृषाङ्गबाह्यो वृषभस्तथा वृषभलोचनः ।
वृषभश्चैव विख्यातो लोकानां लोकसंस्कृतः ॥ ८१ ॥

चन्द्रादित्यौ चक्षुषी ते हृदयं च पितामहः ।
अग्निष्टोमस्तथा देहो धर्मकर्मप्रसाधितः ॥ ८२ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

न ब्रह्मा न च गोविन्दः पुराणऋषयो न च ।
माहात्म्यं वेदितुं शक्ता याथातथ्येन ते शिव ।। ८३ ।।

शिव या मूर्तयः सूक्ष्मास्ता मह्यं यान्तु दर्शनम् ।
ताभिर्मां सततं रक्ष पिता पुत्रमिवौरसम् ।। ८४ ।।

रक्ष मां रक्षणीयोऽहं तवानघ नमोऽस्तु ते ।
भक्तानुकम्पी भगवान्भक्तश्चाहं सदा त्वयि ।। ८५ ।।

यः सहस्राण्यनेकानि पुंसामावृत्य दुर्दशाम् ।
तिष्ठत्येकः समुद्रान्ते स मे गोप्ताऽस्तु नित्यशः ।। ८६ ।।

जितनिद्रा जितश्वासाः सत्वस्थाः समदर्शिनः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ।। ८७ ।।

संभक्ष्य सर्वभूतानि युगान्ते समुपस्थिते ।
यः शेते जलमध्यस्थस्तं प्रपद्येऽम्बशायिनम् ।। ८८ ।।

प्रविश्य वदनं राहोर्यः सोमं पिबते निशि ।
ग्रसत्यर्कं च स्वर्भानुर्भूत्वा सोमाग्निरेव च ।। ८९ ।।

अङ्गुष्ठमात्राः पुरुषा देहस्थाः सर्वदेहिनाम् ।
रक्षन्तु ते च मां नित्यं नित्यं चाऽऽप्याययन्तु माम् ।। ९० ।।

येनाप्युत्पादिता देवाः पंचत्वं च गताश्च ये ।
तेषां स्वाहा स्वधा चैव अहस्त्वाञ्च स्तुवन्ति च ।। ९१ ।।

यत्रारोहन्ति देहस्थाः प्राणिनोऽवतरन्ति च ।
हर्षयन्ति न कृष्यन्ति नमस्तेभ्योस्तु नित्यशः ।। ९२ ।।

ये समुद्रे नदीदुर्गे पर्वतेषु गुहासु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ।। ९३ ।।

चतुष्पथेषु रथ्यासु कान्तारेषु सभासु च ।
हस्त्यश्वरथशालासु जीर्णोद्यानालयेषु च ।। ९४ ।।

येषु पञ्चसु भूतेषु दिशासु विदिशासु च ।
इन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु ।। ९५ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

रसातलगता ये च ये च तस्मात्परं गताः ।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्योस्तु नित्यशः ॥ ९६ ॥

सर्वस्त्वं सर्वगो देवः सर्वभूतपतिर्भवः ।
सर्वभूतान्तरात्मा च तेन त्वं न निमन्त्रितः ॥ ९७ ॥

त्वमेव चेज्यसे देव यज्ञैर्विविधदक्षिणैः ।
त्वमेव कर्ता सर्वस्य तेन त्वं न निमन्त्रितः ॥ ९८ ॥

अथवा मायया देव मोहितः सूक्ष्मया तव ।
तस्मात्तु कारणाद्वाऽपि त्वं मया न निमन्त्रितः ॥ ९९ ॥

प्रसीद मम देवेश त्वमेव शरणं मम ।
त्वं गतिस्त्वं प्रतिष्ठा च नान्योऽस्तीति मतिर्मम ॥ १०० ॥

॥ ब्रह्मोवाच ॥

स्तुत्वैवं स महादेवं विरराम महामतिः ।
भगवानपि सुप्रीतः पुनर्दक्षमभाषत ॥ १०१ ॥

॥ श्रीभगवानुवाच ॥

परितुष्टोऽस्मि ते दक्ष स्तवेनानेन सुव्रत ।
बहुनाऽत्र किमुक्तेन मत्समीपं गमिष्यसि ॥ १०२ ॥

॥ ब्रह्मोवाच ॥

तथैवमब्रवीद्वाक्यं त्रैलोक्याधिपतिर्भवः ।
कृत्वाऽऽश्वासकरं वाक्यं सर्वज्ञो वाक्यसंहितम् ॥ १०३ ॥

॥ श्रीशिव उवाच ॥

दक्ष दुःखं न कर्तव्यं यज्ञविध्वंसनं प्रति ।
अहं यज्ञहनस्तुभ्यं दृष्टमेतत्पुराऽनघ ॥ १०४ ॥

भूयश्च त्वं वरमिमं मत्तो गृहणीष्व सुव्रत ।
प्रसन्नसुमुखो भूत्वा ममैकाग्रमनाः शृणु ॥ १०५ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
प्रजापते मत्प्रसादात्फलभागी भविष्यसि ॥ १०६ ॥

वेदान्षडङ्गान्बुध्यस्व सांख्ययोगांश्च कृत्स्नशः ।
तपश्च विपुलं तप्त्वा दुश्चरं देवदानवैः ॥ १०७ ॥

अब्दैर्द्वादशभिर्युक्तं सूक्ष्ममप्रज्ञनिन्दितम् ।
वर्णाश्रमकृतैर्धर्मैर्विनीतं न क्वचित्क्वचित् ॥ १०८ ॥

समागतं व्यवसितं पशुपाशविमोक्षणम् ।
सर्वेषामाश्रमाणां च मया पाशुपतं व्रतम् ॥ १०९ ॥

उत्पादितं दक्ष शुभं सर्वपापविमोचनम् ।
अस्य चीर्णस्य यत्सम्यक् फलं भवति पुष्कलम् ।
तथास्तु सुमहाभाग मानसस्त्यज्यतां ज्वरः ॥ ११० ॥

॥ ब्रह्मोवाच ॥

एवमुक्त्वा तु देवेशः सपत्नीकः सहानुगः ।
अदर्शनमनुप्राप्तो दक्षस्यामिततेजसः ॥ १११ ॥

अवाप्य च तथा भागं यथोक्तं चोमया भवः ।
ज्वरं च सर्वधर्मज्ञा बहुधा व्यभजत्तदा ॥ ११२ ॥

शान्त्यर्थं सर्वभूतानां शृणुध्वमथ वै द्विजाः ।
शिखाभितापो नागानां पर्वतानां शिलाजतु ॥ ११३ ॥

अपां तु नीलिकां विद्यान्निर्मोको भुजगेषु च ।
खोरकः सौरभेयाणामूखरः पृथिवीतले ॥ ११४ ॥

शुनामपि च धर्मज्ञा दृष्टिप्रत्यवरोधनम् ।
रन्ध्रागतमथाश्वानां शिखोद्भेदश्च बर्हिणाम् ॥ ११५ ॥

नेत्ररागः कोकिलानां ज्वरः प्रोक्तो महात्मनाम् ।
जनानामपि भेदश्च सर्वेषामिति नः श्रुतम् ॥ ११६ ॥

शुकानामपि सर्वेषां हिक्किका प्रोच्यते ज्वरः ।
शार्दूलेष्वथ वै विप्राः श्रमो ज्वर इहोच्यते ॥ ११७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मानुषेषु च धर्मज्ञा ज्वरो नामैष कीर्तितः ।
मरणे जन्मनि तथा मध्ये चापि निवेशितः ॥ ११८ ॥

एतन्माहेश्वरं तेजो ज्वरो नाम सुदारुणः ।
नमस्यश्चैव मान्यश्च सर्वप्राणिभिरीश्वरः ॥ ११९ ॥

इमां ज्वरोत्पत्तिमदीनमानसः पठेत्सदा यस्तु समाहितो नरः ।
विमुक्तरोगः स नरो मुदा युतो लभेत कामांश्चयथामनीषि-
तान् ॥१२० ॥

दक्षप्रोक्तं स्तवं चापि कीर्तयेद्यः श्रृणोति वा ।
नाशुभं प्राप्नुयात्किंचिद्दीर्घमायुरवाप्नुयात् ॥ १२१ ॥

यथा सर्वेषु देवेषु वरिष्ठो भगवान्भवः ।
तथा स्तवो वरिष्ठोऽयं स्तवानां दक्षनिर्मितः ॥ १२२ ॥

यशः स्वर्गसुरैश्वर्यवित्तादिजयकाङ्क्षिभिः ।
स्तोतव्यो भक्तिमास्थाय विद्याकामैश्च यत्नतः ॥ १२३ ॥

व्याधितो दुःखितो दीनो नरो ग्रस्तो भयादिभिः ।
राजकार्यनियुक्तो वा मुच्यते महतो भयात् ॥ १२४ ॥

अनेनैव च देहेन गणानां च महेश्वरात् ।
इह लोके सुखं प्राप्य गणराडुपपद्यते ॥ १२५ ॥

न यक्षा न पिशाचा वा न नागा न विनायकाः ।
कुर्युर्विघ्नं गृहे तस्य यत्र संस्तूयते भवः ॥ १२६ ॥

श्रृणुयाद्वा इदं नारी भक्त्याऽथ भवभाविता ।
पितृपक्षे भर्तृपक्षे पूज्या भवति चैव हि ॥ १२७ ॥

श्रृणुयाद्वा इदं सर्वं कीर्तयेद्वाऽप्यभीक्ष्णशः ।
तस्य सर्वाणि कार्याणि सिद्धिं गच्छन्त्यविघ्नतः ॥ १२८ ॥

मनसा चिन्तितं यच्च यच्च वाचाऽप्युदीरितम् ।
तत्तत्संपद्यते तस्य स्तवस्यास्यानुकीर्तनात् ॥ १२९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

देवस्य सगुहस्याथ देव्या नन्दीश्वरस्य च।
बलिं विभवतः कृत्वा दमेन नियमेन च ॥ १३० ॥

ततः प्रयुक्तो गृह्णीयान्नामान्याशु यथाक्रमम्।
ईप्सितांल्लभतेऽप्यर्थान्कामान्भोगांश्च मानवः ॥ १३१ ॥

मृतश्च स्वर्गमाप्नोति स्त्रीसहस्रसमावृतः।
सर्वकामसुयुक्तो वा युक्तो वा सर्वपातकैः ॥ १३२ ॥

पठन्दक्षकृतं स्तोत्रं सर्वपापैः प्रमुच्यते।
मृतश्च गणसायुज्यं पूज्यमानः सुरासुरैः ॥ १३३ ॥

वृषेण विनियुक्तेन विमानेन विराजते।
आभूतसंप्लवस्थायी रुद्रस्यानुचरो भवेत् ॥१३४ ॥

इत्याह भगवान्व्यासः पराशरसुतः प्रभुः।
नैतद्वेदयते कश्चिन्नैतच्छ्राव्यं च कस्यचित् ॥१३५ ॥

श्रुत्वेमं परमं गुह्यं येऽपि स्युः पापयोनयः।
वैश्याः स्त्रियश्च शूद्राश्च रुद्रलोकमवाप्नुयुः ॥१३६ ॥

श्रावयेद्यश्च विप्रेभ्यः सदा पर्वसु पर्वसु।
रुद्रलोकमवाप्नोति द्विजो वै नात्र संशयः ॥१३७ ॥

इति श्रीब्रह्मपुराणे स्वयंभ्वृषिसंवादे दक्षस्तवनिरूपणं नामाष्टत्रिंशोऽध्यायः ॥३८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

VERSION-8

महाभागवतेदेवीपुराणम्

सप्तषष्टितमोऽध्यायः

भगीरथ उवाच—

ऊँ नमस्ते पार्वतीनाथ देवदेव परात्पर ।
अच्युतानघ पञ्चास्य भीमास्य रुचिरानन ॥ १ ॥

व्याघ्राजिनधरानन्त पारावारविवर्जित ।
पञ्चानन महासत्त्व महाज्ञानमय प्रभो ॥ २ ॥

अजितामित दुर्धर्ष विश्वेश परमेश्वर ।
विश्वात्मन्विश्वभूतेश विश्वाश्रय जगत्पते ॥ ३ ॥

विश्वोपकारिन्विश्वैकवाम विश्वाश्रयाश्रय ।
विश्वाधार सदानन्द विश्वानन्द नमोऽस्तु ते ॥ ४ ॥

शर्व सर्वविदज्ञानविवर्जित सुरोत्तम ।
सुरवन्द्य सुरस्तुत्य सुरराज सुरोत्तम ॥ ५ ॥

सुरपूज्य सुरध्येय सुरेश्वर सुरान्तक ।
सुरारिमर्दक सुरश्रेष्ठ तेऽस्तु नमो नमः ॥ ६ ॥

त्वं शुद्धः शुद्धवोधश्च शुद्धात्मा जगतां पतिः ।
शम्भुः स्वयम्भूरत्युग्र उग्रकर्मोग्रलोचनः ॥ ७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

उग्रप्रभावः क्षांत्युग्रमर्दकोत्युग्ररूपवान् ।
उग्रकण्ठः शिवः शान्तः सर्वशान्तिविधायकः ॥ ८ ॥

सर्वार्थदः शिवाधारः शिवावनिरमित्रजित् ।
शिवदः शिवकर्ता चाशिवहन्ता शिवेश्वरः ॥ ९ ॥

शिशुर्शैशवयुक्तश्च पिङ्गकेशो जटाधरः ।
गङ्गाधरः कपर्दी च जटाजूटविराजितः ॥ १० ॥

जटिलो जटिलाराध्यः सर्वदोन्मत्तमानसः ।
उन्मत्तकेश उन्मत्त उन्मत्तानामधीश्वरः ॥ ११ ॥

उन्मत्तलोचनो भीमस्त्रिनेत्रो भीमलोचनः ।
बहुनेत्रो द्विनेत्रो वै रक्तनेत्रः सुनेत्रकः ॥ १२ ॥

दीर्घनेत्रश्च पिङ्गाक्षः सुप्रभाक्ष्यः सुलोचनः ।
सोमनेत्रोऽग्निनेत्राख्यः सूर्यनेत्रः सुवीर्यवान् ॥ १३ ॥

पद्माक्षः कमलाक्षश्च नीलोत्पलदलेक्षणः ।
सुलक्षणः शूलपाणिः कपाली कपिलेक्षणः ॥ १४ ॥

व्याघूर्णनयनो धूर्तो व्याघ्रचर्माम्बरावृतः ।
श्रीकण्ठो नीलकण्ठाख्यः शितिकण्ठः सुकण्टकः ॥ १५ ॥

चन्द्रचूडश्चन्द्रधरश्चन्द्रमौलिः शशाङ्कभृत् ।
शशिकान्तः शशाङ्कांतः शशाङ्काङ्किमूर्धजः ॥ १६ ॥

शशाङ्कवदनो वीरो वरदो वरलोचनः ।
शरच्चन्द्रसमाभासः शरदिन्दुसमप्रभः ॥ १७ ॥

कोटिसूर्यप्रतीकाशश्चन्द्रास्यश्चद्रशेखरः ।
अष्टमूर्तिर्महामूतिर्भीममूर्तिर्भयानकः ॥ १८ ॥

भयदाता भयत्राता भयहर्तृभयोज्झितः ।
निर्मूलो भूतवन्द्यश्च भूतात्मा भूतभावनः ॥ १९ ॥

कौपीनवासा दुर्वासा विवासाः कामिनीपतिः ।
करालः कीर्तिदो वैद्यः किशोरः कामनाशनः ॥ २० ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कीर्तिरूपः कुन्तधारी कालकूटकृताशनः ।
कालकूटसुरूपी च कुलमन्त्रप्रदीपकः ॥ २१ ॥

कलाकाष्ठात्मकः काशीविहारी कुटिलाननः ।
महाकाननसंवासो कालीप्रीतिविवर्धनः ॥ २२ ॥

कालीचरः कामचारिकुलकीर्तिविवर्धनः ।
कामाद्रिः कामुकवरः कार्मुकी काममोहितः ॥ २३ ॥

कटाक्षः कनकाभासः कनकोज्ज्वलगात्रकः ।
कामातुरः क्वणत्पादः कुटिलभ्रुकुटीधरः ॥ २४ ॥

कार्तिकेयपिता कोकनदभूषणभूषितः ।
खट्वाङ्गयोद्धा खड्गी च गिरीशो गगनेश्वरः ॥ २५ ॥

गणाध्यक्षः खेटकधृक् खर्वः खर्वतरः खगः ।
खगारूढः खगाराध्यः खेचरः खेचरेश्वरः ॥ २६ ॥

खेचरत्वप्रदः क्षोणीपतिः खेचरमर्दकः ।
गणेश्वरो गणपिता गरिष्ठो गणभूपतिः ॥ २७ ॥

गुरुर्गुरुतरो ज्ञेयो गङ्गापतिरमर्षणः ।
गीतप्रियो गीतरसः सुगोप्यो गोपवृन्दपः ॥ २८ ॥

गवारूढो जगद्भर्ता गोस्वामी गोस्वरूपकः ।
गोप्रदो गोचरो गृध्रो गरुत्मान् गोकृतासनः ॥ २९ ॥

गोपीशो गुरुतापश्च गुहावासी सुगोपितः ।
गजारूढो गजास्यश्च गजाजिनधरोऽग्रजः ॥ ३० ॥

ग्रहाध्यक्षो ग्रहगणो दुष्टग्रहविमर्दकः ।
मानरूपी गानरतः प्रचण्डी गानविह्वलः ॥ ३१ ॥

गानमत्तो गुणी गुह्यो गुणग्रामाशयो गुणः ।
गूढबुद्धिर्गूढमूर्तिर्गूढपादविभूषितः ॥ ३२ ॥

गोप्ता गोलोकवासी च गुणवान्गुणिनां वरः ।
हरी हरितवर्णाक्षो मृत्युर्मृत्युञ्जयो हरिः ॥ ३३ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

हव्यभुग्हरिसम्पूज्यो हविर्हविर्भुजां वरः ।
अनादिरादिः सर्वाद्य आदितेयवरप्रदः ॥ ३४ ॥

अनन्तविक्रमी लोके लोकानां पापहारकः ।
गीष्पतिः सद्गुणोपेतः सगुणो निर्गुणो गुणी ॥ ३५ ॥

गुणप्रीतो गुणवरो गिरिजानायको गिरिः ।
गौरीभर्ता गुणाढ्यश्च गोश्रेष्ठासनसंस्थितः ॥ ३६ ॥

पद्मासनः पद्मनेत्रः पद्मतुष्टः सुपद्मकः ।
पद्मवक्त्रः पद्मकरः पद्मरूढपदाम्बुजः ॥ ३७ ॥

पद्मप्रियतमः पद्मालयः पद्मप्रकाशकः ।
पद्मकाननसंवासः पद्मकाननभुञ्जकः ॥ ३८ ॥

पद्मकाननसंवासो पद्मारण्यकृतालयः ।
प्रफुल्लवदनोत्फुल्लकमलाक्षप्रफुल्लकृत् ॥ ३९ ॥

फुल्लेन्दीवरसन्तुष्टः प्रफुल्लकमलासनः ।
फुल्लाम्भोजकरोत्फुल्लमानसः पापहारकः ॥ ४० ॥

पापापहारी पुण्यात्मा पुण्यकीर्तिः सुपुण्यवान् ।
पुण्यः पुण्यतमो धन्यः सुपूतात्मा परात्मकः ॥ ४१ ॥

पुण्येशः पुण्यदः पुण्यनिरतः पुण्यभाजनः ।
परोपकारी पापिष्ठचालकःपापहारकः ॥ ४२ ॥

पुरातनः पूर्वहीनः परद्रोहविवर्जितः ।
पीवरः पीवरमुखः पीनकामः पुरान्तकः ॥ ४३ ॥

पाशी पशुपतिः पाशहस्तः पाषाणविट्पतिः ।
पलात्मकः परावेता पाशवद्धविमोचकः ॥ ४४ ॥

पशूनामधिपः पाशच्छेत्ता पाशविभेदकः ।
पाषाणधारी पाषाणशयानः पाशिपूजितः ॥ ४५ ॥

पश्वारूढः पुण्यधनुः पुष्पवृन्दसुपूजितः ।
पुण्डरीकः पीतवासा पुण्डरीकाक्षवल्लभः ॥ ४६ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पानपात्रकरः पानमत्तः पानातिभूतकः ।
पोष्टा पोष्टवरः पूतः परित्राताऽखिलेश्वरः ॥ ४७ ॥

पुण्डरीकाक्षकर्ता च पुण्डरीकाक्षसेवितः ।
पल्लवस्थः प्रपीठस्थः पीठभूमिनिवासकः ॥ ४८ ॥

पिता पितामहः पार्थप्रसन्नाभीष्टदायकः ।
पितॄणां प्रीतिकर्ता च प्रीतिदः प्रीतिभाजनः ॥ ४९ ॥

प्रीत्यात्मकः प्रीतिवशी सुप्रीतः प्रीतिकारकः ।
प्रीतिहृत्प्रीतिरूपात्मन् प्रीतियुक्तस्त्वमेव हि ॥ ५० ॥

प्रणतार्तिहरः प्राणवल्लभः प्राणदायकः ।
प्राणी प्राणस्वरूपश्च प्राणग्राही सुनिर्दयः ॥ ५१ ॥

प्राणनाथः प्रीतमनाः सर्वेषां प्रपितामहः ।
वृद्धः प्रवृद्धरूपश्च प्रेतः प्रणयिनां वरः ॥ ५२ ॥

पराधीशः परं ज्योतिः परनेत्रः परात्मकः ।
पारुष्यरहितः पुत्री पुत्रदः पुत्ररक्षकः ॥ ५३ ॥

पुत्रप्रियः पुत्रवश्यः पुत्रवत्परिपालकः ।
परित्राता परावासः परचेताः परेश्वरः ॥ ५४ ॥

पतिः सर्वस्य सम्पाल्यः पवमानः परान्तकः ।
पुरहा पुरुहूतश्च त्रिपुरारिः पुरान्तकः ॥ ५५ ॥

पुरन्दरातिसम्पूज्यः प्रधर्षो दुष्प्रधर्षणः ।
पटुः पटुतरः प्रौढः प्रपूज्यः पर्वतालयः ॥ ५६ ॥

पुलिनस्थः पुलस्त्याख्यः पिङ्गचक्षुः प्रपन्नगः ।
अभीरुरसिताङ्गश्च चण्डरूपः सिताङ्गकः ॥ ५७ ॥

सर्वविद्याविनोदश्च सर्वसौख्ययुतः सदा ।
सुखहर्ता सर्वमुखी सर्वलोकैकपावनः ॥ ५८ ॥

सदावनः सारदश्च सुसिद्धः शुद्धरूपकः ।
सारः सारतरः सूर्यः लोभः सर्वप्रकाशकः ॥ ५९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सोममण्डलधारी च समुद्रः सिन्धुरूपवान्।
सुरज्येष्ठः सुरश्रेष्ठः सुरासुरनिषेवितः ॥ ६० ॥

सर्वधर्मविनिर्मुक्तः सर्वलोकनमस्कृतः।
सर्वाचारयुतः सौरः शाक्तः परमवैष्णवः ॥ ६१ ॥

सर्वधर्मविधानज्ञः सर्वाचारपरायणः।
सर्वरोगप्रशमनः सर्वरोगापहारकः ॥ ६२ ॥

प्रकृष्टात्मा महात्मा च सर्वधर्मप्रदर्शकः।
सर्वसम्पद्युतः सर्वसम्पद्दानसमेक्षणः ॥ ६३ ॥

सहास्यवदनो हास्यमुक्तः प्रहसिताननः।
साक्षी समक्षवक्ता च सर्वदर्शी समस्तवित् ॥ ६४ ॥

सकलज्ञः समर्थज्ञः सुमनाः शैवपूजितः।
शोकप्रशमनः शोकहन्ताऽशोच्यः शुभान्वितः ॥ ६५ ॥

शैलज्ञः शैलजानाथः शैलनाथः शनैश्चरः।
शशाङ्कसदृशज्योतिः शशाङ्कार्धविराजितः ॥ ६६ ॥

साधुप्रियः साधुतमः साध्वीपतिरलौकिकः।
शून्यरूपः शून्यदेहः शून्यस्थः शून्यभावनः ॥ ६७ ॥

शून्यगामी श्मशानस्थः श्मशानाधिपतिः सुवाक्।
शतसूर्यप्रभः सूर्यः सूर्यदीप्तः सुरारिहा।
शुभान्वितः शुभतनुः शुभबुद्धिः शुभात्मकः ॥ ६८ ॥

शुभान्विततनुः शुक्लतनुः शुक्लप्रभान्वितः।
सुशौक्लः शुक्लदशनः शुक्लाभः शुक्लमाल्यधृक् ॥ ६९ ॥

शुक्लपुष्पप्रियः शुक्लवसनः शुक्लकेतनः।
शेषालङ्करणः शेषरहितः शेषवेष्टितः ॥ ७० ॥

शेषारूढः शेषशायी शेषाङ्गदविराजितः।
सतीप्रियश्च साशंकः समदर्शी समाधिमान् ॥ ७१ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सत्सङ्गी सत्प्रियः सङ्गो निःसङ्गो सङ्गवर्जितः ।
सहिष्णुः शाश्वतैश्वर्यः सामगानरतः सदा ॥ ७२ ॥

सामवेत्ता साम्यतरः श्यामापतिरशेषभुक् ।
तारिणीपतिराताम्रनयनस्त्वरिताप्रियः ॥ ७३ ॥

सारात्मकस्त्वग्वसनस्तरुणीरमणे रतः ।
तृप्तिरूपस्तृप्तिकर्ता तारकारिनिषेवितः ॥ ७४ ॥

वायुकेशो भैरवेशो भवानीशो भवान्तकः ।
भवबन्धुर्भवहरो भवबन्धनमोचकः ॥ ७५ ॥

अभिभूतोऽभिभूतात्मा सर्वभूतप्रमोहकः ।
भुवनेशो भूतपूज्यो भोगमोक्षफलप्रदः ॥ ७६ ॥

दयालुर्दीननाथश्च दुःसहो दैत्यमर्दकः ।
दक्षकन्यापतिर्दुःखनाशको धनधान्यदः ॥ ७७ ॥

दयावान् दैवतश्रेष्ठो देवगन्धर्वसेवितः ।
नानायुधधरो नानापुण्यगुच्छविराजितः ॥ ७८ ॥

नानासुखप्रदो नानामूर्तिचारी च नर्तकः ।
नित्यविज्ञानसंयुक्तो नित्यरूपोऽनिलोऽनलः ॥ ७९ ॥

लब्धवर्णो लघुतरो लघुत्वपरिवर्जितः ।
लोलाक्षो लोकसम्पूज्यो लावण्यपरिसंयुतः ॥ ८० ॥

नूपुरीन्याससंस्थश्च नागेशो नगपूजितः ।
नारायणो नारदश्च नानाभरणभूषितः ॥ ८१ ॥

नगभूतो नग्नदेशो नग्नः सानन्दमानसः ।
नभस्यो नतनाभिश्च नम्रमूर्धाभिवन्दितः ॥ ८२ ॥

नन्दिकेशो नन्दिपूज्यो नानानीरजभव्यगः ।
नवीनविल्वपत्रौघतुष्टो नवघनद्युतिः ॥ ८३ ॥

नन्दः सानन्द आनन्दमयश्चानन्दविह्वलः ।
नालसंस्थः शोभनस्थः सुस्थः सुस्थमतिस्तथा ॥ ८४ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्वल्पासनो भीमरुचिर्भुवनान्तकराम्बुदः ।
आसन्नः सिकतालीनो वृषासीनो वृषासनः ॥ ८५ ॥

वैरस्यरहितो वार्यो व्रती व्रतपरायणः ।
ब्राह्म्यो विद्यामयो विद्याभ्यासी विद्यापतिस्तथा ॥ ८६ ॥

घण्टाकारो घोटकस्थो घोररावघनस्वनः ।
छूर्णचक्षुरघूर्णात्मा घोरहासो गभीरधीः ॥ ८७ ॥

चण्डीपतिश्चण्डमूर्तिश्चंडमुण्डी प्रचण्डवाक् ।
चितासंस्थश्चितावासश्चितिदण्डकरः सदा ॥ ८८ ॥

चिताभस्माभिसंलिप्तश्चितानृत्यपरायणः ।
चिंताप्रमोदो चित्साक्षी चिन्तामणिरचिन्तकः ॥ ८९ ॥

चतुर्वेदमयश्चक्षुश्चतुराननपूजितः ।
चिरवासाश्चकोराक्षश्चलन्मूर्तिश्चिलेक्षणः ॥ ९० ॥

चलत्कुण्डलभूषाढ्यश्चलद्भूषणभूषितः ।
चलन्नेत्रश्चलत्पादश्चलन्नूपुरराजितः ॥ ९१ ॥

स्थावरः स्थिरमूर्तिश्च स्थावरेशः स्थिरासनः ।
स्थापकास्थैर्यनिरतः स्थूलरूपी स्थलालयः ॥ ९२ ॥

स्थैर्यातिपः स्थितिपरः स्थाणुरूपी स्थलाधिपः ।
ऐहिको मदनांतश्च महीमण्डलपूजितः ॥ ९३ ॥

महीप्रियो मत्तरवो मीनकेतुविमर्दकः ।
मीनरूपो मीनसंस्थो मृगहस्तो मृगासनः ॥ ९४ ॥

मार्गस्थो मेखलायुक्तो मैथिलीश्वरपूजितः ।
मिथ्याहीनो मङ्गलदो माङ्गल्यो मकरासनः ॥ ९५ ॥

मत्स्यप्रियो मधुरगीर्मधुपानपरायणः ।
मृदुवाक्यपरः सौरप्रियो मोदान्वितस्तथा ॥ ९६ ॥

मुण्डालिर्भूषणो दण्डी उद्दण्डोज्ज्वललोचनः ।
असाध्यसाधकः शूरसेव्यः शोकापनोदनः ॥ ९७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

श्रीपतिः श्रीसुसेव्यश्च श्रीधरः श्रीनिकेतनः ।
श्रीमतां श्रीस्वरूपश्च श्रीमाञ्श्रीनिलयस्तथा ॥ ९८ ॥

श्रमादिक्लेशरहितः श्रीनिवासः श्रियान्वितः ।
श्रद्धालुः श्राद्धदेवश्च श्राद्धो मधुरवाक्तथा ॥ ९९ ॥

प्रलयाग्न्यर्कसंकाशः प्रमत्तनयनोज्ज्वलः ।
असाध्यसाधकः शूरसेव्यः शोकापनोदनः ॥ १०० ॥

विश्वभूतमयो वैश्वानरनेत्रोऽधिमोहकृत् ।
लोकत्राणपरोऽपारगुणः पारविवर्जितः ॥ १०१ ॥

अग्निजिह्वो द्विजास्यश्च विश्वास्यः सर्वभूतधृक् ।
खेचरः खेचराधीशो सर्वगः सार्वलौकिकः ॥ १०२ ॥

सेनानीजनकः क्षुब्धाब्धिवारिक्षोभविनाशकः ।
कपालविलसद्धस्तः कमण्डलुभृदर्चितः ॥ १०३ ॥

केवलात्मस्वरूपश्च केवलज्ञानरूपकः ।
व्योमालयनिवासी च बृहद्व्योमत्वरूपकः ॥ १०४ ॥

अम्भोजनयनाम्भोधिशयानः पुरुषातिगः ।
निरालम्बावलम्बश्च सम्भागानन्यरूपकः ॥ १०५ ॥

योगनिद्रामयो लोकप्रमोहापहरात्मकः ।
बृहद्वक्त्रो बृहन्नेत्रो बृहद्बाहुर्बृहद्बलः ॥ १०६ ॥

बृहत्सर्पाङ्गदो दुष्टबृहद्बालविमर्दकः ।
बृहद्भुजबलोन्मत्तो बृहत्तुण्डो बृहद्वपुः ॥ १०७ ॥

बृहदैश्वर्ययुक्तश्च बृहदैश्वर्यदः स्वयम् ।
बृहत्सम्भोगसन्तुष्टो बृहदानन्ददायकः ॥ १०८ ॥

बृहज्जटाजूटधरो बृहन्माली बृहद्धनुः ।
इन्द्रियाधिष्ठितः सर्वलोकेन्द्रियविमोहकृत् ॥ १०९ ॥

सर्वेन्द्रियप्रवृत्तिकृत् सर्वेन्द्रियनिवृत्तिकृत् ।
प्रवृत्तिनायकः सर्वविपत्तिपरिनाशकः ॥ ११० ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रवृत्तिमार्गनेता त्वं स्वतन्त्रेच्छामयः स्वयम्।
सत्प्रवृत्तिरतो नित्यं दयानन्दशिवाधरः ॥ १११ ॥

क्षितिरूपस्तोयरूपी विश्वतृप्तिकरस्तथा।
तर्पस्तर्पणसम्प्रीतिस्तर्पकस्तर्पणात्मकः ॥ ११२ ॥

तृप्तिकारणभूतश्च सर्वतृप्तिप्रसाधकः।
अभेदाभेदकोच्छिद्यच्छेदकोऽछेद्य एव हि ॥ ११३ ॥

अचिन्तधन्वाच्छिन्नेषुरच्छिन्नध्वजवाहनः।
अघृष्टः समघृष्टास्त्रः समघृष्ट्यबलोन्नतः ॥ ११४ ॥

चित्रयोधी चित्रकर्मा विश्वसङ्कर्षकः स्वयम्।
भक्तानामीप्सितकरः सर्वेप्सितफलप्रदः ॥ ११५ ॥

वाञ्छिताभीष्टफलदो भिन्नज्ञानप्रवर्तकः।
बोधनात्मा बोधनार्थातिगः सर्वप्रबोधकृत् ॥ ११६ ॥

त्रिजटश्चैकजटिलश्चलज्जूटभयानकः।
जटाटीनो जटाजूटस्पृष्टावरवचः स्वयम् ॥ ११७ ॥

षाणमातुरस्य जनकः शक्तिप्रहरतां वरः।
अनर्घास्त्रप्रहारी वानर्घधन्वा महार्घ्यपात् ॥ ११८ ॥

योनिमण्डलमध्यस्थः मूखयोनिरजृम्भनः।
महाद्रिसदृशः श्वेतः श्वेतपुष्पस्रगन्वितः ॥ ११९ ॥

मकरन्दप्रियो नित्यं मासर्तुहायनात्मकः।
नानापुष्पप्रसूर्नानापुष्पैरर्चितगात्रकः ॥ १२० ॥

षडङ्गयोगनिरतः सदायोगार्द्रमानसः।
सुरासुरनिषेव्याङ्घ्रिर्विलसत्पादपङ्कजः ॥ १२१ ॥

सुप्रकाशितवक्त्राब्जः सितेतरगलोज्वलः।
वैनतेयसमारूढः शरदिन्दुसहस्रवत् ॥ १२२ ॥

जाज्वल्यमानं तेजोभिर्ज्वालापुञ्जो यमः स्वयम्।
प्रज्वलद्विद्युदाभश्च साट्टहासभयङ्करः ॥ १२३ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रलयानलरूपी च प्रलयाग्निरुचिः स्वयम्।
जगतामेकपुरुषो जगतां प्रलयात्मकः ॥ १२४ ॥

प्रसीद त्वं जगन्नाथ जगद्योने नमोऽस्तु ते ॥ १२५ ॥

श्री महादेव उवाच—

एवं नामसहस्रेण राज्ञा वै संस्तुतो हरः ।
प्रत्यक्षमगमत्तस्य सुप्रसन्नमुखाम्बुजः ॥ १२६ ॥

स तं विलोक्य त्रिदशैकनाथं पञ्चाननं श्वेतरुचिं प्रसन्नम्।
वृषाधिरूढं भुजगाङ्गदैर्युतं ननर्त राजा धरणीभुजां वरः ॥ १२७ ॥

प्रोवाच चेदं परमेश्वराद्य मे एतानि सर्वाणि सुखार्थकानि ।
तपश्च होमश्च मनुष्यजन्म यत्त्वां प्रपश्यामि दृशा परेशम्॥ १२८ ॥

मत्तो न धन्योस्ति महीतले वा स्वर्गे यतस्त्वं मम नेत्रगोचरः ।
सुरासुराणामपि दुर्लभेक्षणः परात्परः पूर्णमयो निरामयः ॥ १२९ ॥

ततस्तमेवं प्रतिभाषमाणं प्राह प्रसन्नार्तिहरो महेश्वरः ।
किं ते मनोवाञ्छितमेव विद्यते वृणुष्व तत्पुत्र ददामि तुभ्यम्॥ १३० ॥

स चाह पूर्वं कपिलस्य शापतः पातालरन्ध्रे मम पूर्ववंशजाः ।
भस्मीबभूवुः सगरस्य पुत्रा महाबला देवसमानविक्रमाः ॥ १३१ ॥

तेषां तु निस्तारणकाम्यया ह्यहं गङ्गां धरण्यामभिनेतुमीहे ।
सा तु त्वदीया परमा हि शक्तिः विनाज्ञया ते नहि याति पृथ्वीम् ॥१३२ ॥

तदेतदिच्छामि समेत्य गङ्गा क्षितौ महावेगवती महानदी ।
प्रविश्य तस्मिन्विवरे महेश्वरी पुनातु सर्वान्सगरस्य पुत्रान्॥ १३३ ॥

इत्येवमाकर्ण्य वचः परेश्वरः प्रोवाच वाक्यं क्षितिपालपुङ्गवम्।
मनोरथस्तेऽयमवेहि पूर्णो मम प्रसादादचिराद्भविष्यति ॥ १३४ ॥

ये चापि मां भक्तित एव मर्त्याः स्तोत्रेण चानेन नृप स्तुवन्ति ।
तेषां तु पूर्णाः सकला मनोरथा ध्रुवं भविष्यन्ति मम प्रसादात् ॥ १३५ ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इत्येवं स वरं लब्ध्वा राजा हृष्टमनास्ततः ।
दण्डवत्प्रणिपत्याह धन्योऽहं त्वत्प्रसादतः ।। १३६ ।।

ततश्चान्तर्दधे देवः क्षणादेव महामते ।
राजा निर्वृतचेताः स बभूव मुनिसत्तम ।। १३७ ।।

राज्ञा कृतमिदं स्तोत्रं सहस्रनामसंज्ञकम् ।
यः पठेत्परया भक्त्या सं कैवल्यमवाप्नुयात् ।। १३८ ।।

न चेह दुःखं कुत्रापि जायते तस्य नारद ।
जायते परमैश्वर्यं प्रसादाच्च महेशितुः ।। १३९ ।।

महापदि भये घोरे यः पठेत्स्तोत्रमुत्तमम् ।
शम्भोर्नामसहस्राख्यं सर्वमङ्गलवर्धनम् ।। १४० ।।

महाभयहरं सर्वं सुखसम्पत्तिदायकम् ।
स मुच्यते महादेवप्रसादेन महाभयात् ।। १४१ ।।

दुर्भिक्ष्ये लोकपीडायां देशोपद्रव एव वा ।
सम्पूज्य परमेशानं धूपदीपादिभिर्मुने ।। १४२ ।।

यः पठेत्परया भक्त्या स्तोत्रं नामसहस्रकम् ।
न तस्य देशे दुर्भिक्षं न च लोकादिपीडनम् ।। १४३ ।।

न चान्योपद्रवो वापि भवेदेतत्सुनिश्चितम् ।
पर्जन्योऽपि यथाकालं वृष्टिं तत्र करोति हि ।। १४४ ।।

यत्रेदं पठ्यते स्तोत्रं सर्वपापप्रणाशनम् ।
सर्वसस्ययुता पृथ्वी तस्मिन्देशे भवेद्ध्रुवम् ।। १४५ ।।

न दुष्टबुद्धिर्लोकानां तत्रस्थानां भवेदपि ।
नाकाले मरणं तत्र प्राणिनां जायते मुने ।। १४६ ।।

न हिंस्रास्तत्र हिंसन्ति देवदेवप्रसादतः ।
धन्या देशाः प्रजा धन्या यत्र देशे महेश्वरम् ।। १४७ ।।

सम्पूज्य पार्थिवं लिङ्गं पठेद्यत्रेदमुत्तमम् ।
चतुर्दश्यां तु कृष्णायां फाल्गुने मासि भक्तितः ।। १४८ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यः पठेत्परमेशस्य नाम्नां दशशताख्यकम् ।
स्तोत्रमत्यन्तसुखदं न पुनर्जन्मभाग्भवेत् ।। १४९ ।।

वायुतुल्यवलो नूनं विहरेद्धरणीतले ।
धनेशतुल्यो धनवान्कन्दर्पसमरूपवान् ।। १५० ।।

विहरेद्देवतातुल्यो निग्रहानुग्रहे क्षमः ।
गङ्गायां वा कुरुक्षेत्रे प्रयागे वा महेश्वरम् ।
परिपूज्य पठेद्यस्तु स कैवल्यमवाप्नुयात् ।। १५१ ।।

काश्यां यस्तु पठेदेतत्स्तोत्रं परममङ्गलम् ।
तस्य पुण्यं मुनिश्रेष्ठ किमहं कथयामि ते ।। १५२ ।।

एतत्स्तोत्रप्रसादेन स जीवन्नेव मानवः ।
साक्षान्महेशतामेति मुक्तिरन्ते करस्थिता ।। १५३ ।।

प्रत्यहं प्रपठेदेतद्विल्वमूले नरोत्तमः ।
स सालोक्यमवाप्नोति देवदेवप्रसादतः ।। १५४ ।।

यो ह्येतत्पाठयेत्स्तोत्रं सर्वपापनिबर्हणम् ।
स मुच्यते महापापात्सत्यं सत्यं वदामि ते ।। १५५ ।।

न तस्य ग्रहपीडा स्यान्नापमृत्युभयं तथा ।
न तं द्विषन्ति राजानो न वा व्याधिभयं भवेत् ।। १५६ ।।

पठेदेतद्धृदि ध्यात्वा देवदेवं सनातनम् ।
सर्वदेवमयं पूर्णं रजताद्रिसमप्रभम् ।। १५७ ।।

प्रफुल्लपङ्कजास्यं च चारुरूपं वृषध्वजम् ।
जटाजूटज्वलत्कालकूटशोभितविग्रहम् ।। १५८ ।।

त्रिशूलं डमरुं चैव दधानं दक्षवामयोः ।
द्विपिचर्माम्बरधरं शान्तं त्रैलोक्यमोहनम् ।। १५९ ।।

एवं हृदि नरो भक्त्या विभाव्यैतत्पठेद्यदि ।
इह भुक्त्वा परं भोगं परत्र च महामते ।। १६० ।।

शम्भोः स्वरूपतां याति किमन्यत्कथयामि ते ।। १६१ ।।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तत्रैव सद्भक्तियुतः पठेदिदं स्तोत्रं मम प्रीतिकरं परं मुने ।
मर्त्यो हि योऽन्यः खलु सोऽपि कृच्छ्रं जगत्पवित्रायत एव पापतः ॥ १६२ ॥

श्रीमहाभागवते उपपुराणे गङ्गाया आगमनोपाख्याने शिवसहस्त्रनामकथनं
सप्तषष्टितमोऽध्यायः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Appendix-I

Trisuparṇa Mantras

Rgveda X. 114.3-5

चतु॑ष्कपर्दा युव॒तिः सु॒पेशा॑ घृ॒तप्र॑तीका व॒युना॑नि वस्ते।
तस्यां॑ सुप॒र्णा वृष॑णा॒ नि षे॑दतु॒र्यत्र॑ दे॒वा द॑धि॒रे भा॑ग॒धेय॑म्॥

3. The quadrangular (altar) youthful,handsomely decorated, bright with oblations, clothes herself in pious rites: the two birds, the showerers of oblations, have sat down thereon where the gods receive their share.

THE TWO BIRDS---The husband and his wife, or the *yajamāna* and the *Brahmin*

एकः॑ सुप॒र्णः स स॑मु॒द्रमा वि॑वेश॒ स इ॒दं विश्वं॒ भुव॑नं॒ वि च॑ष्टे।
तं पाके॑न॒ मन॑सापश्य॒मन्ति॑त॒स्तं मा॒ता रे॑ळ्हि॒ स उ॑ रेळ्हि मा॒तर॑म्॥

4. One of the birds has entered the firmament; he contemplates this whole world: with mind mature I beheld him nigh at hand; him the mother licks, he licks the mother.

THE MOTHER--- *i.e*, the *mādhyamika vāch*, the sound of mid-heaven, the thunder, which is the mother or source of rain. The deity referred to as the bird who has taken his station in the firmament is *Agni*, or else *Vāyu*.

सु॒प॒र्णं विप्राः॑ क॒वयो॒ वचो॑भि॒रेकं॒ सन्तं॑ बहु॒धा क॑ल्पयन्ति।
छन्दां॑सि च॒ दध॑तो अध्व॒रेषु ग्र॒हान्त्सोम॑स्य मिमते॒ द्वाद॑श॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

The wise seers through their praise make into many forms the bird which is (only) one; and holding the (seven) metres at the sacrifices, the measure twelve bowls of *Soma*.

THE BIRD WHICH IS ONE—[This is the other of the two birds mentioned in verse 3. *Sāyaṇa* forgets his explanation of that verse, and says the bird referred to is the supreme soul (*paramātmā*).]

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Appendix-II

शुक्ल यजुर्वेद संहिता (माध्यन्दिनशाखा)

Śatarudriya Mantras

नमस्ते रुद्र मुन्यवं उतो त इषवे नमः।

बाहुभ्यामुत ते नमः॥१॥

Homage be paid unto thy wrath, O Rudra, homage to thy shaft : to thy two arms be homage paid.

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।

तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि॥२॥

2. With that auspicious forms of thine, mild, Rudra! pleasant to behold,

Even with that most blessed form, look, Mountain-haunter! here on us.

Auspicious form : the God having two forms, one terrific and the other gentle and auspicious.

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।

शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत्॥३॥

3. The shaft which, Mountain-haunter, thou art holding in thy hand to shoot,

Make that auspicious. Mountain-Lord! Injure not man nor moving thing.

शिवेन वचसा त्वा गिरिशाच्छा वदामसि।

यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत्॥४॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

4. O dweller on the Mountain, we salute thee with auspicious hymn;

That all, yes, all our people may be healthy and well satisfied.

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परां सुव॥५॥

5. The Advocate, the first divine Physician, hath defended us.

Crushing all serpents drive away all Yātudhānīs down below.

Hath defended us : `May he plead for us' : Eggeling. Yātudhānīs : sorceresses, or female goblins.

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः।
ये चैनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवै षाꣳ हेड
ईमहे॥६॥

6. That most auspicious One whose hue is coppery and red and brown.

And those, the Rudras who maintain their station in the regions, who surround him in a thousand bands, of these we deprecate the wrath.

असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः॥७॥

7. may he who glides away, whose neck is azure, and whose hue is red.

He whom the herdsmen; whom the girls who carry water have beheld, may he when seen be kind to us.

He who glides away : in the form of the Sun. Whose neck is azure : from drinking up the world-destroying poison

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

produced at the Churning of the Ocean by the Gods.

नमो॑ऽस्तु॒ नील॑ग्रीवाय सहस्रा॒क्षाय॑ मी॒ढुषे॑।
अथो॒ ये अ॑स्य॒ सत्वा॑नो॒ऽहं तेभ्यो॑ऽकरं॒ नम॑:॥८॥

Homage to him the Azure-necked, the thousand-eyed, the bountiful,

Yea, and his spirit ministers---to them I offer reverence.

प्रमु॑ञ्च॒ धन्व॑न॒स्त्वमु॒भयो॒रात्न्यो॒र्ज्याम्।
याश्च॑ ते॒ हस्त॒ इष॑व॒: परा॒ ता भ॑गवो वप॥९॥

Loosen thy bowstring, loosen it from thy bow's two extremities,

And cast away, O Lord Divine, the arrows that are in thy hand.

विज्यं॒ धनु॑: कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाँ२ उ॒त।
अने॑शन्नस्य॒ या इष॑व आ॒भुर॑स्य निषङ्गधिः॥१०॥

Now stringless be Kapardin's bow, his quiver hold no pointed shaft.

The shafts he had have perished and the sheath that held his sword is bare.

kapardin : he whose hair is coiled and braided; an epithet in the Rigveda of Pūshan as well as of Rudra.

या ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनु॑:।
तया॒ऽस्मान्वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ भुज॥११॥

11. Thy weapon, O Most Bountiful, the bow that resteth in thy hand---

With that, deprived of power to harm, protect thou us on every side.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

परि॑ ते॒ धन्व॑नो हे॒तिर॒स्मान्वृ॑णक्तु वि॒श्वत॑ः।
अथो॒ य इ॑षु॒धिस्तवा॒रे अ॒स्मन्नि धे॑हि॒ तम्॥१२॥

12. So may the arrow of thy bow, in all directions, pass us by.

And in a place remote from us lay thou the quiver that thou hast.

अ॒व॒तत्य॒ धनु॒ष्ट्वꣳ सह॑स्राक्ष॒ शते॑षुधे।
नि॒शीर्य॑ श॒ल्याना॒ं मुखा॑ शि॒वो न॑ः सु॒मना॑ भव॥१३॥

13. Having unbent thy bow O thou hundred-eyed, hundred-quivered One!

And dulled thy pointed arrows' Heads, be kind and gracious unto us.

नम॑स्त॒ आयु॑धा॒यानातताय धृ॒ष्णवे॑।
उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्या॒ं तव॒ धन्व॑ने॥१४॥

14. To thy fierce weapon, now unstrung, be reverent obeisance paid.

Homage be paid to both thine arms, and to thy bow be reverence!

मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कं मा न॒ उक्ष॑न्तमु॒त मा न॑ उक्षि॒तम्।
मा नो॑ वधीः पि॒तर॒ं मोत मा॒तर॒ं मा न॑ः प्रि॒यास्त॒न्वो॒ रुद्र॒ रीरिषः॥१५॥

15. Do thou no injury to great or small of us, harm not the growing boy, harm not the full-grown man.

Slay not a sire among us, slay no mother here, and to our own dear bodies, Rudra! do no harm.

मा न॑स्तो॒के तन॑ये॒ मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः।
मा नो॑ वी॒रान् रु॑द्र भा॒मिनो॑ वधीर्ह॒विष्म॑न्तः सद॒मित् त्वा॑ हवामहे॥१६॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

'Harm us not in our seed or in our progeny, harm us not in our life or in our cows or steeds.

Slay not `our-heroes in the fury of their wrath. We with oblations ever call on only thee.

नमो हिरंण्यबाहवे सेनान्ये दिशां च पतंये नमो नमों वृक्षेभ्यो
हरिंकेशेभ्यः पशूनां पतंये नमो नमंःशष्पिञ्जंराय त्विषींमते
पथीनां पतंये नमो नमो हरिंकेशायोपवीतिनें पुष्टानां पतंये नमंः॥१७॥

Homage to the golden-armed leader of hosts, lord of the regions, to the trees with their green tresses, to the Lord of beasts be homage; homage to him whose sheen is like green grass, homage to the radiant Lord of paths, homage to the golder-haired wearer of the sacrificial cord, homage to the Lord of the wellendowed.

Lord of beasts : either originally regarded as the protector of grazing cattle which are specially exposed to the fury of the Srorm God, or as the lord of sacrificial victims, as Prof. Weber thinks must be the explantion. Well-endowed; or physically, `full-fed: (Muir) ; `strong-bodied' : Eggeling

नमों बभ्लुशायं व्याधिनेऽन्नांनां पतंये नमो नमों भुवस्यं हेत्यै जगंतां पतंये नमो नमों रुद्रायांततायिने क्षेत्रांणां पतंये नमो नमंः सूतायाहंन्त्यै वनांनां पतंये नमंः॥१८॥

Homage to the brown-hued piercer, to the Lord of food be homage. Homage to Bhava's weapon, homage to the Lord of moving things! Homage to Rudra whose bow is bent to slay, to the Lord of fields homage, homage to the charioteer who injures none, to the Lord of forests be homage.

Bhava: the Existent, or the Eternal: here a name of Rudra.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नमो रोहिंताय स्थपतंये वृक्षाणां पतंये नमो नमों भुवन्तयें वारिवस्कृतायौषंधीनां पतंये नमो नमों मन्त्रिणें वाणिजाय कक्षांणां पतंये नमो नमं उच्चैर्घोषायाक्रन्दयंते पत्तीनां पतंये नमंः॥१९॥

Homage to the red arehiteet, to the Lord of trees homage! Homage to him who stretched out the earth, to him who gives relief be homage. Homage to the Lord of Plants, homage to the Prudent merchant! Homage to the Lord of bushes, to the shouting Lord of foot-soldiers who makes foes weep be homage.

नमंः कृत्स्नायतया धावंते' सत्वंनां पतंये नमो नमः सहंमानाय निव्याधिनं आव्याधिनींनां पतंये नमो नमों निषङ्गिणें ककुभाय स्तेनानां पतंये नमो नमों निचेरवें परिचरायारंण्यानां पतंये नमंः॥२०॥

20. Homage to the runner at full stretch, to the Lord of ministering spirits, homage! Homage to the conquering, piercing Lord of assailing bands, homage to the towering sword-bearer, to the Lord of thieves homage! Homage to the gliding robber, to the roamer, to the Lord of forests homage!

Thieves...robber : assuming their forms in sport, says Mahīdhara.

नमो वञ्चंते परिवञ्चंते स्तायूनां पतंये नमो नमों निषङ्गिणं इषुधिमते तस्कंराणां पतंये नमो नमंः सृकायिभ्यो जिघांथंसद्भ्यो मुष्णतां पतंये नमो नमोंऽसिमद्भ्यो नक्तञ्चरंद्भ्यो विकृन्तानां पतंये नमंः॥२१॥

21. Homage to the cheat, to the arch-deceiver, to the Lord of stealers homage! Homage to the wearer of sword and quiver, to the Lord of robbers homage! Homage to the bolt-armed homicides, to the Lord of pilferers homage! Homage to the sword-bearers, to those who roam at night, to the Lord of plunderers homage!

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नम॑ उष्णी॒षिणे॑ गिरिच॒राय॑ कुलु॒ञ्चानां॒ पत॑ये॒ नमो॒ नम॑ इषु॒मद्भ्यो॑ धन्वा॒यिभ्य॑श्च वो॒ नमो॒ नम॑ आतन्वा॒नेभ्य॑: प्रति॒दधा॑नेभ्यश्च वो॒ नमो॒ नम॑ आ॒यच्छ॑द्भ्यो ऽस्य॑द्भ्यश्च वो॒ नम॑:॥२२॥

22.To the turban-wearing huanter of mountains, Lord of land-grabbers homage! Homage to you who bear arrows and to you who carry bows. Homage to you with bent bows, and to you who adjust your arrows, to you who draw the bow and to you who shoot be homage!

नमो॑ विसृ॒जद्भ्यो॒ विध्य॑द्भ्यश्च वो॒ नमो॒ नम॑: स्व॒पद्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नमो॒ नम॒: शया॑नेभ्य॒ आसी॑नेभ्यश्च वो॒ नमो॒ नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒ नम॑:॥२३॥

23. Homage to you who let fly and to you who pierce, homage to you who sleep and to you who wake, homage to you who lie and to you who sit, homage to you who stand and to you who run.

नम॑: स॒भाभ्य॑: स॒भाप॑तिभ्यश्च वो॒ नमो॒ नमोऽश्वे॒भ्यो ऽश्व॑पतिभ्यश्च वो॒ नमो॒ नम॑ आव्या॒धिनी॑भ्यो वि॒विध्य॑न्तीभ्यश्च वो॒ नमो॒ नम॒ उग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो॒ नम॑:॥२४॥

24.Homage to assemblies and to you lords of assemblies, homage to horses and to you masters of horses, homage to you hosts that wound and pierce, to you destructive armies with excellent bands be homage.

Armies :or, alternatively, Goddesses, according to Mahīdhara: the feminine participle standing without a noun.

नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमो॒ नमो॒ व्राते॑भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नमो॒ नमो॒ गृत्से॑भ्यो॒ गृत्स॑पतिभ्यश्च वो॒ नमो॒ नमो॒ विरू॑पेभ्यो वि॒श्वरू॑पेभ्यश्च वो॒ नम॑:॥२५॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

25. Homage to the troops and to you lords of troops be homage.

Homage to the companies and to you lords of companies, homage.

Homage to sharpers and to you the lords of sharpers homage.

Homage to you the deformed, and to you who wear all forms, homage!

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो अरथेभ्यश्च वो नमो नमः
क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽअर्भकेभ्यश्च वो नमः॥२६॥

26.Homage to armies and to you the leaders of armies, homage.

Homage to you car borne and to you who are carless, homage.

Homage to the charioteers and to you drivers of horses, homage.

Homage to you the great and to you the small, homage.

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो
नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो
नमः॥२७॥

27. Homage to you carpenters, and to you chariot-makers homage.

Homage to you potters and to you blacksmiths, homage.

Homage to you Nishādas and to you Punjishthas, homage.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Homage to you dog-leaders, and to you hunters, homage.

Nishādas :Men of certain wild aboriginal tribes. *Punjishthas: fishermen, or fowlers.*

नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च॥२८॥

28. Homage to dogs, and to you masters of dogs, homage.

Homage to Bhava; and to Rudra homage, homage to śarva and to Paśupati, and to Nīlagrīva and Śitikaṇṭha, homage.

Śarva : a name or form of Rudra, of frequent occurrence in the A.V. *paśupati*: Lord of Beasts. *Nīlogrīva* : Blue-neck. See verse 7. *sitikaṇṭha* : White-throated.

नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च॥२९॥

29. Homage to him with braided hair and to him with shaven hair, homage! Homage to the thousand-eyed and to him with a hundred bows, homage!

T0 the mountain-haunter and Śipivishṭa, homage!

To the most bountiful, armed with arrows, homage!

Sipivishta : in the R.V., a name of Vishnu. See VIII 55.

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च॥३०॥

30. Homage to the short, and to the dwarf, homage, homage to the great and to the adult, homage! Homage to the fullgrown and to the growing, to the foremost and to the first be homage.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नम॑ आ॒शवे॑ चाजि॒राय॑ च॒ नमः॒ शीघ्र्या॑य च॒ शीभ्या॑य च॒ नम॒ ऊर्म्या॑य
चावस्व॒न्या॒य च॒ नमो॑ नादे॒याय॑ च॒ द्वीप्या॑य॥३१॥

31. Homage to the swift, and to the active be homage, and to the hasty and to the rapid mover be homage! Homage to him who dwells in waves, and in still waters, to him who dwells in rivers and on islands.

नमो॑ ज्येष्ठाय॑ च कनि॒ष्ठाय॑ च॒ नमः॑ पूर्व॒जाय॑ चापर॒जाय॑ च॒
नमो॑ मध्य॒माय॑ चापग॒ल्भाय॑ च॒ नमो॑ जघ॒न्या॒य च बु॒ध्न्या॒य च॥३२॥

32. Homage to the eldest and to the youngest, to the first-born and to the last-born, homage! Homage to the middle-most and to the immature, to the lowest and to him who is in the depth, be homage!

नमः॒ सोभ्या॑य च प्रतिस॒र्या॒य च॒ नमो॒ याम्या॑य च॒ क्षेम्या॑य च॒
नमः॒ श्लोक्या॑य चावसा॒न्या॒य च॒ नमः॑ उर्व॒र्या॒य च॒ खल्या॑य च॥३३॥

33. Homage to Sobhya and to the dweller in the magic amulet, homage! Homage to him who is allied to Yama, to him who prospers be homage! Homage to the famous and to the endmost, to him of the sown corn-land and to him of the threshing-floor be homage.

Sobhya : said to mean, dweller in Sobha, the City cf the Gandharvas. *Magic amulet* : a string bound round the neck or arm with incantations. *Allied to Yama* : in Yama's (death's) power : Eggeling.

नमो॒ वन्या॑य च॒ कक्ष्या॑य च॒ नमः॑ श्र॒वाय॑ च प्रतिश्र॒वाय॑ च॒।
नम॑ आ॒शुषे॑णाय चा॒शुर॑थाय च॒ नमः॒ शूरा॑य चावभे॒दिने॑ च॥३४॥

34.Homage to him in woods and to him in bushes, homage! Homage to him as sound, to him as echo, homage! Homage to him with swift armies and to him with swift chariots, homage! Homage to the hero, and to him who rends asunder be homage.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नमों बिल्मिनें च कवचिनें च नमों वर्मिणें च वरूथिनें च।
नमः श्रुतायं च श्रुतसेनायं च नमों दुन्दुभ्याय चाहनन्याय च॥३५॥

35. Homage to him who wears a helmet, and to him who wears a cuirass, homage! To him who wears mail and defensive armour, homage! To the renowned be homage, to him who is in drums and to him who makes himself known by beating them.

नमों वृष्णवें च प्रमृशायं च नमों निषङ्गिणें चेषुधिमतें च।
नमंस्तीक्ष्णेषंवे चायुधिनें च नमः स्वायुधायं च सुधन्वंने च॥३६॥

36. Homage to the bold one and to the prudent, homage to him who carries sword and quiver, homage to him who hath keen arrows and is armed with weapons, homage to him who hath good weapons and a good bow.

नमः स्रुत्यांय च पथ्यांय च नमः काट्यांय च नीप्यांय च
नमः कुल्यांय च सरस्याय च नमों नादेयायं च वैशन्तायं च॥३७॥

37. Homage to him who dwells on paths and roads, homage to him who dwells in rugged spots and on the skirts of mountains, homage to him who dwells in water courses and lakes, homage to him who dwells in rivers and meres.

नमः कूप्यांय चावटयाय च नमो वीध्रयांय चातप्याय च।
नमो मेध्यांय च विद्युत्याय च नमो वर्ष्यांय चावर्ष्यायं च॥३८॥

38. Homage to him who dwells in wells and pits, homage to him who dwells in bright sky and sunlight. Homage to him who dwells in cloud and lightning, homage to him who dwells in rain and to him who dwells in fair weather.

नमो वात्यांय च रेष्म्यांय च नमो ' वास्तव्याय च वास्तुपायं च
नमः सोमांय च रुद्रायं च नमंस्ताम्रायं चारुणायं च॥३९॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

39. Homage to him who dwells in wind and to him who dwells in tempest, homage to the dweller in houses and to the house-protector. Homage to Soma and to Rudra, homage to the copper-coloured and to the ruddy One.

नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च
नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च
नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय॥४०॥

40. Homage to the giver of weal, and to Paśupati, homage to the terrific. Homage to him who slays in front and to him who slays at a distance, homage to the slayer and to the frequent slayer, homage to the green tressed trees, homage to the deliverer.

नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः
शिवाय च शिवतराय च॥४१॥

41.Homage to the source of happiness and to the source of delight, homage to the causer of happiness and to the causer of delight, homage to the auspicious, homage to the most auspicious.

नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च।
नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च॥४२॥

42. Homage to him who is beyond and to him who is on this side, homage to him who crosses over and to him who crosses back. Homage to him who is in fords and on river banks, homage to him who is in tender grass and in foam.

नमः सिकत्याय च प्रवाह्याय च नमः किंशिलाय च
क्षयणाय च नमः कपर्दिने च पुलस्तये च नम इरिण्याय च प्रपथ्याय
च॥४३॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

43. Homage to him who is in sand and to him who is in running water, homage to him who is on pebbly ground and to him who is where still water stands. Homage to him who wears braided hair and to him whose hair is smooth. Homage to him who is in deserts and to him who is on broad roads.

नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च।
नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च॥४४॥

44. Homage to him who is in herds of cattle and to him who is in cow-pens, homage to him who is on beds and to him who is in houses. Homage to him who is in hearts, and to him who is in whirlpools, homage to him who is in wells and to him who is in abysses.

नमः शुष्क्याय च हरित्याय च नमः पांसव्याय च रजस्याय च।
नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्व्याय च॥४५॥

45. Homage to him who is in dry things and to him who is in green things. Homage to him who is in dust and to him who is in vapour. Homage to him who is in inaccessible places, homage to him who is in creeping plants, homage to him who is in the earth and to him who is in good soil.

नमः पर्णाय च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च
नम आखिदते च प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो
नमो वः किरिकेभ्यो देवानां हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो
विक्षिणत्केभ्यो नम आनिर्हतेभ्यः॥

46. Homage to him who is in leaves and to him who is in the falling of leaves. Homage to him with the threatening voice and to him who slays, homage to him who troubles and to him who afflicts. Homage to you arrow-makers and to you bow-makers, homage to you sprinklers, to the hearts of the Gods. Homage to the

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

disceerners, homage to the destroyers; homage to the indestructible.

Sprinklers : senders of rain. The hearts of the Gods : meaning according to Mahīdhara, Agni, Vāyu, and Sūrya; `the sparkling hearts of the gods' :Eggeling.

द्रापे॒ अन्ध॑सस्पते॒ दरि॑द्र॒ नील॑लोहित।

आ॒सां प्र॒जाना॑मे॒षां प॑शू॒नां मा भेर्मा रो॒ङ्मो च॑ नः॒ किंच॒नाम॑मत्॥

47. Pursuer, Lord of Soma juice, thou cleaver, coloured blue and red,

Cleave not, destroy not one of these our children, nor of these our beasts, let nothing that is ours be sick.

इ॒मा रु॒द्राय॑ त॒वसे॑ कप॒र्दिने॑ क्ष॒यद्वी॑राय॒ प्र भ॑रामहे म॒तीः।

यथा॒ शमस॑द् द्वि॒पदे॒ चतु॑ष्पदे॒ विश्व॑ं पु॒ष्टं ग्रामे॑ अ॒स्मिन्न॑नातु॒रम्॥४८॥

48. To the strong Rudra bring we these our songs of praise, to him the Lord of Heroes, with the braided hair,

That it be well with all our cattle and our men, that in this village all be healthy and well-fed.

Taken from R.V.I.114. I.

या ते॑ रुद्र शि॒वा त॒नूः शि॒वा वि॒श्वाहा॑ भेष॒जी।

शि॒वा रु॒तस्य॑ भेष॒जी तया॑ नो मृड जी॒वसे॑॥४९॥

49. Rudra with that auspicious form of thine which healeth every day,

Auspicious, healer of disease, be kind to us that we may live.

परि॑ नो रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु॒ परि॑ त्वे॒षस्य॑ दु॒र्म॒तिर॑घा॒योः।

अव॑ स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृड॥५०॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

50. May Rudra's missile turn aside and spare us, the great wrath of the impetuous One avoid us.

Turn, Bounteous God, thy strong bow from our princes, and be thou gracious to our seed and offspring. cf; RV II. 33.14.

मीढुंष्टम् शिवंतम शिवो नंः सुमनां भव।

परमे वृक्ष आयुंधं निधाय कृत्तिं वसांन आ चंर पिनांकं बिभ्रदा गंहि॥

51. Most bounteous, most auspicious, be auspicious, well inclined to us.

On some remotest tree lay down thy weapon, and clad in robe of skin approach, bearing thy bow come hither-ward.

विकिंरिद्र विलौंहित नमंस्ते अस्तु भगवः।

यास्तें सहस्रंथ्ठं हेतयोऽन्यमुस्मन्नि वंपन्तु ताः॥५२॥

52.O Wound averter, purple-hued, to thee be homage, holy Lord!

May all those thousand darts of thine strike dead another one than us.

सहस्रांणि सहस्रशो बाह्वोस्तवं हेतयंः।

तासामीशांनो भगवः पराचीना मुखां कृधि॥५३॥

53. Tousands of thousands are the shafts, the missiles ready in thy hands:

Thou holy Lord, who hast the power, turn thou their points away from us.

असंख्याता सहस्रांणि ये रुद्रा अधि भूम्यांम्।

तेषांथ्ठं सहस्रयोजनेऽव धन्वांनि तन्मसि॥५४॥

54. Innumenable thousands are the Rudras on the face of earth:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Of all these Rudras we unbend the bows a thousand leagues away. 54 Taken from R.V. II. 33.14.

अस्मिन् महत्यर्णवेऽन्तरि 'क्षे भवा अधि।
तेषांꣳ सहस्त्रयोजनेऽव धन्वांनि तन्मसि॥५५॥

55. Bhavas there are above us in this mighty billowy sea of air, of all of these do we unbend, etc.

नीलंग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपंश्रिताः।
तेषांꣳ सहस्त्रयोजनेऽव धन्वांनि तन्मसि ॥५६॥

56. Rudras are dwelling in the sky, whose necks are blue, whose throats are white :

Of these do we unbend the bows a thousand leagues away from us.

नीलंग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः।
तेषांꣳ सहस्त्रयोजनेऽव धन्वांनि तन्मसि॥५७॥

57. Śarvas haunt realms beneath the earth---their necks are blue, their throats are white:

Of these, etc.

ये वृक्षेषु शष्पिञ्जंरा नीलंग्रीवा विलोंहिताः।
तेषांꣳ सहस्त्रयोजनेऽव धन्वांनि तन्मसि॥५८॥

58.These, green like young grass, in the trees, with azure necks and purple hue.

Of these; etc.

ये भूतानामधिंपतयो विशिखासंः कपर्दिनंः।
तेषांꣳ सहस्त्रयोजनेऽव धन्वांनि तन्मसि॥५९॥

59. Those, ministering spirits' lords, with no hair-tufts, with braided locks,

Of these, etc.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ये पथां पंथिरक्षंय ऐलबृदा आंयुर्युधंः।
तेषांꣳ सहस्त्रयोजनेऽव धन्वांनि तन्मसि॥६०॥

60. Those, the protectors of the paths, bringers of food, who fight for life, Of these, etc.

ये तीर्थानिं प्रचरंन्ति सृकाहंस्ता निषङ्गिणंः।
तेषांꣳ सहस्त्रयोजनेऽव धन्वांनि तन्मसि॥६१॥

61. Those who with arrows in their hand, and armed with swords, frequent the fords, Of these, etc.

येऽन्नेषु विविध्यंन्ति पात्रेंषु पिबंतो जनांन्।
तेषांꣳ सहस्त्रयोजनेऽव धन्वांनि तन्मसि ॥६२॥

62. Those who, inhabiting the food, vex men while drinking from their cups, etc.

य एतावंन्तश्च भूयांꣳसश्च दिशों रुद्रा वितस्थिरे।
तेषांꣳ सहस्त्रयोजनेऽव धन्वांनि तन्मसि॥६३॥

63. Rudras so many and still more, lodged in the quarters of the sky, etc.

नमोंऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषंवः।
तेभ्यो दश प्राचीर्दशं दक्षिणा दशं प्रतीचीर्दशोध्वाः।
तेभ्यो नमों अस्तु ते नोंऽवन्तु ते नों मृडयन्तु ते यं द्विष्मो यश्चं नो
द्वेष्टि तमेंषां जम्भें दध्मः॥६४॥

64.Homage to Rudras, those whose home is sky, whose arrows floods of rain.

To them ten eastward, southward ten, ten to the south, ten to the north, ten to the region uppermost!

To them be homage! May they spare and guard us. Within their jaws we lay the man who hates us and whom we abhor.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

To them : `I stretch out' understood. *Ten* : `fingers' understood. That is, he extends both hands, with the finger tips placed together in sign of adoration to the omnipresent Rudras, towards the four quartes of the sky.

Dr. Muir observes : Many of the epithets in this Śatarudriya are not found in other books : and it is difficult, and perhaps of little importance to discover their real sense. Others, as the reader will have observed are of the most fantastic character'.

नमोंऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदींचीर्दशोध्वर्ाः।
तेभ्यो नमों अस्तु ते नोंऽवन्तु ते नों मृडयन्तु ते यं द्विष्मो यश्चं नो द्वेष्टि तमेंषां जम्भें दध्मः॥६५॥

65.Homage to Rudras, those whose home is air, whose arrows is the rain. To them, etc.

नमोंऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषंवः।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदींचीर्दशोध्वर्ाः।
तेभ्यो नमों अस्तु ते नो ऽवन्तु ते नों मृडयन्तु ते यं द्विष्मो यश्चं नो द्वेष्टि तमेंषां जम्भें दध्मः॥६६॥

66.Homage to Rudras, those whose home is earth, whose arrows is men's food.

To them be homage, etc.

इति षोडशोऽध्यायः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Appendix-III

Śivasahasranāma Glossary

अकपिल:	Not brown (Free from any Kārmic affectation).
अक्ष:	The axle (the substratum of creation).
अक्षरम्	Imperishable
अगण:	Uncountable
अगम:	Unfathomable
अग्निज्वाल:	(Shining like) the flame of Fire
अङ्गलुब्ध:	He who loves the limbs (the six Vedāṅgas; cf. छन्दो व्याकरणोत्तर:); fond of the Aṅga country; fond of Liṅga form.
अचल:	Immutable
अचलोपम:	(Invincible) like a mountain
अचिन्त्य:	Incomprehensible
अज:	Unborn
अजित:	Unconquerable
अजैकपात्	The Unborn, lone traveller (like the sun, cf.Rv. 2.31.6)
अतिदीप्त:	Immensely brilliant
अतिधूम्र:	Immensely grey

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अतुल्यः	Matchless
अथर्वशीर्षः	With the Atharvaveda as His head.
अदम्भः	Free from hypocrisy
अदितिः	The unfragmented one; (identifiable as the Goddess) Aditi.
अदीनः	Free from poverty.
अद्रिः	a mountain
अद्र्यालयः	Having His abode on the mountain.
अधनः	Free from possessiveness.
अध्यात्मानुगतः	Helpful to spiritual aspirants
अनघः	Untounched by sins.
अनन्तरूपः	Having infinite forms.
अनलः	Fire
अनिमिषः	Devoid of winking; ever vigilant
अनिलः	The Air
अनिन्दितः	Irreproachable
अनीतिः	One who guards against calamitous seasons (like drought etc.)
अन्तरात्मा	The innermost self.
अन्तर्हितात्मा	The hidden soul (of the Universe)
अपरः	The one without a second
अप्सरोगणसेवितः	Served by the bands of divine damsels
अभिगम्यः	Accessible
अभिरामः	Beautiful
अभिवाद्यः	Adorable
अमरः	Immortal

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अमरेशः	Lord of the Gods
अमर्षणः	Intolerant (of demoniac persecution)
अमितः	Unfathomable
अमित्रजित्	Conqueror of Enemies.
अमुख्यः	The One without a superior authority (to control)
अमृतः	Imperishable
अमोघः	Unfailing
अमोघः	Endowed with unfailing boons
अम्बुजालः	(with) a heap of waters (as his abode)
अर्थः	The summum Bonum
अर्थकारी	The one with the habit of granting boons
अर्थार्थकररोमशः	So bountiful that even his bodily hair emit boons.
अर्दनः	destroyer (of the wicked)
अर्यमा	the (origin of the) Sun.
अलोलः	Composed
अव्यक्तम्	Unmanifested, latent
अव्ययः	Imperishable
अशनी	having a thunderbolt
अश्वः	Omnipresent,(fast like) a horse (Emitting the divine) rays
असक्तः	Detached
असत्	Nonexistent, Unmanifested
असपत्नः	The one without opponents

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

असमाम्नाय:	The one who transcends even the Vedas; the central theme even of the Epics and Purāṇas.
अस्त्रिक्रम:	The one who moves with weapons
अस्नेहन:	Free from attachement
अह:	Day
अहश्चर:	The one who moves, during the day time
अहिर्बुध्न:	The Nether world.
अहोरात्रम्	The one who represents the day and night
आकाशनिर्विरूप:	Formless like the Space
आत्मपति:	Lord of the souls
आत्मसम्भव:	Born out of Himself
आत्मसहाय:	One who (always) accompanies the soul.
आदि:	The Beginnig (of creation)
आदिकर:	The one responsible for the commencement of creation; Greator of Hiraṇyagarbha
आदित्य:	Free from fragmentation
आदित्य:	The (Supreme) Sun-god
आद्य:	The Beginnig (of the Begining)
आयु:	Life span (of the Universe)
आयुधी	Armed with weapons
आरोहण:	The ascending Deity
आर्द्रचर्माम्बरावृत:	One who wears the dress consisting of wet hide
आवेदनीय:	The one worthy of being adored
आवेश:	(Embodiment of) Sprititual absorption

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आश्रमपूजितः	Worshipped by (people of all) āśramas(Stages of life)
आश्रमस्थः	Well settled in His (own) āśrama
आषाढः	(The divine sacred) Rod
इतिहासकरः	The one who creates histories
इन्दुः	The Moon
इन्द्रियः	The sense-organ
ई	(Identifiable as) Goddess of wealth
ईड्यः	Worthy of being worshipped
ईशानः	Overlord
ईश्वरः	God
उग्रः	Terrific
उग्रतेजाः	Enowed with terrific energy
उत्थानः सर्वकर्मणाम्	The one from whom all activities originate
उत्सङ्गः	The Lap (of the Universe)
उदग्रः	Terrible
उद्भिद्	(Sustainer of) the plant life
उन्मत्तवेशप्रच्छन्नः	The one who hides Himself in the form of a Crazy Being
उन्मादः	(enbodiment of) spiritual Frenzy
उपदेशकरः	Preceptor
उपशान्तः	Tranquil
उपहारप्रियः	One who is fond of dedicated devotion
उमाकान्तः, उमाधवः, उमापतिः	The Husband of Umā (the Supreme Goddess)

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

उरगः	Serpent
उष्णीषी	Having a turban (on his head)
ऊर्ध्वगात्मा	The Soul (of the Universe) with upward movement
ऊर्ध्वरेताः	Endowed with Upward-moving energy
ऊर्ध्वलिङ्गः	Endowed with upward moving generative symbol
ऊर्ध्वशायी	One who sleeps on the highest peak (of the mountain)
ऊर्ध्वसंहननः	One whose material form moves upwards
ऋक्सहस्रामितेक्षणः	Endowed with an infinite visual faculty consisting of thousands of Ṛks.
ऋतुः	(Controller of) Weather, seasonal variations of Time
ऋतुकरः	One who brings about seasonal variations
ककुभः	One who represents all directions (shining like)
कनकः	Gold
कनिष्ठः	Atomic
कपर्दी	Endowed with matted hair
कपालवान्	with a (garland of) skulls
कपिलः	Brown; the sage Kapila
कपोतस्थः	Living among pigeons. An ascetic (following the example of self-immolating pigon hosts,cf.MBG 12.143-149)
कमण्डलुः	An ascetic's waterpot
कमण्डलुधरः	With an ascetic's waterpot (in hand)

